
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

ना॰ वृत्ति॰
१

॥श्रीगणेशाय नमः॥ श्रीआश्वलायनाचार्याय नमः॥ प्रज्ञानानंदमूर्तिः सकलदिगः सर्वदा सन्न नन्यः सर्वस्मा
त्स्वप्रकाशः स्थिरचरनिलयः प्रत्यगात्मा स देवः। श्रौतस्मार्तक्रियात्माकृतिमननिदिध्यासवैराग्यलभ्यः सब्रह्मा
विष्णुरीशः सकलमपि जगत्सर्वदा व्याद्दसौ नः॥१॥ गुणदोषविनिर्मुक्तं स्वप्रकाशमनाकुलं। गंभीरबोधमानंदं नमा
मि ब्रह्म शाश्वतं॥२॥ आश्वलायनसूत्रस्य भाष्यं भगवता कृतं। देवस्वामि समाख्येन विस्तीर्णं सदनाकुलं॥३॥ तत्सारा
त्मयेदानीं क्रियते वृत्तिरीदृशी। नारायणेन गार्ग्येण नरसिंहस्य सूनुना॥४॥ अथैतस्य समाम्नायस्य वितानेयोगाप
त्तिं वक्ष्यामः। लौकिकानि प्रत्याम्नायं प्रयोगशास्त्राणि स्मर्यंते तान्यनुष्ठानोपयोगितया ध्ययनविध्याक्षिप्तत्वात्समा
म्नायमंगत्वं प्रतिपन्नानि। तत्रांगांगिनोरनुष्ठानक्रमानंतर्यमथशब्दो द्योतयति। एतस्येति शब्दो निर्विशेषपुरोरुक्कं
नापवालखिल्यमहानाम्न्यैतरेयब्राह्मणसहितस्य शाकलबाष्कलस्य चाम्नायद्वयस्य एतदाश्वलायनसूत्रं नाम प्र
योगशास्त्रमित्यध्येतृप्रसिद्धं संबंधविशेषं द्योतयति। समाम्नायस्येत्युच्यते। एतस्यैव सम्यगभ्यासयुक्तस्येदं शास्त्रं त
खिलानां सम्यगभ्यासरहितानामिति। वितता अग्नयो यस्मिन्निति श्रौतं कर्म जातमग्निहोत्रादि वितानशब्देनोच्यते स

१

(1)

आ०सू०टी०
२

भवति गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि अग्न्याधानसाध्यानि तस्मादाधानप्रभृतित्वं सिद्धं श्रौ
तानां कर्मणां बहुवचनं सर्वश्रौतानां कर्मणां परिग्रहार्थं । सर्वाणि श्रौतान्याधानादूर्ध्वमेव कर्तव्यानि न किंचिदपि
श्रौतमाधानादर्वागिति अनेन प्रकारेणाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वं साधितं भवति । यद्यपि हि कर्मा
र्थं स्यात्तर्हि कर्म क्रियेत तत्र कस्यचित्परस्तादपि स्यात्कस्यचित्परस्तादाधानं स्यात्तस्याग्न्याधेयप्रभृतित्वं विहन्येत । आ
धानस्याग्न्यर्थत्वे च नायं दोषः । अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति । तस्मादनाहिताग्नेः क्षामवत्सा
द्यो न भवंति । अवकीर्णिना पश्वर्थमाधानं न कर्तव्यं साधितं भवति । न परस्तात् आह । एतेन सर्वमिदं शास्त्रं
श्रुतिमूलमिति दर्शयति । तेन अस्मिं शास्त्रे यददृष्टमूलं तदाम्नायांतरमूलमिति साधितं भवति अस्मिंस्तु शा
स्त्रे अनिबद्धस्याम्नाये दृश्यमानस्य श्रुतित एव प्रयोगसिद्धिर्भवति । श्रुतेः स्वातंत्र्यकीर्तनात् इति आधान
स्य प्रथमानुष्ठेयत्वात्प्रथमं तदेव वक्तव्यमित्यत आह ॥ दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तंत्रस्य तत्राम्ना
तत्वात् । दर्शपूर्णमासशब्दो यथासंख्येन सूर्याचंद्रमसोरसंनिकृष्टविप्रकृष्टदेशस्थिते लक्षणवचनौ त

रामं०
२

द्यौगादहोरात्रवचनौ तद्योगादेव कर्मवचनौ । अत्र तु कर्मवचनौ पश्चात्तयोस्वचनोपि दर्शशब्दो त्याच्चुतरत्वात्पू
र्वस्मिं निपात्यते तु शब्दो विशेषद्योतकः । तंत्रमंगसंहतिर्विध्यंतर इत्यर्थः । स चावस्थानादिसंरूढाजपानः प्रधानस्य
तंत्रणात्तंत्रमुच्यते । तच्च दर्शपूर्णमासयोरेवाम्नातं नान्यास्विष्टिषु अतस्तत्सापेक्षत्वादन्यासां तावेव पूर्वं व्याख्या
तव्यौ स्यातां एतदुक्तं भवति । आधानस्य प्रथमप्रयोज्यत्वात्तस्मिन्नेव प्रथमं व्याख्याते ऽसति तत्साध्यस्य
गार्हपत्यादेः पवमानेष्टिसापेक्षितत्वात्ता अपि तत्रैव वक्तव्याः स्युः । उक्ता अपि विध्यंतसापेक्षत्वात्तस्य दर्श
पूर्णमासयोरेवाम्नातत्वात्तद्व्याख्यानमंतरेण तत्तानाभावात्तयोः कुं नैव शक्यंते अतो नेवविशेषेण तावेव पू
र्वं व्याख्यास्यामः नाधानमिति सूत्रस्यार्थः । इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभते । दर्शपूर्णमासयोर्हि वि
धास्यमाने पुरोहितमंत्रिनः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद्धिहारं प्रपद्यते ।
पूर्वेणोत्करमपरेण प्रणीताः ॥ दर्शपूर्णमासयोरित्यधिकारार्थे ऽध्यायपरिसमाप्तेः वाक्येन शेषविविशेषा
संयुक्तस्योभयार्थत्वाय हविरासादनमामंत्रणं चोभयं संहृतमेवैष्टिकस्य प्रवेशस्य निमित्तं होत्रमित्यृग्वेद
ग

(२)

आ॰सू॰र॰
३

स्यसमाख्यानेदं विहितानां पदार्थानां कर्ता होतेत्युच्यते। प्राङ्मुखत्वं स्थानाचमनाभ्यां संबध्यते। मध्यगत
स्य विशेषाग्रहणात् यज्ञोपवीतं तावदाचमनार्थं न यानविधेयं स्मृतिप्राप्तत्वात्। अस्यार्थं च न भवति संबंधा
भावात्। एकवाक्यगतत्वात्। कर्त्रा संबध्यमानस्य च प्रयोजनाभावः स्मृतिप्राप्तत्वादेव। अतः स्मृतिप्राप्तमि
हानूद्यते। स्मार्तानां स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरुद्धानामस्मिन् शास्त्रे प्राप्तिदर्शनार्थं इद
माचमनं कर्माङ्गं विधीयते। शौचार्थस्य गृहप्रवेशात् प्रागेव कृतत्वात् तदुक्तं। मनःप्रसादात्मसंस्कारात् तपसा स्ना
तकर्मणा। आचांतः। चात्मनः शुद्धिं कृत्वा कर्म समारभेदिति। दक्षिणावृन्नाम यो दक्षिणं पार्श्वं मध्ये कृत्वावर्त
ते स दक्षिणावृत् विह्रियंते ग्नयो यस्मिंदेशे स विहारः। उत्करो नाम उत्कीर्यंते वेदिपांसवो यस्मिंदेशे स उत्क
रः। प्रणीता नाम आपो मंत्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः। उत्करं प्रणीतांश्चांतरेण यो देश
: तेन विहारं प्रपद्यते एतदुक्तं भवति। स्नात्वाचम्य यज्ञोपवीती भूत्वा हविर्धानसंनेषु आमंत्रितश्च सन्होता गा
र्हगाहवनीयाद्यो देशस्तस्मिन् प्राङ्मुखोवस्थाय निष्क्रम्य प्राङ्मुख एव भूत्वाचम्य दक्षिणावृद्भूत्वा पूर्वे

राम॰
३

णोत्करमपरेण प्रणीतानां यो देशस्तेन विहारं प्रपद्यत इति। उत्करप्रणीताग्रहणादेव विहारप्रत्यये सिद्धे यद्विहा
रग्रहणं तत्सर्वः कर्ता सर्वकर्मणि विहारप्रदनं कुर्वन्दक्षिणावृद्भूत्वैतेन यथा प्रपद्येतेत्येवमर्थं। इध्ममपरेण
प्रणीते। यदनौषधिहविष्कं कर्म तत्र प्रणीता नाभिहोष्यंते। हविःश्रपणार्थत्वात्प्रणीतानां तस्मिन्निध्मपरेण प्रा
पद्यते प्रणीतास्तत्र न संतीति। चात्वालं चात्वालवत्सु। चात्वालो नाम वटः प्रकृत्सोमादिषस्ति येषु उत्तरवेद्यर्थं
यत्र मृत्खात्वाद्रियते तद्वत्सु तेषु तमपरेण प्रपद्यते। सर्वत्रोत्करः पश्चिमर्यवधिः। एतत्तीर्थमित्याचक्षते एतम
ध्वानं तीर्थमित्याचक्षते वेदविदः। आचक्षत इति ब्रुवंश्चैदिकीयं संज्ञान्न पारिभाषिकीति दर्शयति। उत्कराद्य
भावेपि स देशस्तीर्थसंज्ञक एव देशलक्षणार्थत्वादुत्करादीनां ग्रहणस्येति। अतोग्निहोत्रादिष्वपि तेनैव य
था प्रपदनं सिद्धं भवति। तस्य नित्याः प्रांचश्चेष्टाः॥ षट्सूत्राणि सर्वार्थानि तदर्थं तस्येति विशेषणं कृतं अस
त्यस्मिंहोतुः प्रकृतत्वात्तस्यैवेमे विधयः स्युः। अस्मिंस्तु सति संनिकृष्टविषयत्वात्सर्वनाम्नः यस्तीर्थेन वि
हारप्रपदनार्हो यः कर्ता विहितः तस्यैवेमे विधयो भवंतीत्युक्तिस्येति विशेषणं कृतवानाचार्यः। नित्या इत्य

(३)

आ॰ सू॰ वृ॰
४

नेन प्राङ्मुखता चेष्टानां प्रागग्रता याः नित्यत्वं न विधानमिवाविहितत्वादेव स्वरूपनित्यत्वयोरपि सिद्धत्वात् अनन्तस्यैवार्थः तस्य वास्यानां चेष्टानामुपरमे पिमनोवाक्कायसंयन्त्रणार्थयो नित्या एवेति प्रोच इति शब्दैः पूर्वं वै दृग्वाची पुंसि बहुवचनांतः चेष्टा इति क्रियावाची स्त्रियां बहुवचनांतस्तत्र प्राचः इत्यत्र पुंसः प्राक्त्वेन संबंधाभावात् कर्तुः प्राङ्मुखत्वं विधीयते। चेष्टाशब्दगतबहुवचनेनास्य बहुत्वस्य सामानाधिकरण्यादेव चेष्टानां प्राक्त्वं विधीयते। तासां अमूर्तत्वात्स्वतः प्राक्त्वासंभवात्तत्साधनेषु प्रागग्रता तासां च प्राञ्च एवापवर्ग इति एवं विधिबलाद्भवति एतदुक्तं भवति। यो यस्मै येन विहारं प्रपन्नस्तस्य तस्य तत्प्राङ् निष्क्रमणान्मनोवाक्कायसंयन्त्रणाद्योनित्यास्युः। कर्तुश्च प्राङ्मुखत्वं चेष्टानां च प्रागग्रं चेति विषमसूत्रप्रणयनेन व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहाद्लक्षणमित्येषा परिभाषा परिभाषा संगृहीता भवति। अंकधारणं वा अंकमूरूरूपरस्थं तस्य करणं दक्षिणोत्तरेण परस्थोनेतिवक्ष्यमाणरूपं धारणे लुप्यते सा च नित्या भवेदुपवेशनकालादारभ्या कर्मसमाप्तेरविच्छेदेन कार्यमित्यर्थः। अंकधारणस्योपवेशनांगत्वेन प्राप्तस्यापवर्गान्तत्साधनानां च प्रागग्रतेः॥

रामं॰
४

दर्शार्थतापरिहारार्थमेव नित्यत्वेपि प्राप्ते तं नियततावचनेन पत्नीसंयाजिके अनिरस्य तृणमित्येवमादिषूपवेशनेषु मंत्रनिषेधेपि वक्ष्यमाणस्योपवेशनप्रकारस्य नित्यत्वेन प्रापणार्थमंत्रविध्यसंबंधेष्वग्निहोत्रादिषु वक्ष्यमाणलक्षणस्यैवोपवेशनस्य प्रापणार्थं च यज्ञोपवीतशौचे च पूर्वस्य यज्ञोपवीतग्रहणस्य स्मार्तानां प्रापणार्थत्वानि वीतप्राचीनीवीतयोर्मानुषपैतृकयोः कर्मणोः स्मार्तत्वेन प्राप्तौ सत्यां नियमार्थमिदमुच्यते यत्र निवीते विधीयते तत्रैव ते भवतो न मानुषं पैतृकं वा कर्म दृष्ट्वेति तयोर्विध्यभावे यज्ञोपवीतमेवेति नियम्यते। देशस्यांगप्रधानार्थत्वादिष्टादिभक्षणादेश्चांगत्वाद्स्य च विहारदेशे प्राप्तौ सत्यामेवं शौचग्रहणे न नियम्यते। कृत्स्नार्थं मेषुविष्य संपादियत द्विहारान्निष्क्रम्य बहिः कर्तव्यं अंतर्विहारेषु चिरेव नित्यं स्यादिति। विहाराद्व्यावृत्तिश्च तत्र चेत्कर्म। आवृत्तिः एतत्तः इति। विनेहारं एतत्तः कुर्यात् तत्र चेद्विहारे कर्म भवेत्सयोगमध्येपि कर्म कुर्वतामेषां य नियमो नोपरतकर्मणामित्यर्थः। अतो विहाराद्व्यावृत्तिनिषेधात् पश्चाद्स्योपविश्य पश्चात्स्यधिष्ण्यस्योपविशति। पश्चादुत्तरवेदेरुपविश्याध्वर्युरित्येवमादौ मध्ये स्वायां अपक्रम्य

धीतप्राचीना
प्य
कुर्य

आ०सू०वृ०
५ पि

उत्तरतंत्रविशेषात्। तत्राप्यस्मिन्सूत्रे पुनिसत्वानुकर्षणार्थः। तत्र चेत्कर्मेति वचनात् ब्रह्मणोप्ययं नियमो भवेत्। उ
त्तरसूत्रे अंगवेदं पदत्रयं तेन ब्रह्मणो दक्षिणांगव्यापारः सिद्धो भवति एकांगवचने दक्षिणं प्रतीयात्। एकशब्दः
कैवल्यवचनः एकं च तदंगं चेत्यंगं तस्य दक्षिणभेदेन द्वित्वयोगित्वादंगं हस्तादि तस्य द्वित्वेन वचनेन दक्षिणमेवां
गं साधनं विंद्यात् द्वित्वयोगोंऽस्त्यत्रांगं कुर्यात्। एकवचनं बहुवचनेकत्वैकत्वबहुत्वापक्षे एकत्वादीनामप्यत्रोप
योगात्। केवलांगवचनमेव दक्षिणप्रत्ययस्य निमित्तमित्यर्थः॥ हस्तेन वा पादेन वेत्युदाहरणं। अनादेशे। द्वि
त्वयोगिनोंऽगस्यानादेशे क्रियामात्रविधाने इत्यर्थः। तत्रापि दक्षिणं विद्यात् उपघ्नेत्। अभिक्रम्य अंगुलीरंगु
लिभिरित्युदाहरणानि च श्रुत्यादरेनंगत्वात्तेष्वयं नियमो नास्ति अवयवविशेषाप्रयोगाद्विशाकयश्चसुराद
यउच्यते। नावयवाइति। कर्मचोदनायां होतारं। कर्तृरहिते क्रियाविधौ होतारं कर्तारं विद्यात्। कर्तृसहितेस
एव कर्ता भवेत्। येन सहितं यत्कर्म स्यात्। कर्तृरहितोपि गुणविधिः। सर्वार्थं कर्मचोदनायामिति विशेषणा
त्। नेदं होतुः प्रापकं किं तर्हि प्राप्तस्य नियामकं तेनेष्टिपशुसोमेष्वाग्नहोतुरेव कर्तृत्वं नियमइति। दद्याती

=न =स

दिना
०म० वे ५

तियजमानं। स्वत्वमाहृतिपूर्वके परस्वत्वापादनपर्यंते दद्यातिविधौ यजमानं कर्तारं विद्यात्। जुहोतिजपा
तीति प्रायश्चित्ते ब्रह्माणं। तृतीयाध्यायगोचरे प्रायश्चित्तप्रकरणे जुहोतिजपतिकर्तारं ब्रह्माणं विद्यात्। ज
पशब्देनात्र साहचर्याज्जपादिषट्कं गृह्यते तेनास्मिन्प्रकरणे मुख्यजपस्याभावात् एवं च सति कर्मकरणत्वेन
होममंत्रस्यापि ग्रहणे सिद्धे यज्जुहोतिग्रहणं तज्जपग्रहणे न होममंत्रा न गृह्यंत इत्येवमर्थं तेन पित्र्यायां ज
पादिलोपेपि होममंत्रा न लुप्यंते। ऋचं पादग्रहणे। पादशब्दोऽत्र मूलवाची ऋचः मूलग्रहणे ऋचं विद्यात्
। अग्निं नमध्यमयोर्ग्रहणे प्रवो वाजा अभिद्यवः अग्निर्नेता त्वं सोम क्रतुभिरित्युदाहरणानि। सूक्तं सूक्तादौ ही
नेपादे। अत्र पादशब्दो गायत्र्यादीनां भागवाची सूक्तादौ हीने पादे गृह्यमाणे सूक्तं विद्यात्। त्वमग्नेव सूक्तं
हिक्षेन वदित्युदाहरणानि। अधिके तृचं सर्वत्र। अधिके पादे गृह्यमाणे तृचं विद्यात्सर्वत्र सूक्तादाव सूक्ता
दौ चेत्यर्थः। अग्न आयाहि वीतये गृणानः ईळेन्यो नमस्तिरइत्युदाहरणानि॥ जपानुमंत्रणाप्यायनोपस्था
नान्युपांशु॥ सर्वत्र शब्दोत्रापि संबध्यते मध्यगतस्य विशेषाग्रहणात्प्रयोजनवत्ताच्च। अस्मिंश्छास्त्रे या

निजपादीनितान्युपांशु प्रयोक्तव्यानि। मंत्राश्च कर्मकरणाः। चशब्देनात्र सर्वत्रेत्यपांशुत्वमित्यनुकृष्यते मंत्राः कर्मकरणाश्च सर्वत्रोपांशु प्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणं। करणवदशब्दममनः प्रयोग उपांशुरिति। जपादीनां पठ्यते लक्षणमुच्यते। जपमुच्चरणं विद्यात् फलार्थमपि तद्भवेत्। अर्थतः कार्यलाभश्च दृष्ट एव फलतो भवेत्। मंत्रमुच्चारयन्नेव मंत्रार्थत्वेन संस्मरन्। शिषिणं तन्मना भूत्वा स्यादेतदनुमंत्रणं। एतदेवाभिमंत्रस्य लक्षणं चेक्षणाधिकं। अद्भिः संस्पर्शनाधिक्यान्न देशाप्यायनं स्मृतं। उपस्थानं तदेव स्यात्प्रणतिरुत्थानसंयुतं। वाग्यं कार्यं च देवेषु मंत्रकाले क्रियेत तत्। कर्मणः करणास्तेषु विहितार्थप्रकाशनात्। मंत्रेण कृत्वा मंत्रोऽन्ते क्रियते कर्म येषु तु। इदं कार्यमनेनेति तत्र कुर्यादयं विधिः। लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञिताः। अनुमंत्रणग्रहणेनाभिमंत्रणमपि गृह्यते। अनुमंत्रणाप्यायनोपस्थानानां कर्मकरणत्वाविशेषेऽपि पृथक्ग्रहणं तन्मंत्रान्ते कर्मारंभ इति कर्मकरणधर्मो यः स तेषु न भवतीत्येवमर्थं। तेन मंत्रोच्चारणसमकालमेव तेषु क्रिया भवति॥ प्रसंगादपवादो बलीयान्॥ सामान्यविधेर्विशेषविधिर्बलीयान्‌

नित्यर्थः। लोकवेदप्रसिद्धस्य न्यायस्य वचनप्रयोजनं। सर्वे ह्यपवादाः प्रसंगस्यैव बाधका नापवादाः सावकाशत्वे परस्परं बाधका इत्येवमर्थमतः स्यादुक्तित्वामासु आहावो नरयोः प्रणवयोर्यैर्मिह्वत्वनिगरोत्तयोः प्रणवरूपः प्रतिगरौ न बाधकौ भवति॥ प्रपद्याभिक्रमणं दक्षिणपादेन वेदिश्रोण्योत्तरया पार्ष्णिसमां निधाय प्रपदेन बहिराक्रम्य संहितौ पाणी धारयंता काशवत्संगुलीस्तु द्वयसंमितावंकसंमितौ वा द्यावापृथिव्योः संधिमीक्षमाणः। तिष्ठेदिति शेषः। तीर्थेन विहारं प्रपद्यते इत्युक्तं। तत्रैकेन पदविक्षेपेण बहिर्विहारादंतर्विहारप्रपदनं कर्तुमशक्यं। दक्षिणांगप्रत्ययश्च सिद्ध एव। इदानीं प्रपद्येत्युच्यते। आवेदिश्रोण्योः यत्प्रपदनं तस्य सर्वस्य विहितत्वसिध्यर्थं। अभितः क्रमेत रौत्तरेणेति नैरर्थ्यं वचनं अनेकपदविक्षेपसाध्यत्वात्तस्य प्रपदनस्य सर्वेषु च पदविक्षेपेषु दक्षिणस्यांगत्वोहरणसिध्यर्थं। वेदेः पश्चाद्भागे श्रोणिरिति संज्ञा पूर्वाभ्यामंससंज्ञेति। पादस्यापरभागः पार्ष्णिः पूर्वः प्रपदः। बहिर्वेद्यां स्तीर्णं तृणं उत्तरया श्रोण्या दक्षिणस्य पादस्य पार्ष्णिसमां निधाय तस्यैव प्रपदेन वेद्यां स्तीर्णं बर्हिराक्रम्य बहिर्वेदि समं निधायात्मनः सव्यदक्षिणौ हस्तौ पृथक् पृथक् विरलांगुलि

आ॰सू॰वृ॰ ७

कौकृत्वाङ्गुष्ठमनामिकया भूतावेव तौ पाणी परस्परसंहितौ वक्षत्वा तौ हृदयसंमितावंकसंमितौ धारयन् द्यावापृथिव्यो
ःसंधिमीक्षमाणः नोर्ध्वमधस्तिर्यग्वेक्षमाणः ऊर्ध्वः प्राङ्मुखस्तिष्ठेत्। एतद्धोतुस्थानं अर्थशाद्धो भावसाध
नो नाधिकरणसाधन एतच्छब्दे नश्रोणिदेशे च हस्तपादादियं चलेन च विशिष्टयत्सूर्वसूत्रोक्तं तदत्र स्थानश
ब्देनोच्यत इति प्रदर्श्यते। यत्र होतुस्थानं चोपनेन चेत स्थानं भवतीत्यर्थः। होतृग्रहणमुत्तरसूत्रस्य सर्वा
र्थत्वाय। आसनं वा सर्वत्रैवं भूतः॥ अयं वा शब्दश्च शब्दार्थे वर्तते। स्थानं चासनं च सर्वात्र सर्वैः कर्तव्य एवं भूतः
कुर्यात्सूर्वोक्तहस्तपादादियं त्रण विशिष्टेन श्रोणिदेशविशिष्ट इत्यर्थः। श्रोण्यादिस्सर्वेषु प्राप्तेषु श्रोणिदेश
वर्जनेन कर्तृशरीरविशेषणानामेव प्रापणार्थमेवं भूतवचनं॥ वचनादन्यत्॥ उक्तस्यान्यथाभावो यावन्मा
त्रस्य वचनं तावन्मात्रस्यैव तत्संबंधिनोन्यस्यापीति तेन होमादौ क्रियमाणे दक्षिणस्य पाणेरपाये विस
र्गो हृदयान्नापैनीतिसिद्धं प्रेषितो जपति॥२॥ नमः प्रवक्त्रे नमउपद्रष्ट्रे नमो गुरुभ्यश्चेकइदमनुवक्ष्यति स
इदमनुवक्ष्यति षणो वीरं हसत्रां तु योऽश्व पृथिवी चाहश्च रात्रिश्चापश्चोषधयश्च वाकृतमस्थितन यज्ञः
अन्वार्थस्य प्रेषस्याभावात्सामिधेन्यर्थं प्रेषितो होता २

या स्थान पु न ए॰म॰ ७

साधुच्छंदांसि यय येह मेवमाममुमिति स्वनामादिशेत भूते भविष्यति जाते जनिष्यमाणा आभजाम्यपाम्वाचो
अग्नांतिं वहेत्संगुल्यग्राण्य वकृष्य जातवेदो रमया पशुत्मयीति प्रतिसंदध्यादूर्ममे द्यावापृथिवी वर्माग्निर्वर्म
सूर्यो वर्म मे संतु निरष्ठिकाः। तदद्यवाचः प्रथमं मसीयेति॥ अत्रान्वार्थस्य प्रेषस्याभावात्सामिधेन्यर्थं प्रेषि
तो होता नमः प्रवक्त्र इत्यादि होत्रं जपध्वमित्यंतं जपेत्। सामिधेन्यर्थं प्रेषोत्तरवर्तित्वादयं जपः सामिधेन्यर्थो
भवति। अत्रामुमिति शाखस्थाने द्वितीयया विभक्त्यास्व मे नीमोत्वे निर्दिशेत्। स्वग्रहणात्प्रतिनिषिद्धेन प्रवृत्त
स्या पिजपकर्तुरेव नाम निर्देष्टव्यं। न होतुरिति लभ्यते। अग्नांतिं वहेति जपैकदेशमुच्चारयन्नंगुल्यग्राण्य
वकर्षेत्। मयीति वो च्चारयन्प्रतिसंदध्यात्। तेनावकर्षसंधाने जपांगं न तु कर्वतो विधानात्। समाप्य।
सामिधेनीरन्वाह। समाप्येत्यनेन नमः प्रवक्त्र इत्यादेर्होत्रं जपध्वमित्यंतस्यैकजपत्वं दर्शयति तेनांतरा
यत्का यद्भूयमवकर्षणं संधानं च तज्जपकर्तुः संस्कार एव भवतीति न कार्यांतरं। अतः पिन्नायाज्जपलोपेन क
र्तव्यं भवति। अग्नेः समिंधनार्था ऋचः सामिधेन्यस्ता अन्वाह। अनुब्रूयादित्यर्थः। हुंइति हिंकृत्य भूर्भुवः स्व

या

अ० सू० वृ०
१

यर्म्येऽत ममापद्यते मकारः॥समिध्यसोमं मर्जयंतेति निदर्शनं॥अंतस्थास्थानां नामनु नासिकां॥रेफस्यानुनासिक
त्वासंभवाद्यवलाएवांतस्था॥एस्वंतेनामुयायापरां नस्थानां नामनुनासिकां मकारआपद्यते।तत्रानुनासिकाःपूर्वा
उत्तरस्युदाएवमत्रसंयोगः॥विद्यथानिप्रचोदयों वाजीवाजेष्विति निदर्शनं॥रेफोष्मस्वनुस्वारं॥एतेषु मकारोनुस्वा
रमापद्यते॥अनुस्वारो नाम नासिकास्थानोस्पृष्टकरणश्च॥यस्य यज्ञस्य सुक्रतोंसमिध्यमानोअध्वरइत्यादि॥नि
ःप्रथमोत्तमे अन्वाहार्धर्चकारं॥अर्धर्चकारमध्यधिकृत्येत्यर्थ॥प्रथमोत्तमे ऋचौ त्रिरर्धर्चकारं ब्रूयात्॥अर्ध
र्धमुक्त्वावस्येदर्थर्चे॥प्रथमायामेवमर्धर्चकारं भवति।पूर्वामर्धमुक्त्वावसायततो द्वे ऋचौ ब्रूयात्।द्विरितिव
चनमर्धर्चचतुष्काभिप्रायं।पूर्वस्मिंस्तूच्छ्वासे प्रथमायामावृत्तौ द्वावर्धर्चौ द्वितीयायामेकैकश्चेति त्रयोर्धर्चा उक्ताः।अ
स्मिंस्तूच्छ्वासे द्वितीयतृतीययोरावृत्त्योस्त्रयोर्धर्चा उत्तरस्या ऋच एकोर्धर्च इत्येवं चत्वारोर्धर्चा वक्तव्या भवेयुः।अ
र्धर्चकारविधेरुत्तरयासंनिधानाविरोधादिति।अथशब्दोस्य सूत्रस्यान्यार्थत्वप्रतिभासनिवृत्त्यर्थः॥द्वे प्रथम
मुत्तमस्यामथार्धर्चा।पूर्वया संनिधानाविरोधादुत्तमायामेवं भवति।अथशब्दस्य पूर्ववत्॥ऋताःपंचदशाभ्य

कृ रामः
९

राधंतयो
= ना

स्ताभिः॥एकादशानामृचां द्वयोर्विरभ्यासे कृते ताअभ्यस्ताभिः सह पंचदश एव भवंतीत्यर्थः॥प्राप्तएवायमर्थः॥अस्य
वचनस्येदं प्रयोजनं सर्वत्राभ्यस्ताभिः सह विहितसंख्यापूरणं कर्तव्यं॥एतेन शस्त्रयाज्यानिगदानुवचनाभिष्टव
नसंस्तवनानि॥शंसत्यादिशब्दचोदितानि शस्त्रादीनि भवंति।एतेनेति सामिधेन्यनुवचनमुच्यते।शस्त्रादीति च तत्र
तत्र विहितानि तेषां धर्मापेक्षास्ति।तत्रैते नतानीत्यके।एतद्धर्मकाणि तानीति गम्यते।अनेन प्रकारेण तेषां सा
मिधेनिधर्मातिदेश उक्तो भवति।सर्वधर्मप्राप्तौ कतिपयधर्मनिषेधार्थमाह॥नत्वन्यत्रार्धर्चकारं नजपः प्रागभि
हिंकारान्नाभिहिंकाराभ्यासावबहुषु प्रकृत्या॥अन्यत्रेत्येतावदनुवर्तते तस्य सामिधेनीभ्योन्यत्रेत्ययमर्थः॥अतःपि
त्र्यायांअभिहिंकारः सिद्धो भवति।अभ्यासनिवृत्त्यर्थं तत्रैव ताग्रहणं करिष्यति तेनाभ्यासो न भवति।प्रकृत्येति शा
स्त्रेभ्यासेन बहुत्वपि पुरीष्यासो अग्न इत्येवमादिषु तयोरभावं दर्शयति॥नावच्छेदादेः॥अवच्छेदो नाम यत्र श
स्त्रादिषु मध्ये समाप्यावस्येदित्येवमादिभिः शब्दैरवसानं विहितं समाप्य प्रणवेनेत्येवमादिषु सोवच्छेदः।तत्रापि नोन
स॥शस्त्रेष्वेव होत्रकाणामभिहिंकारः॥अस्मिंच्छास्त्रे मुख्यवर्जिताद्वादश ऋत्विजो होत्रकाइत्युच्यंते।न सप्तवात्रयो

(8)

वातेनग्नावस्तुतो मिहिंकारनिषेधः सिध्यति॥सामिधेनीनामुत्तमेनप्रणवेनाग्ने महाँ असिब्राह्मणभारतेतिनिगदेव।
साय॥२॥यजमानस्यार्षेयान्प्रवृणीतेयावन्तस्युः॥प्रणवेननिगदंसंधायनिगदेवस्येदित्यर्थः॥तत्रावसायार्षेया
न्प्रवृणीतेयावंतोयजमानस्यतेभवंतितेचप्रवराम्नायेव्याख्याताः॥परंपरंप्रथमं॥अस्यमआर्षेयाइत्यनाअयंप
रअयमपरइत्येवमादिस्मृत्यनुसारेणप्रवराम्नायएववरणप्रकारःपठितःसएवेमिंरामीमियंनोवरीनव्याइत्यंव
रीनव्याइतिविधानंअन्यक्षेत्रजातन्यामुष्यायणार्थं।पौरोहित्याद्राजविशां॥पुरोहितस्यार्षेयास्तानेवराजन्य
वैश्ययोःप्रवृणीते।बहुवचनंत्रैवर्णिकस्त्रीजातानांअनुलोमानांसंग्रहार्थं।राजर्षीणांराज्ञां।मानवेलपौ
रूरवसेत्येवंवापौरोहित्यान्वा॥सर्वेषांमानवेतिसंशये।अज्ञातेसंशयेवत्रयाणांवर्णानांमानवेत्ययंशब्दःप्र
वरोभवेत्।देवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितःकविशस्तोब्रह्मसंशितोघृताहवनःप्रणीर्यज्ञानांरथीरध्वरा
णामतूर्तोहोतातूर्णिर्हव्यवाडित्यवसायास्यांचंजुहूर्देवानांचमसोदेवपानोरादुवाग्नेनेमिर्देवांस्त्वंपरिभूरस्याव
हदेवान्यजमानायेतिप्रतिपद्देवताद्वितीययाविभक्त्यादेशमादेशमावहेत्यावाहयत्यादिंत्सुवयन्।निगदेव

त्यादिःसुयज्ञायउ
पि
सायेतिनिगदइतिसप्तमीनिर्देशात्।पूर्वापरीभूतोनिगदोनैदीनपरिसमाप्तइतिगम्यते।अतःप्रवरांतस्येवशेषः।क्वचि
न्मंत्राम्नायेभारतशब्दानंतरमत्रावसानमितिप्रवरप्रकृतेःपठितत्वाच्चसंबुद्धिसामानाधिकरण्याच्च।देवेद्धइतिनिविस्त
दनिगदश्चतुर्दशनिविस्त्यदानिपरिभूरसीत्येवमंतानि।आवहदेवान्यजमानायेजेत्यंतआवाहननिगदःसामिधेन्या
दयाएतेमंत्राआहवनीयाभिधायिनः॥तत्रभारतेत्यवस्येत्प्रवरांतेच।निविस्त्यदानामेकादशेवाचतुर्दशेनावाहनंनि
गदंसंधाययजमानायेत्यवस्येत्प्रतिपद्यावसायेत्यध्याहारात्।प्रतिपद्येतिवचनमस्यवाक्यस्यप्रतिपत्तिसंज्ञा
करणार्थं।तेनपिस्थायांप्रतिपत्त्यंतरविधानएतत्रभवति।तत्रस्थितोदेवतावक्ष्यमाणाद्वितीययाविभक्त्यादि।
श्यानंतरमावहेत्यावाहयति।आवहइत्यादिंत्सावयन्।द्वितीययाविधानंसर्वार्थंअत्रपाठदेवद्वितीययासिद्ध
तितेनदेवतामादिस्यप्रणवाद्यजेत्येसत्रद्वितीयैवभवति।विभक्त्यंतरविधानेतुतदेवभवति।आवहदेवान्।
होत्रायावह।आवहजातवेदइत्येतेषुकृतावसानेनस्तः॥अग्नआवहेतितुप्रथमदेवता।प्रथमदेवतायामयंविशे
षः।तुशब्देनयष्टव्यदेवतावाहनशब्दयोर्मध्येग्नेशब्दंब्रूयात्॥अग्निंसोममित्याज्यभागौ॥यागयोरित्यमाख्यातत्से

आ॰सू॰दी॰
११

वंधादेवतयोरपीति। अग्निमग्नीषोमाविति पौर्णमास्यां। विशेषाभावात्सोमयाजिनो असोमयाजिनश्च प्रधानदेवते
॥अग्नीषोमयोस्स्थाने इंद्राग्नी अमावास्यायामसंनयतः॥ पौर्णमास्याः प्रथमाम्नानात्सैव प्रथमं मे यो ज्या॥ स्थानशब्दः प्र
पौर्णमास्याधर्माणां प्रथमसंबंधं दर्शयति। प्राप्तावविशेषेपि प्रयोगावस्थायां विशेषग्रहणादिति। तेन बोधितं भव
ति। असमाम्नातानां असति चोदनोलिंगविशेषे पौर्णमासमेव तंत्रमिति। दधिपयोभ्यां यागं कुर्वस्सन्नयंतित्युच्य
ते। यो संनयति तस्यैंद्राग्नी द्वितीया॥ इंद्रं महेंद्रं वा संनयतः॥ संनयतो मावास्यायामिंद्रं महेंद्रं वा अग्नीषोमस्था
ने आवाहयेत्। अंतरेण हविषी विष्णुमुपांश्वैतरेयिणः। ऐतरेयिणः। ऐतरेयिणः शाखाविशेषाध्यायिनः। ते ए
व उपांशुयाजं। उभयोरपि पर्वणोः अंतरा हविषी इच्छंति॥ अग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्यायामेके। ते रामं॰
केकं च न॥ उभयोरपि पर्वणोः कंचन उपांशुयाजं एके नेच्छंति। अन्येषामप्युपांशुत्वमावहत्वाहाप्यादृष्टिप्रियाधामानी ११
दं हविर्महो ज्यायद्रक्षचै॥ अन्येषामपीति पित्रादीनां मंत्रोपांशुत्वं संग्रहार्थं। आवाहनादिषु चतुर्षु निगदेषु याम्
पांशुयाजसंबंधी निषद्परान्यावाहनादीनि तेषामुच्चैरिति संज्ञामात्रं विधीयते। तं च स्वैरस्वरास्त्पुपांशोरुच्चानीत्यनेन

सर्वेषामुच्चसंज्ञानां तंत्रस्वरो विधीयते। येष्वेन्तद्वचनाः परोक्षास्तानुपांशूच्चैर्वा॥ येष्विति सर्वनाम्नः संनिहितविष
यत्वात्तेष्वेव निगदेष्विति गम्यते। तद्वचनाउपांशुयाजवचनाः परोक्षास्तेषां पदांतरसंनिधानादेव विशेषनिष्टतावसी
यते। तस्वतः। अजुषतादयः क्रियावचनाः इत्यर्थः। तेषामुपांशुत्व प्राप्तमनूद्य तौ उच्चैः संज्ञौ विधीयते॥ प्रत्यक्षमु विकल्पेन
पांशु॥ यागं प्रति चोदितं देवतानामधेयं प्रत्यक्षमित्युच्यते। तस्य प्राप्तमुपांशुत्वं नियमार्थं विधीयते। तस्य चोपां
प्राथम्येपि शुत्वं भवेत्। उपांशुदेवतार्थः प्रथमदेवतासंबंधियो निगदः आवाहनस्त्विश्वरुन्निगदस्योनैतस्यापीति। अत्र किं
चिदुच्यते। उपांशुयष्टव्यमिति वचनादुपांशुत्व यागधर्मतयावगम्यमानं तत्रासंभवादनर्थकमंतरंगत्याचेन तत्संबं
धिनः शब्दानुपरिगृह्णतिष्ठति। तत्रावहादीनां आगुरादीनां च होतायक्षदित्यस्य चोपांशुत्वं निवर्त्यं तंत्रस्वरो
नुज्ञातः। परोक्षाणामजुषतादीनां विकल्पेन तंत्रस्वरोनुज्ञातः। प्रत्यक्षस्य विष्णुर्देवयाज्यादीनां चोपांशुत्वनियमा
दन्यस्य सर्वस्य तंत्रस्वरेणा येयाज्यानुवाक्ययोरागूरादिभिः प्राणसंतानसंधानादुपांशुत्वमेवस्थितं॥ प्रतिचोद
नमाहतं॥ चोदनां प्रतिचोदनं। चोदना देवताचोदना या रसो देवताभ्यो रितास्ता वस्या वाहनानि भिंनानीत्यर्थः। प्रत्या

चोदनां प्रतीति

10

आश्व. ५. १२

ग्रहनमुक्तस निश्वासनपर्यंतं भेदसाधनं सर्वा आदिश्य सकृदेकप्रदानाः॥ यत्र बहुभिर्हविर्भिरेकया याज्यया बह्वीभ्यो देवताभ्यो युगपद्यागाः क्रियंते त एकप्रदाना यागाः तत्संबंधा देवता यथैकप्रदाः सकृदुच्यंते। सर्वा इति वचनं सर्वासां पृथगादेशार्थं। आदिश्य वचनं सर्वा आदिश्य अंते आवहशब्दप्रयोगार्थं॥ सकृद्वचनं अंते विसकृदेवैकश्मोन यावद्देवतमित्येवमर्थं। तथोत्तरेषु निगमेष्वेकामिव संस्कृयात्॥ एकामिवेति वचनं यथैवस्या देवतयाः पुरस्तात्स्वाहायाः शब्दो अजुषतादयश्चैकवचनेन तथैतास्वपि॥ समानां देवतां समानार्थां। निगमेष्वेकामिव संस्कृयादित्यत्रापि संबध्यते॥ विशेषाग्रहणात् प्रयोजनत्वात् संप्रदायाच्च। समानामित्येकशब्दामित्यर्थः (समानार्थं) समानार्थामित्येकप्रयोजनामित्यर्थः॥ अभ्यवहितां सकृत्निगमेषु॥ अभ्यवहितं न स्यात्याम न्यया देवतया निगमेषु सकृद्ब्रूयादेकवचनेनैव। ओ३ आवापिकासु देवां आज्यपां आवह॥ अग्निं होत्रायावह स्वं महिमानमावहावह जातवेदः सुयजा यजेत्यावात्यथा स्थितमूर्ध्वजानुरुपविश्योदग्वेदेर्मुख्य तृणानि भूमौ पादे शंकुर्यादिति निर्मात्रं स्यांतरिक्षान्मंछेत्ती इदमहमग्निना देवेन देवतयात्रिष्टुता स्तोमेन रथंतरेण साम्ना गायत्रेण छंदसाग्निष्टोमेन यज्ञेन

त्रिः

रामः १२

न

प्रयो

वषट्कारेण वज्रेणायो स्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति॥ आवापिका आवापिकी आवापोद्धारयोग्याः प्रधानदेवता इत्यर्थः। तासु कृता वाहनासु देवा नाज्यपा नाज्यैवाहयेत्। स्विष्टकृतं च। पातो नु नासि कल्पा भायंकार लोपायचा। होत्रापावहशब्दयोः स्विष्टकृदावाहन प्रयोगाय च। किं चापठितावाहनानांप्रधानदेवो नरेष्वपि निगमन सिद्धिर्लक्ष्यत इत्येवमर्थं। आज्यपाः प्रयाजानुयाजदेवताः॥ अग्निं होत्रायावह स्वं महिमानमावहेत्येतावत्स्विष्टकृदावाहनार्थं। आवह जातवेदः सुयजायजेत्यस्यावाहनं निगदस्ताय। सामिधेन्यर्थे यथा स्थितस्तथोर्ध्वजानुरुपविश्य उदङ्मुखस्य वेद्यां स्तीर्णानि तृणानि वेद्यां भूमौ पादे शंकुर्यादिति निर्मातेति मंत्रेण आश्रावयिष्यंतमनुमंत्रयेत। ओ३श्रावय यज्ञं देवेषु श्रावय मां मनुष्येषु कीर्त्यै यशसे ब्रह्मवर्चसायेति। प्रवृणानं देवसविनरेतं त्वा वृणतेऽग्निं होत्राय सह पित्रा वैश्वानरेण द्यावापृथिवीमां तामग्निर्होता हं मानुष इति॥ मानुषद्रत्य ध्वर्यो। श्रुतो दायुषासायुषा दोषधीनां रसेनो त्सर्जेन्यस्य धामभिरुदस्मममृतोऽअ नित्यत्तिष्ठेत्। अध्वर्युग्रहणमुत्तरार्थं। पष्टिश्चाध्वर्योर्नवतिश्च पाशा अग्निं होतारमंतराविवृताः सिनंतिपाकमतिधीरश्रीनीस्कस्याय। ब्रूयादिति शेषः॥ ना

११

आ० सू० वृ०

१३

पमुत्थानमंत्रः। पूर्वेणैव निरपेक्षत्वात्। अनर्दिष्टो मंत्रो मंत्रसंज्ञिकः। अतस्य पंथामन्वमिहोतेत्यभिक्रम्यांसे ध्वर्यु
मन्वारभेत पार्श्वस्थेन पाणिना॥ अध्वर्युग्रहणेन प्रयोजनमभिक्रमणान्वारंभणे अध्वर्योरेव कुर्यान्न प्रतिप्रस्था
तुरित्येतत्। अजत्रुबाह्वोः संधिरंसस्तस्मिन्देशे ध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना पार्श्वेन तिष्ठतीति पार्श्वस्थः
। कनिष्ठिकाप्रदेशेन स्थितः। नन्यकुतो ज्ञानमित्यर्थः। तेनान्वारभेताध्वर्युं॥ आग्नीध्रं करदेशेन सव्येन वा॥ स
व्येन पाणिना पार्श्वस्थेनांसएवां करदेशेन ऊरुणा वा॥ इदमन्वारभे होतृवूर्यं पुरोहितं येनायं तुतमस्वदेवा अं
गिरसो दिवमिति॥ उभयोः साधारणमंत्रः अतो नावर्तेत नोत्यते च॥ संमार्गतृणैस्त्रिरभ्यात्ममुखं संमृजी
त संमार्गोसि संमांप्रजया पशुभिर्मृडीति॥ दूधा संनहनात्विसंमार्गशब्देनोच्यते। अग्निसंमार्जनसाधनत्वा।
त्तेषां तैस्तृणैस्त्रिरभ्यात्मं मुखं संमृजीत। तृणैरिति वचनात्तूष्णींभूतैरेव तैः संमृजीतन्नर्थं यथिभूतैः। अभ्यात्ममा
त्माभिमुखं पाणितलमुखाग्रापवर्गं च संमार्जनमिति॥ सकृन्मंत्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ॥ सकृन्मं
त्रेण द्विस्तूष्णीमित्येतत्सर्वत्र भवत्येवंप्रकारस्य कर्मण आवृत्तौ सत्यामिति। एवंप्रकारग्रहणेन संस्कारकर्मत्वा।

१३

मुच्यते। एतदुक्तं भवति यत्र संस्कारकर्मणे त्रिणस्त्रिरावृत्तिर्विधीयते। तत्र सकृन्मंत्रेण द्विस्तूष्णीमिति। न प्रधान
कर्मणः। स्पृष्ट्वोदकं होतृषदनमभिमंत्रयेत्। अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योस्मत्पाकतर इति॥
होतृषदनमपरेण स्थित्वा प्राङ्मुखो भिमंत्रयते। उदकस्पर्शनं पूर्वांगं अग्निसंमार्जनतृणैरात्मनो मुखसंमार्ज
नात्। आत्मनो ष्यदोषत्वं तच्छास्त्रसमर्थत्वेनास्य दृष्टार्थत्वं संभवति॥ अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्
दक्षिणा निरस्येन्निरस्तः परावसुरिति। इदमहमर्वावसोः सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणापस्थेन॥ द
क्षिणं च तदुत्तरं च दक्षिणोत्तरं दक्षिणोत्तरं (तत्) नह्यनुपस्थो दक्षिणोत्तरीतेनोपविशेत्। एतेनिरसनोपवेशने सर्वा
सनेषु सर्वेषामहरहः प्रथमोपवेशनेपि समाने। एतद् त्रिप्रकारमंत्रविशिष्टयोर्ग्रहणार्थं। तेन सर्वेषां सर्वास
नेषु प्रथमोपवेशने भवतः। न द्वितीयादिप्रयोगइत्येकोर्थः। समानेप्यासने अहर्गणेष्वहरहः प्रथमोपवेशने भ
वतः। अयमपरोर्थः। समानेपि स्थाने प्रयोगावृत्तौ पुनः पुनरावर्तेत प्रवर्ग्यादिषु यथा परोपिशब्दाहुच्यते। अ
स्यापि पदैर्दर्शपूर्णमासप्रकरणे पठितत्वात् तदनिर्दिष्टेष्वपि पशुसोमेषु भवतो नाग्निहोत्रादिष्विति। अंकधारणं

च

(10)

भसेव वेवा द्विरिति गौतमः॥ अस्याचार्यस्य द्विः द्वितीये पि प्रयोगे भवतीत्यभिप्रायः॥३॥ ब्रह्मौदने प्राशिष्यमाणे अग्न्याधेये ब्रह्मा। द्विरित्यनुवर्तते। किं यथा नास्य कर्मणः दक्षिणत उपविष्टः सन् पुनः प्राशनकाले द्वितीये निरसनोपवेशने कुर्यात्। अग्न्याधेये ब्रह्मौदने द्वितीयविधानसामर्थ्यात्। एवं इष्टिपशुसोमेभ्यो ऽन्यत्रापि ब्रह्मणो निरसनोपवेशनप्राप्तिरिति गम्यते। अग्न्याधेयग्रहणमश्वमेधे ब्रह्मौदने तत्रैव कर्तव्यमिति॥ बहिष्पवमानात्सर्पसोमे॥ आहवनीयस्य दक्षिणत उपविष्टः सन् बहिष्पवमानं गत्वा ततः प्रत्येत्य पूर्वासने पुनः कुर्याच्च। सोमग्रहणं सर्वेषु सोमेषु प्रापणार्थं इतरथा धानाधिकारात् तत्संबंध एव सोमे स्यात् न सर्वसोमेष्विति॥ प्रसृप्ते होता यथार्थमुपविष्ट एवासने सदःप्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्। होतृग्रहणं ब्रह्माधिकारनिवृत्त्यर्थं। स्रुगादापनेप्सौ॥ स्वाहाकृत्यर्थे स्रुगादापने पुनः कुर्यात्॥ न पत्नीसंयाजिके॥ पत्नीसंयाजार्थमुपवेशने नैव कुर्यात्। नास्य होतुरिति कोत्सः॥ होतुरप्येषामेतेन भवतीति कौत्सो मन्यते॥ उपविश्य देव बर्हिः स्वासस्थं त्वाध्यासदेयमिति॥ उपविश्यासनं ब्रूयाद्वर्हिरित्यर्थः॥ अभिहिषहौपद्रवेति जानु शिरसा बर्हिरुपस्पृश्यानऊर्ध्वं जपेत्। जानु

तरं तः प्रतरां बर्हि

(margin: वेत)

शिरोमात्रस्पृश्य। अनऊर्ध्वं ग्रहणमुपस्पृशतो न जपस्यादिति नित्यं त्वेवं भूपेशहृसनि कुर्वन्नेव कुर्यादिति गम्यते। अरणीसंस्पृश्यमन्थयेदिंधु॥ भूपतये नमो भुवनपतये नमो भूतानां पतये नमो भूतये नमः। प्राणं प्रपद्ये पानं प्रपद्ये व्यानं प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये मनः स्यात् नमो महद्भ्यो नमो अर्भकेभ्यो विश्वेदेवाः शास्तन मा यथेह होताधिहोता निषदाय जीयांस्त्वदघवावः प्रथमं मशीयेति समाप्य यदीमद्ध्ये स्रुचावासादयेन्निगदेन॥ समाप्य यदीमद्ध्ये स्रुभयत्स्रुगादापनावसरे प्रदर्शनार्थं त्वाज्यं मसमापिरपि यदी मद्ध्ये वेति गम्यते। अनेन निगम्य देन दापयेदध्वर्युः। अग्निर्होता वेत्वग्ने होत्रं वेतु प्राविचं साधुते यजमानदेवतायो अग्निमिसवसाय होतारमरथा इति जपेत्॥ अवसाये तिवचनं निगदमध्ये उच्छ्वासलाभार्थं। स जपेदिति निगदमध्ये उपांशुत्वलाभाय॥ अथ समापयेत् घृतवतीमध्वर्योः स्रुचमास्यस्व देवयुवं विश्ववारे ईडामहे देवां ईडेन्यान्नमस्याम नमस्यान्यजाम यज्ञियानिति। अथेति वचनमन्त्रापुच्छासलाभार्थं समाप्तिवचनमग्निर्होतेत्यादेर्यज्ञियानित्यंतस्य मध्ये एकनिगदत्वसूचनार्थं॥ समाप्ते स्मिन्निगदे ध्वर्युराश्रावयति। अध्वर्युकर्मविधानं प्रत्याश्रावणस्य

(margin: त्वा वाचं जनये; रू)

आ.सू.वृ.
१५

र्थं निमित्तमिति ज्ञापनार्थं। समाप्तिवचनमाश्रावणे कृतेऽपि समाप्त एव निगदे प्रत्याश्रावणं कुर्यादित्येवमर्थं।
प्रत्याश्रावये द्वाम्नी ध्रुवकरस्येति एतस्य मिश्रसंनहनानीत्यारात्पदक्षिणामुखवृत्तिशाट्यायनके। शाट्या
यनग्रहणं विकल्पार्थं। अतः प्राङ्मुखत्वमपि लभ्यते॥ अस्कन्नौ षडि सौकारं प्लावयन्॥ कृतं कुर्वन्नित्यर्थ
॥४॥ प्रयाजेष्वृते॥ वक्ष्यमाणप्रैरेकादशयागाः प्रयाजादयः तेष्वृतं तेष्वृते नियजन्तीत्यर्थः। पंचैते भवंति। पं
चवचनं नराशंसस्तनूनपाद्वा मुख्यायणस्यापि पंचैव भवंति। न षडित्येवमर्थं। एतदुक्तिवचनं पठिता एवे
तेन तनूनपान्नराशंसयोरन्यतरेण सह पंच भवंति। नापठितेन सहेत्येवमर्थं॥ एकैकं प्रेषितो यजति॥ न सकृ
त्प्रेषितः सकृद्यजति॥ आग्नेय्यादिरनुयाजवर्जं॥ सर्वत्र सर्वासामनुयाजानां द्विवर्जितानां याज्यानामादावा
गूर्भवति। कोयमागूरित्याह। ये३ यजामहे इत्यागूर्वषट्कारौ सः सर्वत्र। अनुयाजानां भंपीति सर्वत्र वचनं

धिष्ण्यं

।उद्वे सत्राबलीयाज्यायाः अग्नी उद्वे सत्र स्तमेकयंमौ ति संशय। पात्नीवलीयस्त्वं अस्त्वे अनन्तरोच्चारणमेनदु
भयंथा याज्याया एवेति। तयोरादौ प्लावयेत्॥ तयोरागूर्वषट्कारयोरादौ प्लुतिः कार्या। याज्यांते च। प्लावयेदि

राम.
१५

द्वैवचनो

ति शेषः। विविच्य संध्यक्षराणामकारं न चेत्प्रगृह्यो मंत्रनांतो वा॥ न चेत्प्रगृह्य इति पठितमेन चैद्वैवचनं च ति प्रमा॥
द्। पाद॥ ऋगंते यानि अप्रगृह्याणि संध्यक्षराणि तानि विविच्याकारमेव प्लावयेदिति। एकारैकारयोः आइ
ति ओकारौकारयोः आउ इति। एवं विविच्य प्लुतिः कार्या। अप्रगृह्य मंत्रो विश्ववर्षणा इ वोउ षडित्यादिनिदर्शनं
।एकारस्य प्रगृह्यस्य स्वरूपेणैव प्लुतिः कार्या। ओकारस्य प्रगृह्यसंज्ञायाः अनित्यत्वात् नित्यानित्यसंयोगविरो
धात्तस्य सर्वदापि विविच्य प्लावनं कर्तव्यं। मंत्रांतानां संध्यक्षराणां सर्वदा स्वरूपेणैव प्लुतिः कार्या। न विवेक्त
व्यः। अधिश्रियं शुक्रमपिश्रि३ दधाने वौ३ षडिति दृष्टांतः॥ विसर्जनीयो नत्यक्षरोपधो रिफ्यते॥ आ नत्यक्षरोपधः
अनवर्णोपधः स च वषट्कारेण संधीयमानो रिफ्यते पिबा सोममभि यमुग्र तर्द इत्यादिनिदर्शनं। इतरस्त्वरेफी॥ इतरः अव
र्णोपधः स च रेफि संतत्त्व इति रिफ्यते महो यो वर्जमिन्द्र आयथा कमित्यत्र रेफिसंज्ञा विधीयते यथा। उत संचमसं नव
मित्यादि निदर्शनं। लुप्यते रेफी॥ अवर्णोपधो यो विसर्जनीयः रेफिसंज्ञश्च भवति। स लुप्यत एव वषट्कारसंहि
तौ। अर्वा३ इहि सोमकाममित्यादि निदर्शनं॥ प्रथमस्वतंत्रीयं॥ वर्गपांत्यो यः प्रथमः प्रथमः प्रथमस्वरूपं
सस

आ॰सू॰टी॰

१६

तीयमापद्धिनीयमापद्यते॥नित्यंमकारे॥अंतस्थासुतीनामिसत्येनेतोक्तोर्थः॥ये३यजामहेसमिधःसमिधोअग्न।
आज्यस्यव्यंतु३वौ३षळितिवषट्कारः॥वौषळितिवषट्कारइत्यर्थः॥इतिप्रथमः॥अयंप्रथमःप्रयाजइत्यर्थः॥
वागोजःसहओजोमयिप्राणापानावितिवषट्कारमुक्तोक्तानुमंत्रयते॥सर्वस्यायंविधिरस्यादित्येवमर्थावीप्सा
॥दिवाकीर्त्यंवषट्कारः॥वृथारात्रौनप्रयोक्तव्यइत्यर्थः॥किंववषट्कारेसंबंधियत्कर्मनद्विध्यंतएवविरोधेसति
द्विवेवकर्तव्यमितितथानुमंत्रणं॥दिवाकीर्तेत्वमित्यर्थः॥तच्चोक्तार्थमेव॥एतत्पात्मानिदर्शनं॥यदिदंयाज्यायाः
पुरस्तादागूर्त्त॥स्याक्ष्वादौयाज्यांतेनेवस्तुतिःस्यात्तउपरिष्टाच्चवषट्कारस्तस्यचादौस्तुतिस्तेनोनुमंत्रणंइत्येतत्
द्यात्मास्वरूपनिदर्शनं॥अनुमंत्रणस्यायाज्यांतर्गावचनंतदंतस्यथाग्यमनार्थातनूनपादग्नआज्यस्येवेतितिद्वि
तियोग्नत्रवसिष्ठशुनकात्रिवध्यश्वराजन्येभ्यः॥वसिष्ठादिभ्योन्येषामयंद्वितीयः॥नराशंसोअग्नआज्यस्यवेति
तितेषां॥वसिष्ठादीनामयंद्वितीयः॥इळोअग्नआज्यस्यव्यंत्विति॥तितृतीयः॥सर्वेषामितिशेषः॥बर्हिरग्नआ
ज्यस्यवेतिनिचतुर्थः॥आगूर्यपंचमेस्वाहाग्निंस्वाहामुमितियथावाहितमग्नइदेवतायथाचोदितमनावाहि

तास्वाहादेवाआज्यपाजुषाणाअग्नआज्यस्यव्यंत्विति॥पंचमेएवंकृत्वातेनैवयजेदितिशेषः॥आगुरोविधानंक्रमा
र्थं॥पतिदैवतंस्वाहाशब्दाभ्यासार्थवीप्सावचनं॥यथावाहितग्रहणंप्रमादादावाहितोअस्थानिमाअपिग्रहणा
र्थं॥अनाअपिग्रहणार्थं॥आनावाहितादृत्येनेनयथास्थानिर्मोपिदेवताःप्रमादादनावाहितास्तुत्वासामप्यत्र
यथाचोदितेक्रमेनिगमार्थं॥प्रयाजाघनूयाजांतेत्वादिषुयथाचोदितंनदियांतंदेवतानांनिगमार्थंचइदमेव
प्रकारहूयमनावाहितग्रहणाद्गृह्यते॥नान्यथा॥यथावाहितग्रहणेनपठितानावाहनानगृह्यंते॥तासांपाठादेवति
गमनंनान्यथेत्युक्तं॥स्वाहादेवाइतिशेषः॥यथासूत्रंमंत्रशेषः॥आतोमंत्रेणाइतःपूर्वंयत्नमंत्रेणप्रयोक्तव्यं॥अत्र
पूर्वावधेरभावादान्यत्रैनसूर्धमग्निर्मथनादियद्भवतितदपिमंत्रेणप्रयोक्तव्यमितिगम्यते॥त्रीणिवाचस्थाना
निमंद्रमध्यमोत्तमसंज्ञकानितैषुतेषुत्रसप्तसप्तयमाभवंति॥यमानामअवस्थाः॥तत्रप्रथमेनयमेनवषट्का
रःप्रयोक्तव्यः॥ततएकावरोहेणयाज्या॥एवंसर्वत्रैकैकयमावरोहेणयाज्यावषट्कारःप्रयोक्तव्य।इत्यर्थः॥
ऊर्ध्वंवशंपुवाकानां।मंद्रेणप्रयोक्तव्यं॥मध्यमेनहवींप्यास्विष्टकृतः॥सर्वत्राकारोभिविधावेवात्रत्वंभिविधेम

रामः

१६

या

ना

(15)

आ·सू·वृ·
१२

यौदायां वाभवत्यध्वर्युवशात् अत्र त्विष्टकृन्मध्यमेनोत्तमेन वाध्वर्युवशान् प्रयोक्तव्यं। प्रयाजेभ्य ऊर्ध्वमास्विष्ट
कृतो मध्यमेन प्रयोक्तव्यं। हविर्ग्रहणं रुद्धानांतरेपि प्रधानहविषां मध्यमस्वर एवेति। उत्तमेन शेषः। इडादिः
स्विष्टकृदादिर्वा शंयुवाकांतः शेष इत्युच्यते। स उत्तमेन प्रयोक्तव्य इत्यर्थः॥ अग्निर्वृत्राणि जंघनदिति पूर्वस्या
ज्यभागस्यानुवाक्या। त्वं सोमासि सत्पतिरिति उत्तरस्य। जुषाणो अग्निराज्यस्य वेत्विति पूर्वस्य याज्या। जुषाण
ः सोम आज्यस्य हविषो वेत्विति उत्तरस्य। तावानुपूर्व्यादेशं यजति॥ नाविताज्यभागसंप्रत्ययार्थौ। आनुपूर्व्येति
वचनं देवतादेशस्य क्रमविधानार्थं। यजतीति देवतादेशस्य याज्यासंधानार्थं। तावाज्यभागसंज्ञकौ यागा
वानुपूर्व्यानंतरं द्वितीयया विभक्त्या देवतामादिश्यादिश्य याज्यया संधाय यजतीत्यर्थः॥ सर्वाश्चानुवाक्यावत्यो

रम॰
१२

प्रैषा अन्या अन्वायासाम्युः। या अन्वायात इति शब्देनानुनिर्वापशब्देन वा चोदिता। ता अन्वायार्थ्याः॥ ताभ्यो अन्वा
यादेवता अनुवाक्यावत्यो प्रैषाश्च ताः सर्वा आदिश्य यष्टव्याः। अन्वायास्तानामनुवाक्यारहितानां संप्रैषाणां।
चादेशो न कर्तव्य इत्यर्थः। सर्वग्रहणमाज्यभागयोरपि संप्रैषयोरादेशनिवृत्त्यर्थं। सौमिकीभ्यश्च याअंतरेण

वैश्वानरीयं पत्नीसंयाजांश्च॥ सौमिक्यः सोमे उक्तं तानि सोमे प्रयोज्या अपि तत्रोत्संना नामेव तत्र भवत्वसं
भवात्। वैश्वानरीयपत्नीसंयाजानां तच्छब्दचोदितानामेव ग्रहणं युक्तं। अत एवैतस्मिन्नेवासने वैश्वान

स्व

रीयं जतिर् इत्येतदेव गृह्यते। पत्नीसंयाजेष्वरित्वावभृथं व्रजंतित एव पत्नीसंयाजा गृह्यंते। अन्याइत्य
नुवर्तते अंगप्रधानरूपे कर्मणि यो तौ वैश्वानरीयपत्नीसंयाजशब्दचोदितौ पदार्थौ तयोर्मध्ये या।
स्तत्रैवोत्संना देवतास्ताभ्योप्यन्यादेवता आदिश्य यष्टव्याः। (तेना आदिश्य यष्टव्याः) तता आदिश्य यष्टव्या
इत्यर्थः॥ एतौ वार्त्रघ्नौ पौर्णमास्यां। यावेतौ पौर्णमास्यामाज्यभागौ तौ वार्त्रघ्नसंज्ञौ भवत इत्यर्थः॥ सनि
मित्तेयं संज्ञेत्याह। अनुवाक्यालिंगविशेषान्नामधेयाम् तेन तो विचारः। अनुवाक्यात एव विचारावग
मोऽप्यत्वमित्यर्थः॥ नित्ये याज्ये के उ एवैते सर्वत्र याज्ये नानुवाक्यावदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंताव
मावास्यायां। अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयमिति। आतौ वाग्यमनं। आदित आरभ्याज्यभाग
पर्यंतं वाग्यमनं भवति। अंतरेण याज्यानुवाक्ये निगदानुवचनाभिष्टवनशस्त्रजपानां चारभ्यासमाप्तेः॥

= संस्रवनन्नास्त्रेत्रिसंस्रवन १

आ०सू०सू०
१८
ध

अत्राभिष्टवनं शब्दः पठितव्यः । आरभ्येति वचनमन्यदर्थियित्या ज्यादिभ्यस्तदारभ्यासमाप्तेर्वाग्यमनसि ।
ध्यर्थं होतुरधिकारान्तकर्तृत्वं नरस्यापि प्रापणार्थम् ॥ अन्यद्यज्ञस्य साधनात् । यज्ञसाधनवचसोऽन्यत्र वाग्यमनं
नियम्यते । यज्ञसाधनं चो नाम यज्ञसंपादनार्थं न द्वेषपरिहारार्थं च । आपयानो देवा अवंतु न इति जपेत् ॥ आ
पयेति नियममतिक्रम्येत्यर्थः ॥ अपि वा यां वैश्वदेवी । अस्यामपीति वचनं पूर्वोक्ताया अपि वैश्वदेवी । अस्याम
पीति वचनं पूर्वोक्ताया अपि वैश्वदेव्यां विकल्पप्रतिपत्त्यर्थम् ॥ ५ ॥ उक्तदेवतास्तासां याज्यानुवाक्याः अग्निर्मूर्धा भुवो
यज्ञस्यायमग्निः सहस्रिण इति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतामग्नीषोमा सवेदसा युवमेतानि
दिवि रोचनान्यग्नी इन्द्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमान इंद्रं सानसिं रयिं प्रससाहिषे पुरुहूत शत्रून्
हार्द्रं इन्द्राय ओजसा भुवस्त्वमिंद्र ब्रह्मणा महानिति य अग्नीषोमीयं पांसुयाजो अग्नीषोमा यो अद्य वां मान्यं
दिवो मानरिश्वा जभारेति । उक्तसंकीर्तनं देवताविधिक्रमस्मरणार्थम् । तासां याज्यानुवाक्यं वक्ष्यमाणलिंग
क्रमाभ्यां योजनीया । इत्यमपि उक्तसंकीर्तनस्य प्रयोजनं । यत्र देवताविहिता देवताविहायदेवतानंतरम् ।
धी

ग्राम०
१८

चो विधीयंते । तत्र तासां देवतानां ता एव याज्यानुवाक्या इति सार्वत्रिकोऽयं विधिरिति तज्ञापयितुम् । अयमग्नि ।
रिति गायत्र्यपि याज्यानंतरमुक्त्वा यौज्यैव भवति । सा तु गायत्री सामान्यावाधान एव भवति । यदग्नीषोमी
य इति त्रिष्टुभ्यां नेपठन् असंशयार्थमुक्तवानाचार्यः । अथ स्विष्टकृतः पि प्राहि रेवांऽशि न्तोयं विधेस्तनुवा
क्या ॥ अथ शब्दः प्रधानानंतरं स्विष्टकृतो यागस्यानावाहनक्रमेणेति । अनुवाक्यावचनं सर्वत्र पूर्वमनुवा
क्यापश्चाद्याज्येति दर्शनार्थम् । ये ३ यजामहे ऽग्निं स्विष्टकृतमयाडग्निरग्नेः स्विष्टकृता षष्ठ्या विभक्त्या देवता
मादिश्य प्रिया धामान्ययाडिति पसंतनुयात् ॥ आगूर्विधानं निगदादावेवस्यान्न ऋगादाविति ॥ अग्निं स्वि
ष्टकृतमिति वचनं अग्निं होत्राय शब्देनादेशो न स्यादिति । षष्ठीविधानं द्वितीयायां निवृत्त्यर्थम् । देवतामादि
श्य प्रियाधामानि शब्दमुपसंतनुयात् । अथाद्यशब्दः पूर्वे पठितएवोत्तरेण सूत्रेण तस्यास्तस्या देवता
याः पुरस्तादतिदेशो निरूपेपाविधीयते । देवताया उपरिष्टाद्विधीयमानेन प्रियाधामानि शब्देन संधाना
र्थं । प्रियाधामान्ययाडिति संतनं पठितं । अतः प्रतिदेवतमेक एवायाडितिशब्दः प्रयोक्तव्यो न द्वितीय इति ।

आ॰ सू॰ वृ॰

१९

स्थितं। एवमुत्तरा अपि। अत्र आधारशब्देन देवतासंपुरस्तात्। उत्तरा सामर्थ्यं विशेषः। अयाट् शब्दे एवता संपुरस्ता
स्त्रयोज्योनाग्निशब्दोपीन् एतदुक्तं भवति। प्रथमदेवतायाः पुरस्तात् द्याष्ठ अग्निशब्द उत्तरा सामयाट् शब्द ए
वासर्वासामुपरिष्टात् प्रिया धामानि शब्दाः सर्वेवसंतताव्रक्त्या इति। आज्यपात मनुक्रम्य देवानामाज्यपा
नां प्रिया धामा नियक्षदग्ने होतुः प्रिया धामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा
जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्य होतुरित्यनवानं यजति॥ आज्यपात मिति प्रसिद्धक्रमसं
ग्रहाद्दावान्नाक्रमो नापि परिगृह्यते। तेन अस्थानि न्यायेन निगमनमिहापि स्यात्। आज्यपातमेव मुक्त्वा
तदनंतरेण प्रिया धामानि शब्देन यक्षदिति संधाय यथासूत्रमुक्ता तं जुषतां हविरग्ने यदद्येत्यृचौ नुद्रुत्यासः
कर्तव्यो स्यां याज्यायां। प्रकृतावा। अर्धर्चेवो घसेत्॥ ६॥ प्रदेशिन्याः पर्वणी उत्तमे अंजयित्वोष्ठयोर
न्यात्संनिमार्ष्टि। प्रदेशिनी नामांगुलिविशेषः। पर्वणी संधी। उत्तमे उत्तमतो द्वे पर्वणी इत्यर्थः। अध्व
र्युणा तेप पर्वणी अंजयित्वा अन्यात्सपाणितलं कृत्वा ओष्ठयोरपवर्गं निमार्ष्टि॥ वाचस्पतिनानेन हुतस्ये

याग

मे प्राणायप्राश्नामीत्युत्तरमुत्तरेमनसस्पतिनानेन हुतस्योर्जेपानायप्राश्नामीत्यधरमधरे॥ अनेनैकस्मिं
न्नित्यनयोरित्यर्थः। स्पष्टोरकमंजलिने ळांप्रतिगृह्य सव्ये पाणौ कृत्वा पश्चादस्यात्तदंगुलिं पाणिमुप
धायावांतरेळामवदापयीत॥ द्विहस्तयोगों जलिः सैतं कृत्वा तेन इळां गृहीत्वा सव्ये पाणौ कृत्वा निधाये
त्यर्थः। अस्या इतीळाया इत्यर्थः। या हस्ते वदीयते सावांतरेळा। अवदापयीताध्वर्युः। अंतरेणांगुष्ठमंगुली॥
श्च स्वयं द्वितीयमाददीत॥ अंगुल्यंगुष्ठयोर्मध्येन प्रदेशेन स्वयमिळाया अवांतरेळामाददीत॥ प्रसा
लब्धामंगुष्ठेनाभिसंसृज्य प्रस्तात्तसा। प्रसालब्धां स्पष्टमध्वर्युणा चैत्यर्थः॥ अंगुलीरमुष्टिं कृत्वा दक्षि
णतइळां परिगृह्यास्यसंमितामुपह्वयते प्राणसंमितां वा॥ अमुष्टिं कृत्वा। अंगुलीभ्यो बहिरंगुष्ठम।
कृत्वेत्यर्थः। सव्ये हस्ते निहिताम् इळां दक्षिणेन हस्तेन गृहीत्वा वांतरेळां दक्षिणेन हस्तेन गृहीत्वा वांत
रेळां दक्षिणतः परिगृह्य आस्यसंमितां इळां कृत्वा तामुपह्वयते। प्राणसंमितां नासिकासंमितामित्यर्थः
इळोपहूता सह दिवा बृहता दिसेनोपास्माइळा ह्वयतां सह दिवा बृहता दिव्येनेळोपहूता सहांतरिक्षे

प्राणसंमितां वे

उद्धृत्य अतस्तेस
वैत्रा

एम॰

१९

गं

आ.श्रौ.सू.
२०

नवामदेव्येन वाक्यनोपास्मां इडाह्वयतां सहांतरिक्षेण वामदेव्येन वायुनेडोपहूता सह पृथिव्या रथंतरेणा
ग्निनोपास्मां इडाह्वयतां सह पृथिव्या रथंतरेणाग्निनोपहूता गावः सहाशिर उपमां गावः सहाशिरा
ह्वयंतामुपहूता धेनुः सहऋषभोपमां धेनुः सहऋषभाह्वयतामुपहूता गोर्घृतपद्युपमां गोर्घृतपदीह्व
यतामुपहूता दिव्याः सप्तहोतार उपमां दिव्याः सप्तहोतारो ह्वयंतामुपहूतः सखा भक्ष उपमां सखा भक्षो
केह्वयतामुपहूते ब्रह्मपित्रुपमामिडा हृष्टिर्ह्वयतामित्यपांप्रयोज्ये ॥ इडोपहूतोपहूते ब्रह्मोपास्मां इ
डोह्वयतामिडोपहूता ॥ मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतं दैव्या अध्वर्यव उपहूता
उपहूता मनुष्याः ॥ य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपु
त्रे उपहूतोऽयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इदं मे देवा हविर्जुषंतामि

सहरिवे २ — ति तस्मिन्नुपहूत इति ॥ इडोपहूतेत्यादिना तस्मिन्नुपहूत इत्यंतेनोपांश्विसनेन निगदानां तत्र स्वरता — राम०

द्रस्य पमुपांशुत्वं विधीयते। तेनेकस्त्यमनुपरतमेवेति स्थितं। अथोच्चैरिसनेनोत्तरस्य निगदस्य भा — २०

नोपक्रमते ६२

न
गस्यतं च स्वरानपगमः कथ्यते। प्राप्तत्वांनापूर्वं विधीयते। अतः तस्मिन्नुच्यमाने संशयः स्यात् निगदमध्ये उ
पांशुत्वमुच्यमानं किं सर्वस्य निगदस्य। आहोस्वित्पूर्वस्य भागस्यापरस्य वेति। अस्मिंस्तूच्यमाने पूर्वस्यैव
भागस्योपांशुत्वं विहितं भवति नोत्तरस्य भवतीति नात्र संशयः ॥ इडोपहूता मनुष्याः ॥ देवपुत्रा इति त्री।
ण्यवसानानि ॥ उपहूयावांतरेडां प्राश्नीयादिडे भागं जुषस्व नः पिन्व गा जिन्वार्वतो रायस्पोषस्येशिषे त
स्य नो रास्व तस्य नो दास्व तस्यास्ते भागमशीमहि ॥ सर्वात्मानः सर्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरु
षा इति वा ॥ उपहूयेत्यनूच्यमाने हविर्जुषंतामिति निगदांतस्यात्। तस्मिन्नुपहूत इत्यवांतरेडाभक्षण
मंत्रः स्यादिडे भागमिति चानयोर्विकल्पार्थो वा शब्दः ॥ सर्वपुरुषा इत्यपरः ह्वयं विशिष्यमंत्र इत्येते दोषा — ति
स्युः। एतस्मिंस्तूच्यमाने तस्मिन्नुपहूत इत्येवमंतो निगदः स्यात्। पूर्व इति शब्दो निगदैकदेशः स्यात्। वा
शब्दश्च मंत्रावयवविकल्पार्थ एव स्यात्। सर्वपूरुषा इत्यंत इति शब्दो नेतावानेव च मंत्रः स्यात्। इत्येवं सर्वं
सर्वं समंजसं भवति। होतावांतरेडां भक्षयिता इडामपि भक्षयेत्। सर्वे च यजमाना इडां भक्षयेयुः
स

आ॰ सू॰ वृ॰

२१

द्भुकासर्वेषांइतिपशुविभागेदर्शनात्।शास्त्रांतरेचयजमानपंचमाइडांभक्षयेयुरितिदर्शनाच्च॥७॥मा
र्जयित्वानुयाजैश्चरंति।मार्जनमिडाभक्षणांगंपित्र्यायामिडाभक्षणाभावेमार्जनस्याप्यभावदर्श
नात्।भक्षयितुर्मार्जनेदृष्टश्चोपकारोस्तिशुद्धिर्नाम।अनुद्धानकर्मस्वपिमार्जनमस्त्येवेतदनुयाजां व
गंचतुर्धाकरणदक्षिणादानाभ्यांव्यवहितत्वात् पित्र्यायामनूयाजसत्त्वेयामपितदभावदर्शनाच्चेति।अ
तोमार्जयित्वानुयाजैश्चरंतीतिवचनंचतुर्धाकरणदक्षिणादानैरनित्यत्वसूचनार्थंतथात्पनाग्नेयेपुच यो
तुर्धाकरणंनास्ति।अंगभूतेषुचदक्षिणादानंनास्ति॥परिस्तरणेरंजलिमंतर्धायापआसेचयतेत
न्मार्जनं॥आहवनीयपरीस्तरणेः।भक्षणार्थंनिष्क्रम्यपुनःप्रविष्टानांप्रथमप्राप्तत्वात्तेषामासेचयतेपः
।अर्थात्सहकारिणा।देवादयोनुयांनुयाजाः।देवादयोदेवशब्दाद्यर्थः।पुनरनुयाजग्रहणंउत्तरत्र दय रामं॰
नुयाजा त्रस्यप्रयाजार्थत्वाय॥वीतवसदंताः।वीतवसदंतत्वंप्रयाजानुयाजयोर्गुणःस्यात्॥त्रयः।तेनुयाजा।
स्त्रयोभवंति।एकैकं।प्रेषितोयजति।देवाग्नजेतिप्रैषस्यसर्वार्थत्वेसत्यपिपुनःप्रेषितेएवयजेत।द्भुमे २१

नुयाजाः।देवंबर्हिर्वसुवनेवसुधेयस्यवेतु।देवोनराशंसोवसुवनेवसुधेयस्यवेतु।देवोअग्निःस्विष्टकृत्सुद्रविणामं
द्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयान्देवानयाड्यांअपिप्रेषेयेनहोत्रेअमत्सततांसस
मं नुंषीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमंस्विष्टकृच्चाग्नेहोताभूर्वसुधेयस्यनमोवाकेवीहीति।अनवा वनेरसु
नंवा।अमत्सतेसत्रावसायथा।अनवसायवाजेत्॥८॥सूक्तवाकायसंप्रेषितइदंद्यावापृथिवीभ
द्रमभूदाधर्मसूक्तवाकमुततनमोवाकमृध्यास्मसूक्तोच्यमग्नेत्वंसूक्तवागसि।उपश्रुती द्विवस्पृथिव्यो
रोमन्वतीतेस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां।शंगयीजीरदानूअत्रस्नूअप्रवेदेउरुगव्यूतीअ
भयंकृतौवृष्टिद्यावीरीत्यापाशंभुवौमयोभुवाऊर्जस्वतीपयस्वतीसूपचरणावस्वधिचरणाचतयो
राविदीसवसायप्रथमयाविभक्त्यादिश्यदेवतानामिदंहविरजुषतावीवृधतमहोज्यायोकृतेस्रुपसंतनु
यान्॥आसि।स्तां।अभयंकृतौ।विदि।अकृतेतिवा।स्रक्तानामकृतेत्येवं।यजमानस्यनाममनी।मानु
षाः।इत्यवसानानिसर्वाणिनिगदे।अत्रतुप्रथमाविधानंद्वितीयानिवृत्त्यर्थं।आविदीसत्रावसायप्र

२०

आ॰ सू॰ वृ॰

२२

थमया विभक्त्या दिश्य देवतामिदं हविरित्येवमुपसंतनुयात्। एवमुत्तराः। उत्तरा अपि देवता आदिश्य इदं हविरित्येवमुपसंतनुयात्। अक्रान्तामक्रान्तेनेत्यर्थः॥ द्विदेवतबहुदेवतयोरेवमूहः कर्तव्यः यथार्थवचनं। अर्थवशेनाभिधानं इत्येवमर्थं उत्कर्षपांशोः। आवह स्वाहेत्युक्तमित्यर्थः। उक्तस्यैव वचनस्य निगदस्य

म

पश्चादपीष्टिवदेव प्रयोगार्थं। न सूक्तवाकमेष वद जुषताद्रीनां उपांशुत्वं विधीयते। आवापिकान्तमनुद्रुत्य देवा आज्यपा आज्यमजुषन्तावीवृधन्त महो ज्यायो क्रताग्निर्होत्रेणेदं हविरजुषतावीवृधत महो ज्यायोऽक्रत। अस्यामृधेद्धोत्रायां देवंगमायामाशास्ते यं यजमानोऽसावायुराशास्ते। अस्यामिति अस्या दिश्य नामनी उपांशु संनिधौ गुरोः। आयुराशास्ते सुप्रजास्त्वमाशास्ते सजातवनस्यामाशास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासन्तां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः इष्टं च वित्तं चोभे च नो

स्तं॰ ४

द्यावापृथिवी अंहसस्पातामिह गतिर्वामस्येदं नमो देवेभ्य इति॥ आवापिकान्तमित्येतदावापिकदेवताः

रा॰ म॰

२२

आवापिकान्तमित्यादि इदं नमो देवेभ्य इत्यन्तं

माप्यस्यर्थं। नेनास्था निम्न्या पि निगद्यते देवा आज्यपा इति यथासूत्रं। सैस असावसौ विसत्र यजमानना मनी प्रथमया विभक्त्या निर्देशात्। सा व्यवहारिकं नाम तत्र। होतुर्गुरुश्चैव यजमानस्यात्तत्संनिधौ उपांशु नामनी ब्रूयात्॥ १॥ शंयुवाकायसंप्रेषितस्तच्छंयोरावृणीमहे इत्याहानुवाक्यावत्प्रणवो। अनुवाक्यावद्वचनं मे कम्प्रसप्राप्तणार्थं। अप्रणवामिति प्रणवो निषिध्यते। वेदमस्मै प्रयच्छत्यध्वर्युः वेदग्रहणकालज्ञापनार्थमेनं सूत्रं। अतोऽध्वर्युणा दत्ते गृह्णीयात्॥ तं गृह्णीयाद्वेदोऽसि वेदोऽसि विदेयेति। तमिति विस्पष्टार्थं। यदा होता वेदं दद्यात् तदा तेन वेदं गृह्णीयादित्यर्थः। यदा होता युगपद्दद्यात्तदा हि तं मन्त्रं ब्रूयात्। वरुणप्रघासादिषु उदायुषेत्येतेनोपोत्थाय पश्चाद्गार्हपत्यस्योपविश्य सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमित्याज्येन यजन्ति। एतेनेति वचनं प्रकृतिविकारभावेऽपि तत्सर्वप्राप्तणार्थं। आज्यवचनं यत्राज्येन सोमस्तत्रैतेनेयाज्यानुवाक्ये भवतः। नाज्यहविष्के सोम इति। यजन्तीति वचनं यागएवासां देवतानां॥ निगमेष्वनुवृत्तिरिति। आप्यायस्व समेतु ते पर्यासि समु यन्तु वाजा इह त्वष्टारमग्नियं तन्नस्तुरीयमध पोषयित्नु देवानां पत्नीरुशतीरवन्तु न इति

ने

ण

मंत्रस्य

तेसं

अदत्तेऽपि स्वयमेव गृह्णीयात्

(२१)

तिप्रतीकेन गृहीतेपि स्वयमेव पठति। कुहूमहं सुष्टुतिं विमनाप
समस्मिन्यज्ञे सुहवां जोहवीमि।

इदं संज्ञाविधानार्थं।

आ॰सू॰वृ॰

२३

हूअग्निर्होता गृहपतिः स राजा हव्यवाडग्निरजरः पितानइति पत्नीसंयाजाः। अथ प्रजाकामोपक्षेप्योरा कांसि
नीवाली कुहूमिति प्राग्गृहपतेर्यजेत अथ शक्तः पक्षांतरपरिग्रहार्थः। अथवेद्यजमानः प्रजाकामस्यात
दैवे तादेवता यजेनीति। प्राग्गृहपतेरिति देशविधानेन पूर्वाभिः समुच्चयं दर्शयति द्वितीयपंक्तिशेषः प्रजा
काम हं सिनीवालिं कुहूमहमिति द्वे याज्यानुवाक्ये॥ याज्यानुवाक्याव चनं प्रजाकामेर्यजेत तस्मिन्नयजमा
नेसंनिहितेपि होतैव कर्तास्यां न यष्टास्यादिति। याज्यानुवाक्ययोर्होतृकर्तृत्वं अन्यतः प्रसिद्धमिति। कुहूमहा
मिं सा नो दाशानुः श्रवणापि तृणान्तस्ये तेदेव हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः
शृणोतु। संदाशुषे किरतु भूरिवामं रायस्पोषं यजमाने दधातु। सिसाज्यं पाणितलेवदाय पीतेळामुपहूय स
र्वा प्राश्नीयात्। पर्वीजनायुपहूतानां कार्यं नात्रेअवांतरेळा। पाणितलस्थमाज्यमिडेत्युच्यते। ततः सर्वां
प्राश्नीयादित्युच्यते॥ शंयुवाकोभवेन्नवा। आज्येळायाऽर्ध्वं शंयुवाकोभवति न भवति वेसध्वर्यूणां

ए॰म॰

संस्थाप्रकाराः संतीति तत्सूचनार्थमेतत्सूत्रं यदि स्याद्धोतापि तथा कुर्यादित्येषमर्थः॥ १०॥ वेदं पत्न्यैप्र

२३

पि

दायवाचयेद्धोताध्वर्युर्वा वेदोसि वित्तिरसि विदेय कर्मासि करणमसि क्रियासं सनिरसि सनितासि सनेयं
घृतवंतं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं। यं वह्वुत्पजीवंति यो जनानामसद्वशी। तं विदेय प्रजां विदेय

कामाय त्वेति। पत्न्यै वेदं प्रदाय तां वाचयति। होताध्वर्युर्वा। वेदोसीत्यादिकामाय त्वेत्येवमंतं यथासूत्रं। वाच
नमंत्रस्योच्चैः प्रयोगो अर्थात्सिध्यति। कार्यं नुलिंगजनितमेवेति। वेदशिरसा नाभिदेशमालभेत प्रजाकामा
चेत्। यदि पत्नी प्रजाकामा स्यादिति काम्यमेतत्तदा वेदस्य जानुसंहृत्याग्रदेशेन पत्नी स्वनाभिमालभेत। कामा
भावे पि वाचनं भवत्येव। अथास्यै योक्त्रं विचृतेत् त्वामुंचामि वरुणस्य पाशादिति। अथेतिसंबंधार्थः। यद्य
नंतरं योक्त्रविमोकः स्यात्तदेव वाचनमपि। अस्याइति योक्त्रविमोचनं होतृकर्तृकमिति दर्शयति। त
स्मात्कृताहूपत्साद्विगुणं पाकुपाशं निधायोपरिष्टात्स्योरगन्ताणि वेदतृणानि करोति॥ तद्योक्त्रं द्विगुणं कृ
त्वागार्हपत्यात्सकुप्राकुपाशं पाकुमूलाग्रप्रदेशमित्यर्थः। तं निदध्यात्। योक्त्रस्य मूलप्रदेशः पाशः पाशश
द्रोग्रमूलायन्नयोः प्रदर्शनार्थः। अस्य योक्त्रस्योपरिष्टात् वेदतृणान्युदगग्राणि निदध्यात्। पुरस्तात्सूर्णपा

(२२)

[illegible] यं नोऽयोक्त्रविमोके [illegible] त्वात्तं नमपीति

आ॰सू॰वृ॰
२४

त्रं संश्लिष्टं सं वेदतृणैः॥ तृणैरप्यः पुरस्तात्तृणैः संश्लिष्टं पूर्णपात्रं निदध्यात्। अभिमृश्य वाचयेत् पूर्णमसि पूर्णं मे
भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठा इति। अभि
मृश्य अभिमृशन्तीं वाचयेत् इत्यर्थः॥ तां चाभिमृशन्तीं वाचयेत्। प्रसगाशीष्ट्वं मंत्रस्य। अथैनां पूर्णपात्रात् निदिशमु
दकमुदुक्षन्तीं वाचयति प्राच्यां दिशि प्रदेवा ऋत्विजो मार्जयन्तां दक्षिणस्यां दिशि मासाः पितरो मार्जयन्तां प्र
तीच्यां दिशि गृहाः पशवो मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां यज्ञः संवत्स   यां दिशि
रः प्रजापतिर्मार्जयन्तां मार्जयन्तामिति वा॥ पूर्णपात्रादुदकं गृहीत्वान्नदुद्ध्वैः ऋक्षन्तां चैवं कुर्वतीं वाचयति। आ
त्रोदुक्षणं। अकुर्वत्या वाचने मंत्रलिंगस्य विरोधाभावादुक्षणमपि विधीयते। पूर्वत्र तन्मंत्रलिंगादेवाभि
मर्शनं अकुर्वत्या मंत्रोच्चारणं न संभवती। ति तानतस्या अभिमर्शनं विहितं। मार्जयन्तामिति वेति पर्दसात्र। द्वय
किकल्पः। अथास्याउत्तानमंजलिमधस्तात् योक्त्रस्य निधायालमनश्वसमं पूर्णपात्रं निनयन्वाचयेन्माहं   रामं
प्रजां पराशिंचं या नः सयावरी स्थन। समुद्रे वो निनयानि स्वं पाथो अपीथेति। योक्त्रस्याधस्तात् स्वंजलि   २४

मुत्तानं आत्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपात्रं निनयन् माहं प्रजामिति तां वाचयेत्। यथा तं निनी
यमानमुदकं हस्ते स्ववपतेन तथा निनयेत्। प्राङ्मुखत्वं मंत्रनाद्वियेत। अपस्तादंजलिविधानस्यांगृ
ष्ठार्थत्वप्रसंगात्। अत्र पत्नीहित वक्तुत्वे सर्वासां वाचनं कर्मैकत्वं। प्रतिपत्नियोक्त्रविमोचनमावर्तनो। स
र्वेषां योक्त्राणां द्विगुणीकृत्य निधानं भवति। निनयते सर्वासां सयोक्त्रसंध्ये कोदककलशमायो दुक्षणेपि
सर्वासाम न्यायः। वाचने वाच्य मंत्रलिंगजनितकार्याभावेपि वाच्यस्य पुरुषस्यैवायं संस्कार इत्यवगंतव्यं।
ये एते पत्नीसंबंधाः परार्थास्ते सर्वे परस्परसंबंधाः। अथ शब्दे तत्त्वेन वा मेन वा अतस्ते सर्वे सहैव कर्त
व्याः नैकैकशः॥ वेदतृणानि सम्येगृहीत्वा विधून्वन्संततं स्तृणन्नेन गार्हपत्यादाहवनीयमेतिं तं तुनत्वन्त्र
जसो भानुमन्विहीति विवरबंधस्य विमुक्तानां तृणानि स्फ्यते। तानि दक्षिणेन हस्तेनाग्रप्रदेशे गृहीत्वा
विधून्वन्विघत्के नाकंपयन् गार्हपत्यादारभ्य सव्येन हस्तेन संततं स्तृणन् आहवनीयं गच्छति। तं तुं तन्वन्निति सृ
त्वा। आस्तरणमंत्रो नगमनं श्वः। न तोमं चातं स्तरणारंभः॥ शेषं निधाय प्रसरपुद्गाहवनीयादवस्त्धायस्त्धा।

(23)

आ.सू.वृ.
२५

स्मा: स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात् स्वाहाकारान्तैर्मन्त्रैर्न चेन्मन्त्रे पठितः। शेषितव्यानीति वचनात्।
तानि सर्वाणि स्मरीनश्यानि नियमेन शेषितव्यानीति गम्यते। आज्यसंस्थाल्याः स्रुवेणाज्यमादाय स्रुवे
णैव जुहुयात्। आहवनीयास्थाल्या सगुरुगवस्थाय। सर्वप्रायश्चित्तानीति संज्ञैषां होमानां। स्वाहाकारां
तैर्मन्त्रैन्ते स्वाहाकारं कृत्वेत्यर्थः। न चेन्मन्त्रे यत्र क्वापि न स्वाहाकारः पठितस्तदन्ते स्वाहाकारः कर्तव्य इत्यर्थ
ः। यत्र क्वापि पठितश्चेत्स एव संप्रदानार्थो भवति। यत्किंचाप्रेषितो यजेदन्यत्रापि॥ यः कश्चनास्मिंछास्त्रे
देवतोद्देशेन द्रव्यस्यागालकोऽयापारो यागो होमो भ्याधानं बलिहरणादयो वा मंत्रेण साध्यंते तत्र स्वा
हाकारः कर्तव्य इति सूत्रार्थः। अन्यत्रेति वचनं गार्ह्येष्वपि प्रापणार्थं। अप्रेषित इति वषट्कारसमुच्च
यनिवृत्त्यर्थं। एवंभूतो व्यक्तहोमाभ्याधानोपस्थानानि वा एवंभावो नाम एवंप्रकार आहवनीयाल्लय गुर
न्देशे स्थित आज्यं स्रुवेणादायाहवनीये इति। एवंप्रकार विशिष्टः कर्ता एवंभूत इत्युच्यते। विशेषेणाप
रोयं निर्देशः। अव्यक्तशब्दा विहितविशेषादित्युच्यंते। यत्र होमाभ्याधानोपस्थानान्यविहितविशेषाणि

दे

सर्वत्र

रामः
२५

न
विधीयंते। तत्रानेकैः प्रकारेण कर्तमानीत्यर्थः। एकदेशविशेषे वाप्यपेक्षितमात्रमस्मादुच्यते॥ अयाश्चा
ग्नेस्यनभिशस्तीश्च सत्यमित्त्वमया असि अयासा वयसा कृतो यासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा।।
व्यनो देवा अवं तु न इति द्वाभ्यां व्याहृतिभिश्च भूः स्वाहा भुवः स्वाहा भूर्भुवः स्वः स्वाहेति॥ एकमंत्राणि कर्मा
णीति न्यायेन द्वाभ्यां द्वे आहुती होतव्ये व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठितेन ज्ञापयते व्याहृत्यपदेशे अ
नक्रमे यो ते चत्वार इति। हुत्वा संस्थाजपेनोपस्थाय तीर्थेन मि निष्क्रम्यानियमः स्यादिति शेषः। हुत्वेति वच
नं संस्थाजपेन होमस्य नत्संबंधार्थः। यत्र संस्थाजपोऽस्ति तत्र प्रायश्चित्तहोमोऽपि भवतीति। अतः स्वंद्वेष्वि
त्य पि संस्थाजपस्य प्राप्तौ व्रात्याः प्रायश्चित्तहोमोपि प्रयोज्य एव। उपस्थायान्तेन तीर्थेनैव निष्क्रामेत् निष्क्रम्य।
नियम इत्यर्थ लुप्ता नियमा इत्यर्थः। अर्थलुप्तत्वे सत्यपि अनियमविधानं कर्ममध्येऽपि तीर्थेन निष्क्रांत
स्याचमनादयो नियमा न भवंति। तेन प्रयोगमध्ये मार्गांतरेण निष्क्रांतस्यापि नियमा भवंतीति एवं ज्ञा
यते। ॐ त्वमेस्वरश्चमेयज्ञोपचवनेनमश्च। यत्ते न्यूनं तस्मै त उपयत्ते तिरिक्तं तस्मै ते नम इति संस्थाजपः

स्वः स्वाहा

आ.सू.२.

इवदेवाश्च पितरश्चेमं नर इति पितृशब्दोऽपि प्रयोक्तव्य इति। सर्वत्र देवशब्दवति मंत्रे पितृशब्दप्रयोगस्तत्र न प्राप्नोति स्वार्थेन
देवशब्दः प्रयोज्यो न परार्थ इति कृत्वा। ग्वार्थो ह्यत्र परार्थत्वादप्रयोगमनुमानं तस्य हि तं प्रतिपत्ति वाक्यं पठितवान् इति
नान्यत्र पितृशब्दो न प्रयोक्तव्य इति सिद्धं। प्रतिपत्ति वाक्यमुक्त्वा ततो वक्ष्यमाणं देवता आवाहयेत्। अग्निं होत्राया वह स्वं महि
मानमावह इति तस्य स्थाने अग्निं कव्यवाहनमावाहयेत्। आज्यपानं देवता आवाह्य प्राकृतस्य स्विष्टकृदावाहनस्योहः स्वं
तानं स्थाने अग्निं कव्यवाहनमावाहयेत्। उत्तमे चैव प्रयाजे प्रागाज्यपेभ्यो निगमयेत्। उत्तमे च प्रयाजे प्रागाज्यपेभ्यः
अग्निं कव्यवाहनं निगमयेत्। सूक्तवाके चाग्निर्होत्रेणेति तस्य स्थाने। निगमयेदिति वर्तते। नेह प्रादेशः कार्यो यत्तत्
स्मात्र्याणां मंत्रलोपे पिकार्ये स्याल्लोप इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते। न बर्हिर्मंतो प्रयाजानुयाजो। नेडायां
भक्षभक्षणं। भक्षेषु प्राणभक्षमिति प्राप्ते इडायां भक्षणमेव नास्ति कः प्रसंगः प्राणभक्षस्येत्यर्थः। भक्षवचनं प्रकृ
तावदवांतरेडाभक्षोऽस्तीति ज्ञापनार्थं। इडाभक्षो यस्मादिडाभक्षोऽस्तीति ज्ञापनार्थं इडायामिति सप्तमी निर्देशादि
डाविषयं यद्भक्षणमिति गम्यते। नेडाया एव भक्ष इति। तेनावांतरेडाभक्षणं चात्र नास्तीति गम्यते न मार्जनं। इडाभक्ष

पामिडाभक्ष

ण

६९

णं गत्वा देव मार्जना भावे सिद्धे न तद्भाववचनेन तत्संगतत्वज्ञापनार्थं। न सूक्तवाके नामादेशः। सूक्तवाके यजमाननामग्रहणादे
शः। सूक्तवाकवचनं स्तुगाद्यापनादिषु ध्वर्य्वादिशब्दप्रसंगनिवृत्यर्थं। इति क्षितः सीद होनरि निवोक्त उपविशेत् छिन्नरस्यो
पवेशनस्येदं निमित्तं दूयं विधीयते प्रादेशकरणाद्यर्थत्वात् सूत्रस्य तद्भावे भावः। प्रादेशकस्याभाव उक्तः। अनुमंत्रणम
प्यत्र नास्ति। अनुमंत्रणीयनोपस्थानानां मंत्रारूढरूपत्वात् क्रियायां मंत्राभावे क्रियाया अप्यभाव इति। तस्मादत्रापू
र्वमुपवेशनं नास्ति। मानुषशब्दप्रत्याम्नाय ईक्षणादितज्ञालोपविशेषे दिलुक्तत्वात् अभिक्रमणादि सर्वं न भवति। निरसनो
पवेशनबर्हिरुपस्पर्शनानि मंत्ररहितानि कुर्यादेव। जीवातुमंतौ सव्योत्तरं युपस्थाः प्राचीनावीति नोहविभिश्चरं निरु
पस्थविधानं येषां तरं तं गतेषामेव। हविर्ग्रहणं प्रधानेष्वेवायं धर्म इति ज्ञापनार्थं। तेन प्राधान्येऽपि यस्यायश्चित्तते
न प्राप्तं तस्यायं धर्मो न भवतीति गम्यते। दक्षिणा आसीन उत्तरेणाध्वर्युः। द्वे द्वे अनुवाक्ये। अध्यमोर्धामन वानां अत्रानुवा
क्या कार्यास्येकत्वान्मध्ये प्रणवो नास्ति। ओं स्वधेत्याश्रावणं। अस्तु स्वधेति प्रत्याश्रावणं। अनुस्वधा स्वधेति संप्रैषः।
ह्वो वेनो संप्रैषो। अनुस्वधा इत्येके स्वधेत्यपरे। एकवचनं जात्यभिप्रायं अनुस्वधास्वधेति दीर्घः पठितव्यः। ये स्वधेत्या

प्या

69

आ॰सू॰वृ॰

७०

गृह्णीये स्वधामइति वा। स्वधानमइति वषट्कारः अत्र ओं स्वधेत्यादयः। स्वधाशब्दादीर्घा नादएव प्रयोक्तव्याः। अध्वर्युसंप्रै
षप्रयोजनं तदेव वक्तव्यस्य कार्यकरणार्थं। निसाः स्तुतयः। उक्ताः स्तुतयः। प्रकृतावाद्ये द्वितीये तृपां सेवी यदक्षर
स्ताः स्तुतिः एतेषु पितर क्षरस्तेव कार्येत्यर्थः। पितरः सोमवंतः सोमो वा पितृमान् पितरो बर्हिषदः पितरो ग्निष्वा
त्ता यमः। पितॄणां सोमवत्तागुणः। सोमस्य पितृमत्तागुणः। बर्हिषदो ग्निष्वात्ताइति च पितॄणामेव गुणाः। आद्यैवेक
ल्पिके। उदीरतामवर उत्परास स्त्वया हि नः पितरः सोमपूर्व उपहूताः पितरः सोम्यासस्त्वं सोम प्र चिकितो मनीषा त्वं सो
मो धेनुं सोमो अर्वन्तमाशुं त्वं सोम पितृभिः संविदानो बर्हिषदः पितर ऊत्यर्वागाहं पितॄन्त्सुविदत्रां अवित्सी इदं पितृभ्यो
नमो अस्त्वद्याग्निष्वात्ताः पितर एह गच्छत ये चेह पितरो ये च नेह ये अग्निदग्धा ये अनग्निदग्धा ये अनग्निदग्धा इमं
यज्ञ प्रस्तरमा हिंसीदेति द्वे परे यिवांसं प्रवतो महीरनु। पंचानां तिसृस्तिस्रः ऋचः। वैवस्वताय चेन्मध्यमायास्या। यद्विय
सौमो वैवस्वतो देवता तत उत्तमे त्रिके मध्यमा ऋग्या स्याभवति ये तानूपुर्वे च त्राजेह मानास्त्वदग्ने काव्या तन्मनी। राम॰
षाः सप्रलथा सहसा जायमानइति स्विष्टकृन्नइति शेषः। अग्निः स्विष्टकृत्कव्यवाहनः प्रकृतौ यो ग्निः स्विष्टकृत् इहैव त ७०

प्रथमोत्तमेत्र्यनुवाक्ये भूमैदृति

र्यकरो ग्निः कव्यवाहनस्त्यर्थः। तेनात्र स्विष्टकृच्छब्देन प्रयोक्तव्यः। प्रकृत्यानऊर्ध्वं। स्विष्टकृत ऊर्ध्वं प्रकृत्यास्याभवति। स प
ओतर्युपस्थ नादयेनभवंतीत्यर्थः। वचनमिदं स्विष्टकृत्त्वपिर्माणार्थं। अंगत्वादेव उत्तरत्र प्राप्त्यभावात्। वषट्कारक्रि
यायां चोर्ध्वमाभागाभ्यामन्यमंत्रलोपात् मंत्रलोपशब्देन पूर्वोक्ताः सर्वे विकारा लक्ष्यंते। तेभ्यो न्येषां सओतर्युपस्थ
नादीनाम भावाय प्रकृतिभावो विधीयते। प्रधानेषु स्विष्टकृति च स्वधाकारं वर्जयित्वा वषट्कारेण क्रियां चेत् ऊर्ध्वमा
ज्यभागाभ्यामिति वषट्कारक्रियास्थानलक्षणार्थं। तेनाज्यभागाभ्यामूर्ध्वं स्विष्टकृत्स्यर्थे तेस्थाने वषट्कारक्रियायां प्रकृ
त्याभवतीति गम्यते। तत्र मंत्रलोपादिः पूर्वो विकारः सर्वप्रकारायां पित्र्यायामासमाप्तेर्भवत्येवा। एकैकावानुवाक्या
प्रकृतिभावादेव एकत्वे सिद्धे एकवचनमिदं न योरेकैकस्याग्रहणार्थं। यो अग्निः कव्यवाहनस्त्वमग्ने ईळितो जातवेदइति
संयाज्यो वषट्कारक्रियायामेवा भक्षेषु प्राणभक्षान्भक्षयित्वा बर्हिष्युपहरेयुः। संस्थितायां प्राग्वानुयाजाभ्यां दक्षि॰ दक्षिणाद्वतो
णाग्निमुपतिष्ठंते। उभयतो विहारादनियमे प्राप्ते नियमार्थो दक्षिणाद्वचनं। अनाहृतानग्निप्रणीनचर्यायां। अनति
प्रणीतचर्यायां पित्र्यायामावर्तेन मरुत्तैवोपतिष्ठंते। नमो वो... अभि सुखत्वं संभवता। अया विष्ठा जनयन् कर्वराणि स हि घृ

69

आ॰सू॰पू॰वृ॰
७१

णि रुरुर्वरायगातुः। मप्रसुदेहृ रुणं मधो अग्नं स्वां यन नूनं त्वामैरयानेति। अंयदृक्षिणाग्नेरुपस्थानमंत्रः आद्य
सत्वेवेतरो। अतिप्रणीनचर्यायां दक्षिणाग्नेरुपस्थानमुक्तं अनतिप्रणीतचर्यायामनाहत्य तस्यैवोप
स्थानमुक्तं इदानीं गार्हपत्याहवनीययोरुपस्थानमुच्यते। तुशब्दो विशेषविध्यर्थः। एवशब्दोऽवधारणार्थः। अतिप्रणी
तचर्यायामनतिप्रणीतचर्यायां च गार्हपत्याहवनीययोराहृत्यैवोपस्थानमिति। आहवनीयसुसंदृशं त्वेति पंक्त्यापं
क्तिवचनं पत्नीकर्तृकं संदेहनिवृत्त्यर्थं। गार्हपत्यमग्निं नेमन्त्र इति। एकर्चा नसूक्तेन। उत्तरत्र वचनात्। अयेनमग्निं भिसमा
यंति मा प्रगाम मार्गाद्वेत्वं न इति जपंतः। एनेन गार्हपत्यमभितः समापयंति। प्रादक्षिण्येन। पूर्वेण गार्हपत्यं सूक्तेन समाप्य सव्या
वृतस्त्र्यंबककान्यजंति। गार्हपत्यस्य पुरस्तादेशस्त्रिंदेशे यथा सूक्तेन समाप्यते तथा समापयंति सूक्तेन ग्रहणमग्निं त
मन्त्रंइत्यस्त्रैग्रहणार्थं। यस्मिंस्तिं समाप्यो पनिष्ठते तत्र्यंबकान्यजंति। पदानूयाजाभ्यां प्राक् तदा समाप्य पश्चिंत्र्यंबकार्थं
प्रजेयुः। त्र्यंबकानाम कर्मविशेषाः। तत्राध्वर्यवः कर्माधीयते। तत्र यदध्वर्युणोक्तं तदस्मदीये रपिद्रष्टव्यं। प्रसेसादि
त्ययाचरंति। अदितिरन्नदेवतानादित्यः। आदित्यानां याज्यानुवाक्योनाम्नानात्। पुष्टिमंतो धाय्ये विराजौ १० पं

उक्तास्त्वन्याः

तदात
दर्तव्य
टाम॰
७२

ततो ऽथ्यहेत्र्यहे रनितराज्ञांतरो कृकालइत्यर्थः २

च म्यां पौर्णमास्यां शुनासीरीयया। साकमेध कालमारभ्य या पंचमी पौर्णमासी तस्यां शुनासीरीयाकर्तव्या। शुनासीरीय
ति कर्मनाम। अर्वाग्यथोपपत्ति वा। पंचम्याः पौर्णमास्या अर्वागपि यत्र काले कर्तुं संभवति तत्र वेत्यर्थः। वाजिनवर्जं स
मानावैश्वदेवाहविषां। तुस्थाने षष्ठप्रभृतीनां वायुर्नियुत्वान्वायुर्वा शुनासीरविंद्रो वा शुनासीरइंद्रो वा शुनः सूर्यस्तृत
मः। नियुत्वानिति वायोर्गुणः। शुनासीरः शुनश्च इंद्रस्य गुणो। प्रथमद्वितीयौ वैकल्पिकौ पुनस्तृयो पि विकल्प्यौ
त्स्यं ते सूर्यस्योत्तमवचनं देवतांतरप्रवेशे पि सूर्य उत्तम एवेत्यर्थः। आवायो भूष शुचिपा उप नः। प्रयाभिर्यासि दाश्वांस।
मच्छ सत्तेनो देवमनसेशानाय प्रहुतिं यस्त आनट् शुनासीरा विमां वाचं जुषेथां शुनं नः फाला विकृषंतु भूमिमिंद्रं वयं शु
नासीरमस्मिन्यज्ञे हवामहे। स वाजेषु प्रनो विषत्। अश्वायंतो गव्यंतो वाजयंतः शुनेकुवेमम घवानमिंद्रमश्वायंतो गव्यंतो
वाजयंतस्तरारो विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः। याज्यानुवाक्याग्रहणं याअस्मिन्प्रकर
णे आम्नाता याज्यानुवाक्यास्ता एतत्प्रकरणसंबंधिनीनां देवतानां शाखांतरागतानामपि कथं चिदपि संभवेऽग्र
हीतव्याः। नामाइत्येवमर्थं। समाप्य सोमेन यजेत। अशक्तौ पशुना। वर्तुर्मास्यानामेतावंगभूतौ पशुसोमौ। निरूढःष्यो॥

त्येव

एव

आ॰स॰सू॰वृ॰
७२

तिसोमप्रकृतिकौ समाप्तिनिमित्तत्वादनयोः। चातुर्मास्यानि वा पुनश्चातुर्मास्यानि वा पुनः चातुर्मास्यैरिति वक्तव्ये अ
न्यथावचनेनेमानि तदंगभूतानीति ज्ञापयितुं। तेन पुनरपि तान्येवाभ्यसितव्यानीति गम्यते। अभ्यासपक्षे समाप्ता
वपि नैव पशुसोमौ कर्तव्यौ। तस्य पक्षस्य पूर्वाभ्यास एव वैकल्पिकत्वात्। वरुणप्रघासेषू ह उक्तमग्निहोत्राभावाद्
ग्निवाचिना मनूहः। घृतवतीमित्यत्राध्वर्यू आस्येथां विश्ववारा विश्ववाराविति ऊहः। वेदोसीत्यत्र वेदविषयाणां पदा
नामूहः। अस्य दध्येव रूपमस्ति चेन्न दन्वेषणीयं ॥१८॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वितीयोध्यायः ॥७
७ ॥ ॥ ॐ ॥ पशौ ॥ अधिकारोयं प्रायश्चित्तीष्ट्यधिकारात्। पशुगुणकं कर्म पशुरित्युच्यते। इष्टिः। कार्या उ
भयतोन्यतरतो वा। आग्नेयी वा। याजा विष्टिपशोरुभयतोन्यतरतो वा गतेनेनसा विहिता निदेवत्याभावे दित्येकोर्थः। अप
रश्चार्थो वा शब्दाल्लुप्यते। येयमाग्नेयीष्टिः पशोरुभयतो वा गतेन विहिता सा न भवेदिति। तेनेयमिष्टिरनित्यैव गं
तव्या। अतः सिद्धं स्वतन्त्रेषु पशुषु कर्तव्या। अंगभूतेषु न कर्तव्येति। आग्नावैष्णवी वा। इष्टिकरणपक्षे देवताविकल्पो ने
न विधीयते। उभे वा। आग्नेयी वा आग्नावैष्णवी वैकल्पयोगे हि वा इष्टी भवेतां। अनन्तरा पुरस्तात्परो भेस्या तां तदेका

राम॰
७२

पुरस्तादितराउपरिष्टादित्येवं भवेतां नाम हितेउभयतोन्यतरतो वा भवेतामिति सूत्रार्थः। औउरुग्रहणं वारुणप्रघा।
सिकस्य सविधिकस्य ग्रहणार्थं। पश्चात्पाशुबंधिकाया वेदेरुपविश्य प्रेषितो यूपायाज्यमानायां जेतिताम धेदेवयं
तइत्युत्तमेनवचनेनार्धर्च आरमेत् वेदं तरस्याभावे पिपाशुबंधिकायाः निविद्भोषणं तत्स्थाने तद्दुपचारसिध्यर्थं
प्रेषितवचनं बहुयूपकेणि अंजनादीनां पदार्थानुसमये क्रियमाणे प्रेषितः प्रेषितो नुब्रूयादित्येवमर्थं। यूपायाज्यमा
नायेति यूपमज्यमानमभिधातुमेतामृचमनुब्रूयादित्यर्थः। तस्या उत्तमेन वचनेनेति संबंधः। उच्छ्रयस्व वनस्पते समि
द्ध्यस्व श्रयमाणः पुरस्तादूर्ध्व ऊषुण ऊतय इति द्वे जातो जायते सुदिनत्वे अह्नामित्यर्धर्च आरमेत्। युवा सुवासाः परि
वीत आगादिति परिदध्यात्। परिदध्यादिति वचनं पदार्थानुसमये प्रतिपदार्थं अनुवचनस्य भेद इति ज्ञापनार्थं। य
त्रैव बहवः सपशवो संपरिधाय संस्तुयादनमिहिंकृत्वा स्तुयाद्यानेनरो देवयंतो निमिम्युरिति षड्भिः। यस्मिन्कर्मणि ए
कस्मिन्नेव पशुं तत्रैव बहवो यूपाः सपशवस्तत्रांत्यमनुवचनं परिधायं स्तुयाद्यूपान्। कांडानुसमायाभिप्रायेणेदमु
च्यते अंत्यमिति। तदा नुवचनस्य भिन्नत्वात्। पदार्थानुसमये तेकमेवानुवचनं भवति। एकतंत्र वचनमेक कर्म मा

त्वा निवृत्त्यर्थं। बहुवदग्निहुयो निवृत्त्यर्थं सपशवइस पशुकवद्भुत्वनिवृत्त्यर्थं। पंचभिर्वा। अनभ्यासमेके। प्रथमोत्तमयोरनभ्या
समित्यर्थः। उक्तमग्निमंथनं। तथा धाय्ये कृताकृतावाज्यभागौ। आवाहने पशुदेवताभ्यो वनस्पतिमनंतरं आवाहयेदि
ति शेषः। आवाहनग्रहणमावाहनादिष्विष्टिकेष्वेव निगमेषु निगमनं वनस्पतेर्नेपो शुकेष्विलेवमर्थं। अतः सूक्तवाक
प्रैषनिगमनेन कर्तव्यं भवति। संमार्गैः संमृज्य प्रहृताहुती जुहुयात्। संमार्गैः संमृज्य स्रुचं दर्वीं प्रहृताहुती जुहुयात्
। प्रहृताहुतीरिति कर्मनामगुणविधिः। जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक्। यद्वाचो मधुमत्तमं तस्मिन्मा
धाः सरस्वत्यै वाचे स्वाहा। पुनरादाय पंच विग्राहं स्वाहा। पुनरादाय पंच विग्राहं स्वाहा वाचे स्वाहा वाचस्पतये स्वा
हा सरस्वत्यै स्वाहा सरस्वते महोभ्यः संमहोभ्यः स्वाहेति। सकृद्गृहीत्वा कांदुत्वा पुनः सकृद्गृहीत्वा पंचाहुतीर्जुहुयात्॥
आहुतिसंख्याभेदाद्देवताभेदे सिद्धे विग्राहवचनं मंत्रविग्रहणार्थं। सोमाय वैके। सोमशब्देन सोमसमहरुच्यते सो
म एवाहं त्विअयं होमो नान्यस्मिन्निसेके। प्रशास्तारं तीर्थेन प्रपाद्य दंडमस्मै प्रयच्छेद्दक्षिणोत्तराभ्यां पाणिभ्यां
मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामीति। विहारमप्रपन्नस्य तीर्थेनैव सिद्धत्वात्तीर्थेनेति वचनं

प्रशास्तुस्तीर्थप्रपद्यस्वेति संप्रैषलाभार्थं। प्रदानमंत्रो मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो
विथुरो भूयासमिति। प्रतिगृह्णीयादिति शेषः। तथायुक्ताभ्यामेवेति दक्षिणोत्तराभ्यां पाणिभ्यामित्यर्थः। प्रतिगृह्योत्त
रेण होतारमतिव्रजेत्। दक्षिणेन दंडं हरेत्। अनवानेन संस्पृशेदात्मानं वा मं वा प्रैषवचनात्। अनेन दंडेनात्मानमन्यं वा
न संस्पृशेत्। आप्रैषवचनान्नाप्यावस्येयोच्चारणं नास्ति तावदयं नियमः। आरब्धे प्रथमप्रैषे नायं नियमः। अन्या
न्यपि यज्ञांगान्युपयुक्तानि न विहारेण व्यवेयात्। अन्यान्यपीति वचनाद्य सूत्रोक्तमुत्तरेण होतारमतिव्रजेद्दक्षिणेन दं
डं हरेदिति तदपि व्यवायपरिहारार्थमेवेति गम्यते। तेनैतद्दर्शितं भवति। हवींषि चाग्नयोऽन्तरतमः प्राह विष्णुश्च प्रधा
नाप्रधानविशेषोऽस्ति। तत्र स्रुगादीनि साधनानि। तेषु च विशेषोऽन्वेषणीयः। ततः कर्तारस्तेषु च स्वामी मुख्यो हि तृती
यतृतीयचतुर्थीषु विशेषः। इत्येवं बुध्वा एतेषूपचारे कृते यज्ञांगानि विहारेणाव्यवेतानि भवंतीति। उपयुक्तवचनमनप
युक्तकर्मणामेव ग्रहणार्थं। सर्वार्थं चेदं सूत्रं अव्यवायप्रतिषेधपरत्वात्। दक्षिणो होतृषदनात्स्थवस्थायमेव धौ दंड
मवष्टभ्य ब्रूयात्प्रैषां श्चादेशं। वेदिश्रोण्यां बहिर्वेदि स्थितो यमवस्थायां तवेदिदंडमवष्टभ्य ब्रूयात्प्रैषानादेशं आप्रै

70

षप्रेषणमित्यर्थः। यावंति प्रैषार्थानि प्रेषणानि संतिता वत्सु प्रैषणेषु प्रैषान् ब्रूयादिति। एतदुक्तं भवति प्रैषाम्नाय पा
ठितान्सर्वान्प्रैषान्मैत्रावरुण एव प्रेषितः प्रेषितो नु ब्रूयादित्यर्थः। नेन ज्ञायते अवाय प्रतिषेध सूत्रं सर्वार्थमिति। अ
नुवाक्यां ब्रूयत्स प्रैष पूर्वां प्रैषादेशं आप्रैषणामित्यर्थः। यावंमि ति प्रैषार्थानि प्रेषणानि संतिता वत्सु प्रैषणेष पा।
मित्यर्थः। यावंति प्रैषार्थानि प्रेषणानि संतिता वत्सु प्रैषणेषु प्रैषान् ब्रूयादिति। एतदुक्तं भवति प्रैषाम्नाय परिपठिता
न्सर्वान्प्रैषान्मैत्रावरुण एव प्रेषितः प्रेषितो नु ब्रूयादित्यर्थः। वशशे मैत्रावरुणानुकर्षणार्थः। तेन ज्ञायते अवाय
प्रतिषेधसूत्रं सर्वार्थमिति। अनुवाक्यां चसप्रैषपूर्वां प्रैषात्। अनुवाक्यां ब्रूयादिति शेषः। पर्यग्निस्तोकमानोतोन्नी
यमानसूक्तानि च। एवंभूतं मैत्रावरुणानुकर्षणार्थश्चशब्दः। सोमआसीतोप्यतु। उक्तोप्यायद स्यन्मैत्रावरुण।
स्यकोमि कर्मास्ति नदासीनो ब्रूयात्। सोमिष्येतानि तिष्ठन्नेव ब्रूयादित्यर्थः॥ २॥ एकादश प्रयाजाः। पशावेकादश
प्रयाजा इति नियम्यते सर्वत्र सर्वेषां तेषां प्रैषाः। तेषां प्रयाजानां प्रैषा अपि भवंति। प्रथमं प्रैषसूक्तं। उक्तं द्विती
यायदुक्तं प्रकृतौ वसिष्ठादीनां नराशंसः इतरेषां तनूनपादिति तत् प्रकृते पु प्रैषेष्वपि स्यादित्येवमर्थं सूत्रं। अध

र्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारं। एवं सति होत्रा नाध्वर्योः प्रैष आकांक्षणीयः। होतायजत्याप्रीभिः प्रै
षसलिंगाभिः। होतृग्रहणं मैत्रावरुणाधिकारात्। प्रैषसलिंगाभिरित्याप्रीष्वपि तनूनपान्नराशंसविवेकः
कर्तव्य इत्यर्थः। समिद्धो अग्निरिति अशुनकानां शुनकानां समिधमिति वसिष्ठानां समिद्धो अद्येति सर्वेषां।
वसिष्ठशुनकानामुक्तावि धीयमानत्वात्तद्वर्जितानां सर्वेषामिति गम्यते। इदं तं समाप्रीसूक्तं आजामदग्न्यंना
गस्त्यं। आम्नायक्रमानुगुण्याद्वासिष्ठवि ध्युत्तरकालिकत्वाद्वास्य विधेः। नचाप्यादीनां नाराशंस्येव वासिष्ठी आ
हर्तव्या प्रैषसलिंगाभिरित्युक्तत्वात्। एवं प्राजापत्ये पिपशौ वसिष्ठादीनां नाराशंस्येवा यथर्षिवा। योयस्यर्
षिः तदानुगुण्यं यथर्षिशब्देनोच्यते। तथा वा आप्रीसूक्तं नहीतमांसीयकर्षिनामधेयस्यानुगुणा आप्रः
कर्तव्या इत्यर्थः। तत्र भगवता शौनकेन यथर्षिपक्षे आप्रीविवेकार्थमेवश्लोकउक्तः। कण्वांगिरोगस्त्स
शुनका विश्वामित्रोत्रिरेव च। वसिष्ठः कश्यपो वाध्र्यश्वो जमदग्निरथो नमः। तत्र दशानां सूक्तानां प्रथमं क
ण्वानां सुसमिद्धो आवहेति। द्वितीयं तद्वर्जितानामंगिरसां समिद्धो अग्न आवहेति। एवं तृतीयमगस्तीनां

मिद्धो अद्य राजसीति। शुनकानां चतुर्थं समिद्धो अग्निर्निहितः पृथिव्यामिति। विश्वामित्राणां पंचमं समिस्तुमि-
स्तुमना इति। अत्रीणां षष्ठं समिद्धो यशा विषइति। वसिष्ठानां सप्तमं जुषस्व नः समिधमग्ने अद्येति। अष्टमं क-
श्यपानां समिद्धो विश्वतस्परीति। वाध्र्यश्वानां नवमं इमां मे अग्ने समिधमिति। शुनकवाध्र्यश्ववर्जितानां भृगूणां
दशमं समिद्धो अद्य मनुषो दुरोण इति। पथर्षिपक्षे विवेकोयं प्राजापत्ये तु जामदग्न्यः सर्वेषां तु शाहेनाचवसिष्ठशु-
नकसंहितानामिति विशेषो लभ्यते। दशसूक्तेषु प्रेषितो मैत्रावरुणोऽग्निर्होतानइति नृचं पर्यग्नये ब्राह। कालो-
पदेशाद्प्रेषितो पिब्रूयादिति प्रेषितवचनं। मैत्रावरुणाग्रहणमुत्तरार्थं। पर्यग्नइति परितः क्रियमाणमग्निम-
भिधातुमित्यर्थः। अधिगवे प्रेष्योप प्रेष्य होतरिति वोक्तो जैदग्निरसनद्धाजमिति प्रेषमुक्त्वा नवैदिदंडं निरस्या-
तां मैत्रावरुणाग्रहणं हि नीयेपि संप्रेषे मैत्रावरुण एव ब्रूयादित्येवमर्थं। प्रेषपाठस्तु होतृलिंगेनाविकृतत्वात् पू-
र्वस्य तु पाठः परिसंख्याभावात्। प्रेषवचनं प्रैषमित्येकवचनं प्रैषमित्येकवचनं प्रैषमित्येकवचनमविवक्षार्थं
। नहि वक्ष्यमाणप्रैषैक्यसिद्धिर्हुरेणानवानमस्य साधिनं भवति। इदानीं दंडनिधानवचनात् पूर्वनिधातव्य इति

गम्यते। अधिगुं होतोहं नेगानि दैवतं पत्नीश्रुमिति यथार्थं। अधिगुरिति दैव्याः शमितार आरभध्वमित्यस्य नाम। मैत्रा-
वरुणाधिकाराद्धोतृहणं। ऊहन्नित्यभिधेयवशेन वचनानि सन्नमयन्नित्यर्थः। अंगानीति वचनमधिगावंगादीनां शब्दा ए-
वोक्तं नेत्यानान्ये बर्हिर्भरितृवितृत्रा ह्यादय इति ज्ञापनार्थं। यथार्थमिति यो यस्य शब्दस्यार्थस्तं न थोहन् ब्रूयादित्य-
र्थः। ऊहन्निति सने नैवास्मिन्नर्थे सिद्धे यथार्थमिति वचनं संख्याव्यवहारार्थे यमूहसंज्ञेति ज्ञापनार्थं। पुंवन्मिथुने। मि-
थुनमिति स्त्रीपुंसयोः सहोमोरुच्यते। अस्मिन्नस्तमाहारे पुल्लिंगेनैवोहः कर्तव्य इति नियम्यते। मेधपती। अयं शब्दो
देवतावाची। तस्य स्त्रीप्रसयों तस्यायं निर्देशः कृतः। तेनायमपि पदार्थो देवतावाचिनः स्त्रीप्रसवस्य संबंधात्स्मि-
न्सूत्रे लभ्यते स्त्री देवतेति। सच स्त्रीदेवतेति परार्थो स्मिन्सूत्रे पुंवद्वचनस्य विधीयमानत्वात् स्त्रीदेवताया अभिधेया
यामित्यर्थात् कल्प्यते। मेधपतिशब्दस्यातिपदिकं च पुंद्वचनस्य विषयत्वेनेसेवं संप्रदायाविच्छेदादवगम्यते। अत
एवं सूत्रार्थः। स्त्रीदेवतायां मेधपतिशब्दं पुंवद्ब्रूयादिति। एवं व्याख्यायमानेस्मिन्ब्राह्मणमनुसृतं भवति। अथो
खल्वाहुर्यस्यैवा कस्यै चेवावकस्यैचेत्यादि। मेधायां विकस्य त्वस्य मेधशब्दार्थः पशुवाचिनः परः स्त्रीप्रसवः पूर्ववत्स्त्री

पशाविति निगमयति। तेन स्त्रीपशोर्मेधशब्दं पुंवद्वा स्त्रीवद्वा ब्रूयादिति विकल्पोऽत्र विधीयते। यथार्थमूर्ध्वमध्रिगो
रन्यन्मिथुनेभ्यः। अध्रिगोरूर्ध्वं यथार्थमूहो भवति मिथुने तु सर्वत्र आध्रिगुवदेव। एतदुक्तं भवति। अध्रिगोरूर्ध्वं मंगादि
शब्दा अन्ये चार्थवशेनोह्यन्ते न नियमो नांगादिशब्दा एवेति। मिथुनं तु सर्वत्र पुंवदेवाभिधेयमिति। सर्वेषु यजुर्निगदे
षु न केवलमयं विधिः पशावेव कथं तर्हि सर्वेषु यजुःषु निगदेषु चार्थवशेनोहः कार्यः। यजूंष्येवोच्चैः प्रयोगार्हाणि नि
गदा उच्यन्ते प्रकृतौ समर्थनिगमेषु। प्रकृताविति यस्मिन् कर्मण्यर्थाभिधानार्थो वा मंत्र उत्पद्यते तस्य मंत्रस्य तत्कर्म
प्रकृतिः। समर्थो नाम यथार्थाभिधायी शब्दः। निगमनाम मंत्राः उत्पत्तिस्थाने ये मंत्रा यथार्थाभिधायिशब्दवंतः
तेषु विकृतिषूहो भवति। ये तु पुनः प्रकृतावेवायथार्थाभिधायिशब्दवंतः तेषु विकृतावपि न भवत्यूह इति। प्रकृताव
समर्थनिगमसंभवात् ज्ञानात् प्रकृतावूहो विद्यत इति गम्यते। उपपन्नमेवैतत् अर्थाभिधानार्थमेव तस्य मंत्रस्य प्रस
क्ताम्नानात्। तत्र लक्षणया गौण्या वाभिधानं कल्पनीयं तस्याः कल्पनायाः विकृतावप्यविशेषात्। तेषां तु विकृतावप्यनूह ए
वेति युक्तमुक्तं प्रकृतौ समर्थनिगमेष्विति। प्राकृतास्त्वेवं मंत्राणां शब्दाः। ऊहे क्रियमाणे मंत्राणां प्राकृता एव शब्दा भवेयुः

।एतदुक्तं भवति। यदि प्रकृतौ छांदसं प्रातिपदिकं स्यात्तदा तस्मादेव विभक्त्यूहः कर्तव्यो न प्रातिपदिकसंस्कार इति। तुश
ब्देन न्यायविरुद्धोऽयमर्थ इति दर्शयति। ऊहस्यास्य दायनप्रयोगत्वात् भाषिकत्वमेवेति न्यायविरुद्धमपि असमर्थेष्वनूह
वचनं छांदसस्यापि प्राकृतस्यैव शब्दस्य ग्रहणमिच्छुभयं ग्रहीतव्यमेवेत्येवमर्थं तु शब्दं प्रयुक्तवान् स्वयमेवाचार्य
ः। प्रतिनिधिष्वपि। प्राकृता एव शब्दा इति वर्तते। नाभिरूपमामेदोहविरिति सनूत्यानि। यथा कथा कथं चित्सामान्यतो प्रति
षेधो यं उपमेषु उपमार्थः श्येनारयः शब्दा गृह्यन्ते ॥२॥ दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशा
साना मेधपतिभ्यां मेधं प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ
थ्यः। उदीचीनां अस्य पदो निधत्तात् सूर्यं चक्षुर्गमयतात् वातं प्राणमन्ववसृजतादंतरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरी
रं। एकधास्य त्वचमाच्छ्यतात् पुरा नाभ्या अपिशसो वपामुत्खिदतादंतरेवोष्माणं वारयध्वात्। श्येनमस्य वक्षः
कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसाच्छिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्रयस्ता अ
नुष्ठ्योच्यावयतात् गात्रं गात्रमस्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्। अस्ना रक्षः संसृजतात्। वनिष्ठुमस्य

आ.सू.वृ.
७२

मारविशेरुकं मन्यमानानेहूतोके न न येरविनारवक्षमिनारः अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३
उ अपाप। अयमध्रिगुः अनेनोत्तानि पदानि वक्ष्यंते मेधपतये मेधं पतिभ्यां मेधं पतिभ्यो मेधो मेधानुमे धांमे धेमेधा
एवंवा। अस्मै। आभ्यां। एनं एनौ एनान्। एनां एने एनाः अस्य अनयोः एषां। अनयोः आसां। शरीरं शरीरे शरीराणि
। त्वचं त्वचौ त्वचः। वपां वपे वपाः। वक्षः वक्षसी वक्षांसि। प्रशसा। प्रशसः। बाहू बाहून्। दोषणी। दोषाणि। अंसौ अंसान्
। अछिद्रे अछिद्रा। श्रोणी। ऊरू ऊरून्। अष्ठीवंता। अष्ठीवंतः। वनिष्ठं वनिष्ठून्। रसेवमूहः। मेधं। सयूर्थ्यैः। शरीरं
। वारयध्वात्। अस्यानूनं कृणुतात्। खननात्। स्वजनतानूः शमिनारः। अध्रिगाउ अपाप। इत्येतान्यवसानानि। मेधं सयू
थ्यश्च शरीरयध्वादनून पूर्वेकृणुतान्ननाच्च। जनान्मितारोध्रिगाउपाप एतेध्रिगो मध्यविरामदेशाः। अस्नारक्षः सं
सृजतात् शमितारो यापेत्युपांशु। एते त्रयः शब्दाः स्वेदस्थाने उपांशु प्रयोक्तव्याः शमितार इतीन रयोर्मध्ये पाठात्तत्
न्मध्यगत एवोपांशु भवति। नान्यः। एकधा षड्विंशतिरिति द्विर्द्विः बहूनां। द्विबहूनां पशूनां संबंधिनावेनौ शब्दौ द्वि
र्ब्रूयात्। विभक्त्यूहसमस्यवचननिहत्यर्थं। एकधा षड्विंशतिशब्दस्याभ्यासो नियम्यते पुरोनरितिचैके। अध्रि

राम१
७७

गवादित्रिरुक्ताः शमितारो यत्र सुकृतं कृणवथास्मासु न यदुष्कृतमन्यत्रेतदिति जपित्वा दक्षिणावृदावर्तते। अध्रि
गो शमीध्वमित्याद्यपापांते त्रिरुक्ताः शमितार इत्यादि च जपित्वा दक्षिणावृदावर्तते दक्षिणावृदुच्चनं विहारमा
वृत्तिरिति प्राप्तमनूद्यते एतं मंत्रं जपित्वेदमेव कुर्यान्नान्यत् किंचिद् दक्षिणावृदित्येवमर्थं। उक्तेन प्रकारेणावृत्त्य
वृत्तः कृत्वासीन। मैत्रावरुणश्च। मैत्रावरुणश्चैवमावृत्य वृत्तः कुर्यात्। सव्यावृत्तो ब्रह्मयजमानौ। संज्ञप्ते पशा
वावर्तेरन्। पुनरावर्तनकालोयं। तस्मादेतावंतं कालं पराञ्च एवासीरन्। ३। वपायां श्रप्यमाणायां प्रेषितस्तो
केभ्योन्वाह जुषस्व सप्रथस्तममपि मं नो यज्ञमिति। वपायां श्रप्यमाणायां इति वचनं श्रप्यमाणवपासंबंधिस्तो
काभिधानादनुवचनेन वपैव संस्क्रियते इति ज्ञापनार्थं प्रेषितवचनं प्रेषणेवास्यानुवचनस्य निमित्तं नावसर
विशेष इत्येवमर्थं। उक्तमादापनं स्वाहाकृतिभ्यः। स्वाहाकृत्यर्थमत्र स्त्रुगादापनं कर्तव्यं तेन माध्यंदिनवसव
ने प्राजापत्येषु स्तोकानंतरं स्वाहाकृत्यभावादादापनं न कर्तव्यं भवतीत्येतदप्यत्रावगम्यते। स्त्रुगादापनं प्रयाजा
र्थमेवेति। तेनाप्यभाग प्रभृतिषु हविरकृतिप्रभृतिषु चैतं नस्यात्। होतायक्षदग्निं स्वाहाज्यस्य स्वाहा मेदस इति प्रे

76

षः। उत्तमा प्रीयाज्या। दशसूक्ते षितिवचनादुत्तमप्रैषो वशिष्ठस्वाहाकृत्यर्थः। नरर्थमेवाप्रीवावशिष्टं क्लृप्तमित्युत्तमे प्र
योजनं। उत्तमैवाप्रीयाज्या। नात्र देवतास्वाहामुं स्वाहामुमिति प्रकृताभिगंतव्या इति। प्रैषवचनं विस्पष्टार्थं वपापु
रोडाशो हविरिति पशोः प्रदानानि। प्रदानानीति यागाः इत्यर्थः। पशावेन द्रव्यसंबंधिनस्त्रयो यागाः कर्तव्या इत्य।
र्थः। तेषां प्रदानानीति संज्ञा। पशाविस्यधिकारे पशोर्वचनं पशोः पशोरिति वीप्सार्थं। तेनैकदेवत्येषु बहुषु पशु
षु वपाहविर्भेदवत् पुरोडाशभेदः सिद्धो भवति। नानि पृथक्प्रानादेवतेषु। एकदेवत्ये एकस्मिन्नपि पशौ वपापु
रोडाशहविषां प्रैषयाज्यानुवाक्याभेदात् पृथक्भावः सिद्धः परस्परं। तथा नानादेवतेषु पशुषु वपायागामेवं
पृथक्भावः सिद्धो याज्यानुवाक्याभेदाद्देवातथा पुरोडाशानां हविषामपि इति पृथक्भावस्याविधेयत्वादेवतेषु
वपामांससहृद्यागः। न तथा पुरोडाशानां हविषामपीतिव्यतिरेकएवात्र विधातव्यः। नानीतिवचनं योगविभागार्थं।
तेनैकदेवतेष्वपि वपादीनां प्रदानत्वं भवति। एकयोगत्वे नानादेवतेषां पृथक्प्रचारवत्पृथक्प्रदानत्वमपि स्या
त्। योगभेदे स्वतिपूर्वेण सर्वेषां प्रदानत्वं उत्तरे लेकदेवतेषु सह प्रचार इति युक्तं। मनोतां च। अवदीयमाने हविरर्थं

एम०
७८

त्वान्मनोतायां नानादेवतेषु पृथक्प्रचारे सत्यवदानस्य स्वयागव्यवधानात्प्रतिपशु मनोतामंत्रमावर्तयेत्। नम।
नोतावर्तेतत्स्ये केः। एके आचार्या मनोतानावर्तयितव्येत्याहुः। मनोतावना विकल्पे सिद्धे गुरुसूत्रकरणं न्यायविक
ल्पोयमिति प्रदुर्शनार्थं। तत्रैके मन्यंते आग्नेयत्वान्मंत्रस्य त्वं ह्यग्ने प्रथमो मनोतेति मनोताशब्दस्याग्नौ प्रवृत्तिद
र्शनात्। अग्निर्वै देवानां मनोतेति च श्रुतेः। सप्तमे च हविःशब्दस्य मनोताकाललक्षणार्थत्वेनापि संभवादनुव
चनमग्न्यर्थत्वमग्न्यर्थत्वमग्न्यर्थत्वे च यागाहृत्तावथाहवनीयाख्याग्नेरभेदे नानावृत्तिरेवेति। आचार्यस्तु पशोर्वा
आरब्धस्य मनो उपक्रामति मनोतायेह हविषो वदीयमानस्यानुब्रूहीत्याह मन एवास्यावरुंध इति। श्रुतिः तस्या।
अयमर्थः पशोरालब्धस्य संज्ञपनकाले जीवोपक्रामति स एव मनःशब्देनोच्यते। यतेयमं वै वस्तं मनो जगाम दू
रकमिति आदिषु जीवे मनःशब्ददर्शनात्। जीवेग्निशब्दः स्यदृश्यते अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्रा
णापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति भगवद्गीतासु दर्शनात्। अग्निजीवमनसामेकार्थत्वं दृश्यते। अयं होता।
ता प्रथमः पश्यतेममिति दृष्ट्वे। अतो वदीयमाने हविषो अनोताया अनुब्रूहीत्युक्ते अग्निजीवाख्यस्य मनसो हवि
:संबंधार्थमनुब्रूहीत्युक्तं भवति। अतो ग्निं प्रकाशयत्। अनुवचनं हविषो जीवमेव प्रकाशयतीति हविरर्थमे

आ०सू०वृ०
७९

वेतिगम्यते॥ नेनयागाद्दनाववदानस्य परार्थानरस्यवधानावत्प्रतिहविर्मनोतानुवचनाद्दर्ति मन्यते॥ अत्रन का
विल्लक्षणास्तीतितमेवपक्षं परिगृह्य नवानाचार्यः॥ तेषां सलिंगाः प्रैषाः प्रैषसमाम्नाय एव पठितास्तदर्थत्वेने
वा समानलिंगाः समानदेवताइत्यर्थः॥ तेनैतत्साधितं भवति यद्दैवत्यः पशुस्तद्दैवत्यः पुरोडाशो भवति॥ तेषा॥
मितिवचनं तेषामेवसंप्रैषत्वं नाज्यभागयोरित्येवमर्थं॥ प्रैषसमाम्नायस्य कृतार्थत्वात तत्र चाभागयोः संप्रैषा
नाम्नानात्॥ अप्रैषाववेतिमन्यमानस्तेषामित्युक्तवानाचार्यः॥ यद्यध्वर्यवः संप्रैषो कुर्युः होतायदग्निमाज्यस्य जु
षतां हविर्होतर्यज॥ होतोयक्षत्सोममाज्यस्य जुषतां हविर्होतर्यजेत्येतौ प्रैषौ भवतस्तदाज्यभागयोः॥ तेष्वग्नीषो
मयोस्थानेयायापशुदेवता॥ तेषु प्रदानप्रैषेषु पश्वंतरे षत्तिदेशात्प्राप्तेषु यास्तासु विकृतिषु देवताः तासामेकेका
मेवाग्नीषोमस्थाने निर्दिश्य यथ्यन्न सर्वा देवतावंतं सकृदेव निर्दिष्टव्याः॥ यावत्यस्तत्र देवतास्तावत्कृत्वः प्रैषेभ्यो
सितव्यइत्यर्थः॥ एतदर्थमेव यायापशुदेवतेति वीप्सावचनमुक्तं॥ अयमप्यर्थोस्मिन्नसूत्रे सम्यम्भुत्यादितोग्नी॥
षोमयोस्थानइति॥ ब्रुवताचार्येणाग्नीषोमीयः पशूनां प्रकृतिः पाशुके विध्यंते गस्थमामाल इति॥ छागस्थान उस्रो
गौर्मेषोविकोहयोमश्वावादेशे व्यक्तचोदना॥ गोमेषहयानामेकैकस्याजातिद्वौ द्वौ शब्दौ नियम्येते वैकल्पिको॥ एत

राम०
७९

दुक्तं भवति॥ गोजातिश्चेत्पशुः छागस्थाने गोशब्दमुस्रशब्दं वा प्रयुंजीत॥ एवमितरयोः प्राप्तिः कोयं विधिः॥ कुतः अन्वा
देशेव्यक्तचोदना॥ औपदेशिकस्य मंत्रस्य प्रकृतौ प्रयोगः आदेशः॥ तस्यैवातिदेशप्राप्तस्य विकृतौ प्रयोगोन्वादेशः॥ व्य
क्तचोदना प्रकृतिप्राप्तस्य मंत्रस्य विकृतौ संस्कृत्य पुनः पाठः॥ यथा प्राजापत्ये तेरे भ्वस्य तूपरस्य गोमृगस्येत्येवमा॥
दि॥ तत्र नाम तु स्मृत्यैव मंत्राः प्रयोक्तव्याः॥ एतदुक्तं भवति॥ आदिदेशिकमंत्रप्रयोगे यस्मात् विकृत्यपदेशः तत्र तम
नुस्मृत्यैव मंत्रः प्रयोक्तुं यज्यते तस्मादिकृत्यपदेशे सति स एव भवति॥ तदभावे गोशब्दो वेत्येवं द्रष्टव्यं॥ एवं वनस्पति
स्विष्टकृत्सूक्तवाकप्रैषेषु॥ यथा प्रदानप्रैषेषु देवताशब्दस्य स्थाने एकैकं देवताशब्दं पशुशब्दं च कृत्वा प्रयोग उक्तः॥
एवं वनस्पतिः स्विष्टकृत्सूक्तवाकप्रैषेषु प्रयोगः कर्तव्यः॥ तत्रायं विशेषः नानादेवतेष्वपि पशुषु यत्राग्नेरित्यादेः प्रिया
धामान्यंतस्याऽयाडादेस्तदंतस्य बध्नत्रमुष्मा अमुमित्येतस्य च त्रिषु प्रैषेषु भ्यासो न सर्वस्येति॥ प्राजापत्ये त्वग्निवि
त्यासंयुक्ते वायव्यं पशुपुरोडाशं॥ एके वायव्ये प्राजापत्यं तेन पशुदेवतावर्धनत इत्याचार्याः पुरोडाशतन्त्रधात्वो वा
अयमभिप्रायः प्रकृतावग्नीषोमीयपशौ समानदेवतात्वात् पुरोडाशयागस्य पशुदेवताप्रसभिज्ञानात्संस्कार

78

सू॰वृ॰
८०

ह्वेरेण तदर्थता युक्ता। अत्र पुनर्भिन्नदेवतत्वात् न तदर्थता न युक्ता। ततश्च सूक्तवाकप्रैषेषु पुरोडाशेन पशुर्देव
तावर्धनमयुक्तमित्याशंक्य नैव कर्तव्या। प्राजापत्ये पि पशौ प्राकृतकार्यार्थतयैव पुरोडाशयागो विधीयते
त। एवं पशुयागार्थतया तस्य देवतांतरं विधीयमानं प्राकृतदेवताकार्यकरत्वेनैव विधीयते। तत्र यच्छब्दभेदा
दप्रत्यभिज्ञानमाशंक्यते तदपि नैवाशंकनीयं। तदर्थ एवायं शब्दः प्रयुक्त इत्यवगम्यते ऐंद्राग्नमहं पत्नी मि
ति वेद्विष्यतीति तेन पशुदेवतावर्धनं। साचार्याः पुरोडाशतत्प्रधानत्वादिति वदतः सूत्रकारस्येति। अय
मेवार्थः श्रुतौ चोद्योत्तरं भंग्योपपादितः तदाहुर्यदन्यदेवत्य उत पशुर्भवतीति। एवमादिना पवमानः प्रजा
पतिरित्येवमंतेन। पुरोडाशनिगमेषु पुरोडाशवद्वीप्साज्यवर्जयेषां ते न समवत होमाः अथ स्विन्नेकपशुके
पशुकैतंत्रपुरा पुरोडाशस्य स्थानेऽशचर्याज्यधानाकरंभपरिवापामिक्षादयो विहिताः तत्र स्विष्टकृति तेषां
सर्वेषां समवदायप्रचारो विहितश्च तत्र पशुपुरोडाशस्विष्टकृत्प्रैषे सूक्तवाकप्रैषे च पुरोडाशेन देवतावर्धने
कर्तव्ये सति प्रकृतौ पुरोडाशस्य पुरोडाशत्वात् नैव शब्देन वर्धनं कृतं इह तु नानारूपत्वाद्धविषां से न स्वेनैव श

राम॰
८०

ब्देन निगमने प्राप्ते पुरोडाशशब्देनैव चर्वादीनां निगमनं विधीयते। सवनीयानां स्विष्टकृत्प्रैषे सौमिके सूक्तवा
कप्रैषे च अस्य छत्रिन्यायस्य दृष्टत्वादेवमुक्तः। आत्मस्य तु तत्राभावात् दृष्टः प्रयोग इति तस्य स्वशब्देनैव निगमनं भव
ति। आश्वस्य तु पुरोडाशत्वसंभावनैव संदिग्धा। यद्यसंभवस्तदा वर्जनीयस्य यमभाषानुवादानुवादात्प्रादिसंभवति तत्स्व
शब्देनैव निगमनमास्यां पुरोडाशानामाज्यपुरोडाशैरिति। मेधोरभीयाणि तिपश्वभिधाने। मेधोरभीया नित्ये
तेपदे पश्वभिधाने पशोरभिधायके द्रुत्यर्थः। मेधपदस्य विधानं प्रथमप्रयुक्तत्वादस्मैएनमित्येवमादीनां प्रदर्श
नार्थं। रभीया नित्यस्योपमार्थत्वशंका निवृत्त्यर्थं। पश्वभिधाने आदत्त् घसत् इति पाठः कर्तव्यः। प्रगृह्यत्वादस्य प
दस्य। आदत्त् घसत् करत् जुषतामघदन्नभीत् अवीवृधत इति देवतानां। एतेषां पाठो द्विवचनांतानामाम्नायसिद्ध
त्वादेकवचनबहुवचनयोरिग्रहार्थं। आदत्त् आदन् घसत् घसन् करत् करन् जुषतां जुषतां जुषंतां। अघत्।
अक्षन्। अग्नभीत्। अग्नभीषु। अवीवृधत अवीवृधंत॥४॥ कृतायां वपायां सब्रह्मकाश्चात्वाले मार्जयंते निधा
य रंजुमेत्रावरुणः। अस्मिन्नवसरे चात्वाले मार्जयंते। बहुवचनेनैव सर्वेषां मार्जने सिद्धे सब्रह्मकावचनमस्मदीयाः

सर्वे सह मार्जयेयुः नरथ्य कृत्यग्निसेवमर्थः। दंडनिधानवचनं स्रोकानुवचनार्थमात्रस्य दंडस्यात्रैव निधानं न त्रिधाग्ना
गित्येवमर्थः। इदमापः प्रवहत सुमित्र्यामन आप ॐ षधयः संतुदुर्मित्र्यास्तस्मै संतुयोस्मान्द्वेष्टि यं च वयं द्विष्म इति
। इदमापः प्रवहतेत्यनयर्चा यजुषा चोभाभ्यां मार्जनं कर्तव्यं। एतावन्मार्जनं पशौ। एतावदेव मार्जनं नातिदेशिकं कर्त
व्यमित्यर्थः। पश्वधिकारे पुनः पशाविति वचनं पश्वंगभूतायामिष्टौ आतिदेशिकस्य मार्जनस्य प्रवृत्त्यर्थं। नी
र्थेन निष्क्रम्यासीनामा पुरोळाशश्रपणात्। अस्मिन्नवसरे नियम नैवं कर्तव्यं। तेन चरित्वा स्विष्टकृता चरेयुः। च
रित्वेति प्रकृते चरेयुरिति वचनं प्रधानस्विष्टकृतोर्भेदप्रतिपत्त्यर्थं। अतो न्वायात्यानां प्रवेशोस ततितयोरेव मध्ये
प्रवेशः सिद्धो भवति। यदि त्वन्वायात्यानि तेरग्नेश्चरेयुः यद्यस्मिन्नवसरे आगंतवोपागाउत्पद्येते तैः पशु पुरोळा
श स्विष्टकृतोग्रे चरेयुः। तेषामन्वायात्यानीति संज्ञा। एतदुक्तं भवति। यदि पुरोळाश स्विष्टकृतोग्रेयैः केश्चनया
गैश्चरेयुः तान्यन्वायात्यानीति तेषामियं संज्ञा विधीयते। चरेयुरिति पुनर्वचनं चरणमेवैषां कर्तव्यं नान्यन्नि
गमनादिति सूचनार्थं। तदेवोत्तरेण सूत्रेण विस्पष्टयति। न तु तेषां निगमेष्वनुवृत्तिः। अन्वायात्यदेवतानां हविषा

वावाहनादिषु निगमेष्वनुवृत्तिर्नास्तीत्यर्थः। नान्येषामूर्ध्वमावाहनात्पत्नीनां। अन्वायात्येभ्योन्येषामपि आवा
हनकालादूर्ध्वं हविरादि सर्वमुत्पद्यते येषां मापि निगमेष्वनुवृत्तिर्नास्तीत्यर्थः। इळामग्नेपुरुदंसं सनिंगो
र्हीता यक्षदग्निं पुरोळाशस्य स्वदस्व हव्या समिषो दिदीही इति पुरोळाशस्य स्वदेश स्विष्टकृतः। पुरोळाश
स्य पुरोळाशयोः पुरोळाशानामिति हविर्भेदे प्रैषऊह्यः। ऊर्ध्वमिळायाः। ... मनोतायै संप्रेषितस्त्वं त्वं
ह्यग्ने प्रथमः इत्यन्वाह। अत्रेळामुपहूय मनोतामन्वाह। प्रेषितवचनमुक्तप्रयोजनं। हविषा चरंति। तेषां सलिं
गाः प्रैषाः इति प्रैषऊक्तः। तत्र प्रैषे करत एवाग्नीषोमावेवमित्येतरे पिणः। न त्र हविः प्रैषे करत एवाग्नीषोमा
वित्याम्नातं। तस्य एवशब्दस्य स्थाने एवमित्येतरेयिण आचार्या वक्तव्यमित्याहुः। किमविशेषेण नेत्युच्यते
। अन्यत्र द्विदेवतान्मैत्रावरुणादेवते च। अन्यत्र द्विदेवतात्पशोः एकदेवते च। अन्यत्र हि देवतात्पशोः एकदेवते
षु बहुदेवते च पशौ वित्यर्थः। द्विदेवते च मैत्रावरुणादेवते एवमिति वदंति। मैत्रावरुणो देवता यस्य पशोः स मै
त्रावरुणः पशुः। मैत्रावरुणो देवता यस्य स मैत्रावरुणदेवतः पशुः। अत्र मैत्रावरुणग्रहस्य मुख्यत्वादस्यारेव

सू.टी.
८२

लोपनिपातनासंभवात्तुलक्षणया प्रतिपादयति। अनस्तेन शब्देन व्यंजनादिर्हि देवत्यः पशुर्लभ्यते तस्मिंश्चेत्स
र्थः॥ एवं तर्हि षष्ठ्यन्तोपग्रहणं शास्त्रान्तरदर्शनात् तुभ्यं न इत्युक्तं भाष्यकारेण। अत्र कारणमाह। तथादृष्टत्वात्। प्रै
षेकदेवते पुवद्बहुदेवते पुष्ये जनादिर्हि देवते च न तथा दर्शनात् इति मन्यं न इत्यर्थः॥ प्रकृत्या गाणगारिः॥ उक्तं नानां
स्मृत आम्नाये नर्थभेदो निरर्थो विकारः॥ संप्रदायाविच्छेदेनाभ्यस्यमान आम्नाये दृश्यमानानां पदानामर्थ
वशेनानूह्यानां सतां विकार इत्येनान्निप्रयोजनं इत्यर्थः॥ उपन्यासप्रयोजनं एवंविधानां सामान्यतो दृष्ट्वा
भ्यां तिः क्वचिदपि न कर्तव्येति। याज्याया अंतरा धर्वौ वसाहोमआरभेत्। वसाहोमार्थं न त्वावसायनोनरमा
दर्शनावसानस्य तदर्थत्वात् तस्मिन् कृते समापयेत्। वनस्पतिना चरंति प्रैषमभिनो याज्यानुवाक्ये। प्रैषसमा
म्नायेपि वनस्पतिप्रैषः। तमभिनो ये ऋचावाम्नायेते ते वनस्पतेर्याज्यानुवाक्ये भवतः। प्रैषसमाम्नाये पठिते
पि याज्येति समाख्यालवाद्यो नैव कर्तव्या। यजाग्नेराज्यस्यहविषइत्यत्राज्यभागौ। यद्याज्यभागौ क्रियेते तदा
तस्मिन् प्रैषे प्रधानदेवतावदेतौ निगमयेदित्यर्थः॥ एतं त्वेतौ एना नु एनां एते एनाः॥ रमी यांसं रभीयसः रमी।
यांसौ रमी १

स.सू.०
८२

यसीरमीयसीरिवेति अयाग्निरग्नेराज्यस्य हविष इति स्विष्टकृति स्विष्टकृति। इळामुपहूयानुयाजैश्चरंति। इळामु
पहूयेति वचनमानंतर्यार्थं तेन प्रकृति प्राशं दक्षिणाप्रतिग्रहाद्यत्र नास्तीति गम्यते। यातेमैषास्तुती यं प्रैषसूक्तं। एका
दशकादशे हाइहे कादशानुयाजाः॥ नवत्रयः॥ अग्गुत्तमाह्वावपेत्। देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु देवं बर्हिर्वा
रितीनां वसुवने वसुधेयस्य वेतित्ति। एकादशानुयाजा इत्युक्तद्वयोरेवयाज्ययोः पाठात्स्कृती भ्यो अनन्यो वैश्वदेव्या
आहर्तव्याः॥ अनवानं प्रेष्यति। अनवानं यजति पुनरनवानग्रहणमुत्तरसूत्रे प्रैषाधिकारनिवृत्त्यर्थं। उक्तमुत्तमोय
दुक्तमनवानं यजति प्रकृतावेति तद्याज्यायाएवं न प्रैषस्येत्येवमर्थं पूर्वसूत्रे पुनरनवानग्रहणमिति व्याख्यातं। सू
क्तवाकप्रैषपूर्वस्मिन् निगमेगृहं तिस्र त्राज्यभागौ। निगमहित्वात् पूर्वस्मिन्निति विशेषणमत्रेव चनं प्रधानदे
वतावदाज्यभागयोरपि निगमनार्थं। गृहन्निति वध्नंछब्दस्य प्रसाम्नायः। वध्नन्नमुष्मा अमुं बध्नंनमुष्मा अ
मुमिति पशूं श्च देवता श्वानो नादेवतानानाजातीयपशुकेपशुतं त्रे परत्र यस्याभ्यासलाभार्थं पठितस्यापि
पुनरभ्यासपाठः॥ देवताश्चैवैकपशुकाः॥ एकपशुका एकजातीयपशुका इत्यभ्यर्थः। एकव्यक्तिपशुत्वे देवताद्वृति

(८१)

सू.वृ.
८३

बहुवचनं नोपपद्यते। देवता देवता देवतेति न विशेषः। न ह्येकः पशुर्बह्वीभिर्देवताभिः संबध्यते। ननु वैश्वदेवो मारुत इत्यादिपशुरस्ति। सत्यमस्त्याश्रयभेदं न तु देवताभेदः एवं तत्र विग्रहः विश्वेदेवा देवता यस्य स वैश्वदेव इति। अतो जात्यभिप्राय एवैकशब्दः। यत्रैकजातीयपशुका अनेका देवतास्तत्र देवताशब्दमेवाभ्यसेत्। न बभ्रुमपशुशब्दस्यानुयावद्बह्वीर्विभक्त्यूहः कर्तव्यः कर्तव्यः। बभ्रुमग्नयद्वाग्निभ्यां छागाविति। पशू श्वैवैकदेवतानां तत्र अत्र पशुशब्दो नेवावर्तयेत्तन्नान्यो। मयथाबभ्रुं प्रजापतये श्वमजनूपरं गोमृगमिति भवति। उभयोरेकजातित्वे बभ्रुं प्रजापतये छागाविति। न किंचिदभ्यसितव्यं। उतर आज्येनेसाज्यभागो। असुष्मा अमुने त्विपूर्वेणोक्तं। पुरोळाशं पुरोळाशान्। तं तौ तान्। तेन ताभ्यां तैः। पुरोळाशेन पुरोळाशाभ्यां पुरोळाशैः। समाप्य प्रैषमग्नेरादं उमनुप्रहरेदनवभृथे। अवेः। भृथरहिते कर्मणि सूक्तवाकप्रैषं समाप्यानंतरमेवाहवनीये दंडमनुप्रहरेत्। अवभृथेऽन्यत्रा। अन्यत्रेति सावभृथे कर्मणी त्यर्थः। तत्रावभृथे कर्मणीत्यर्थः। न त्रावभृथे नुप्रहरेदित्यर्थः। कृताकृतं वेदस्तरणं। तीर्थेन निष्क्रम्याग्निपशुके तनाप्यवर्यंतोत्त दयशूलमुपोयमानमनुमंत्रयेरंशुगसियोस्माद्विष्यंच राम०

८३

बयं द्विष्मस्तमभिशोचेति। संस्थाजपात् प्राक् तीर्थेन निष्क्रम्याग्निपशुकेन तानिवावयवर्यंतोत्सदयं तौ तं शूलमुदस्यमानं शुगसीत्यनेन मंत्रेणानुमंत्रयेरन्। अनुमंत्रयेरन्सर्वे कर्तारः। नस्योपरिष्टादपउपस्पृशंति हृदीपेराज्ञावरुणस्य गृह्णामि नो हिरण्यय। सनो धृतव्रतो राजा धाम्नो धाम्न इह मुंच इह मुंचतु धाम्नो धाम्नो राजन्नितो वरुण नो मुंच। यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच। मयि वापो मोषधीर्हिंसीरतो विश्वव्यचा भूत्त्वे नो वरुण नो मुंच। सुमित्र्यान आप ओषधयः संत्विति चा वज्राद्वः सुमित्र्यान इत्यस्य कृत्स्नस्य ग्रहणार्थः। तस्योदस्यमानस्योपरिष्टादपउपस्पृशंति हृदीपेराज्ञ इत्यादिभिर्मंत्रैः। अस्पृष्ट्वान वेक्षमाणा असंस्पृशंतः प्रत्यायंतः समिधः कुर्वंते तिस्रस्तिस्र एकैकः। अस्पृष्ट्वा तद्यशूलमनवेक्षमाणास्तमेवासंस्पृशंतः परस्परं प्रत्याव्रजंति। प्रत्याव्रजंति। प्रत्याव्रजंतः सर्वे तिस्रस्तिस्रः समिधो गृह्णीयुः। एकैक इति क्रमेण ग्रहणार्थं। तेन सर्वैर्यायुगपद्गृह्णीयुः। अग्नेः समिदसि तेजोसि तेजो मे देहीति प्रथमामेधोस्येधिषीमहीति द्वितीयां समिदसि समेधिषीमहीति तृतीयां। प्रथमद्वितीयतृतीयग्रहणाभ्याधाने

सू.वृ.
८४

षिप्रथमगृहीतां प्रथममभ्यारध्यात् । एवं द्वितीयां तृतीयामित्येवमार्थो ॥ एत्योपतिष्ठंत आपो अद्यान्वचा
रिषमिति । ततः समिधोभ्याद्धाति यथागृहीतमग्नेः समिदसि तेजोसि तेजो मे दाः स्वाहा । सोमस्य समिदसि
दुरिष्टेर्मा पाहि स्वाहा । पितृणां समिदसि मृत्योर्मे पाहि स्वाहेति । तत इति सर्वेषामुपस्थाने परिसमाप्ते पश्चाद
भ्याधानार्थं । यथागृहीतमिति क्रमग्रहणं यो यः पूर्वं गृहीतः स पूर्वमभ्याधातव्यः न सर्वे
युगपदभ्यादधीतेति । ततः संस्थाजपः ॥ इति पशुतंत्रं । यत पशुमातंत्रस्येनं तंत्रं न पशुविशेषस्येत्यर्थः ॥ द्याप्र
दानानामुक्ताः प्रैषाः ॥ सर्वेत्र प्रदानानामुक्ता एव प्रैषा भवंति नान्य इति । अनिर्देशप्राप्तानां पुनर्वचनं क्वचित्
क्वचित्पशुविशेषे तदर्थनया प्रैषाम्नानं याज्यानुवाक्याम्नानं चास्ति तत्रापि प्रदानप्रैषाः एत एव ग्रहीतव्या
इत्येवमर्थं । तेषां याज्यानुवाक्याः ॥ याज्यानुवाक्या इत्येतावतैव प्रदानानामेवेति सिद्धे तेषामिति वचन
मिति पशावद्दस्मिन् सूत्रे पशूनि धास्यति तेषां पशूनां यानि प्रदानानि तेषां याज्यानुवाक्या वक्ष्यंत इ
त्येवमर्थं । सर्वेषामग्नेऽनुवाक्याः ततो याज्याः ॥ ततो याज्या इत्यनेन विना विनापि शिष्टा याज्या एवं भवति

राम.
८४

वचनप्रयोजनं सर्वत्र पूर्वोक्ताः स्तिस्रः अनुवाक्या उत्तरास्तिस्रो याज्या इति ज्ञापनार्थं । तत्र याज्यायाः पूर्वनिपा
तो ल्पाचुतरत्वादित्स्वर्गेतत्र्यं । रेवतेन पृथुनानात्वं याज्यानुवाक्यालिंगितेरेवतेन वक्ष्यमाणानां पशूनां
नानात्वमित्स्वर्गंतव्यं । अग्ने नय सुपथा राये अस्मानि विद्वू पाहि नो अग्ने पायुभिरजस्रैः प्रवः शुक्राय
भानवे भरध्वं पथा वित्रस्य मनुषो हविर्भिः प्रकारवो मनना वच्यमाना ॥ आग्नेरेतां ॥ अथ सरस्वत्याः ॥ ए
का चेतत्सरस्वती नदीनामुतस्या नः सरस्वती जुषाणा सरस्वत्स मभिनोनेषि वस्यः मस्पोरसाधायसास
स्त एषा पावीरवी कन्या चित्रायुर्येस्त्वे स्तनः शशयो यो मयोभूः ॥ अथ सौम्या ॥ त्वं सोम प्रचिकितो मनीषा
ति हूत्वं नः सोम विश्वतो वयो धाया ते धामानि दिवि या पृथिव्यामपार्क्ष्वं शुत्सुष्टतनासुपप्रियं पाते धामा ।
नि हविषा यजंति । अथ पूष्णः ॥ यो स्तेपूर्वं मावो अंनः समुद्र इति द्वे पूषेमा आशा अनुवेद सर्वाः शुक्रं ते अन्या ।
युजनं ते अन्यल्लप षेपथामजनिष्ट पूषा पथस्पथः परिपतिं वचस्या ॥ अथ बृहस्पतेः ॥ बृहस्पते या परमा
परावदिति द्वे बृहस्पते अति यदर्यो अर्हान्मद्युत्रिया उपवाचः ॥ स चं ते तेसंयं त्सु मेभ्वनयो नवे रुषेवा पित्रे विश्व

83

स.वृ.
८५

देवाय हव्यं। अथ विश्वेदेवानां। विश्वे अद्य मरुतो विश्व ऊत्यानो देवाना सु पवे तुषं स आनो विश्व आस्क्रा
गमंतु देवा विश्वेदेवाः शृणुते मं हवमे ये के च ज्मा महितो अहिमाया अग्नेया हि दूरे मद्रि षणपुः। अथेंद्रस्य।
इंद्रं नरो नेमधिता हवंत इति तिस्र उक्थं रुं नो लोकमनुनेषि विद्वान्त्स्वसा हि षपुरु हूनशत्रून्त्स्वं स्वये का जि
भिश्व प्रणेतः। अथ मरुतां। शुची वो हव्या मरुतः शुचीनां शुद्धिरं मरुतो धीरवं तमा वो होना जो हवीति सतः
प्रचित्रमर्कं गृणते तुराया राइवेद्र्व रस्तो मा अहे धवयावः शर्म शाशमाना यसंति। अथेंद्राग्न्योः। आ वृत्रह
णा वृत्रहभिः शुष्मैरा भरतं शिक्षतं वज्रबाहू उभावामिंद्राग्नी आहुव धैशुविं तु स्तोमं न व जातम घ गीर्भि
र्विप्रः प्रमतिमिच्छमानः प्र चर्षणिभ्यः पृतनाहवेषु। अथ सवितुः। आदेवो यातु सविता सुरत्नः सघानोदे
वः सविता सहावेति द्वे उदीरय कवितमं कवीनां भर्गं धियं वाजयंतः पुरंधिमिति द्वे। अथ वरुणस्य। अवसिंधुं व
रुणो द्यौरिव स्थाद्यं सत्तु भ्यं वरुण स्वधावरुणवावं दस्व वरुणं बृहंतं नत्वा याचि ब्रह्मणा वंदमान इति द्वे अ
सन्याद्या समु दो विश्वेदाइत्येकादशिनाः॥ अग्नेनयो सादयो सन्याद्यामसुरं देव मंता अन्यादि स्व

एम०
८५

स्याः एकादश षड्ऋचा आम्नाताः तैरेकादश पञ्चो विहितो भवंति। तेषां समाहार एकादशिनी स्तुभतं तस्यां भ
वा एकादशिनाः इत्सुक्त॥ ७॥ अग्नीषोमाविमं सुमे युवमेता भिंनिदिवि रोचनानीति तृचा वावां मित्रावरु
ण रुणा हव्य जुष्टि माया तं मित्रावरुणा सुशस्त्या नो मित्रावरुणा हव्यजुष्टिं युवेव स्त्राणि पीवसाथेभवा
हवा सिस्नं जीमे नो यद्वं हिष्टं नाति विषमुशान् हिरण्यगर्भः समवर्तताग्र इति षड्ऋग्जापत्या आश्विनं रेवा
नामुद्गाद नीक मिति पंच शं नो भव वचसा शं नो अद्य वातो भूष शुचिपा उपनः प्रयाभियो सि राभ्यां समच्छा
नो नियुद्भिः शतिनीभिरध्वरं पीवो अन्नां रयिवृधः सुमेधा श्वेनुं यं जन्नतु रोदसी मे प्रवायुमच्छा बृहती मनिषा
नववायवष्टत स्यते त्वां हि सुत्सरस्तम प्रितिद्वे कुविदंग नमसा येव धासई शानाय प्रहुतिं यस्त आनट् प्र वो वायुं र
थयुजं कृणुध्वमुत्वामदिन्ते मत्पुनेहोन उरुव्रजे दितिर्घ्ये जनि भसुत्रामाणं पृथिवीं द्यामनेहसं महीमषु
मातरं सुव्रतानामदितिर्द्यौरदितिरंतरिक्षं नतेविष्णो जायमानो न जातस्त्वं विष्णो सुमतिं विश्वजन्यांविच
क्रमे पृथिवीमेष एतां त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतं विश्वं कर्म

सू.सू.
९६

हविषावावृधानऽइति द्वे विश्वकर्मा विमना आद्विहायाः किंस्विदासीदधिष्ठानं यो नः पिता जनिता यो विधाता या
ते धामानि परमाणि यावमा यदिमे द्यावापृथिवी जनित्री तेन स्तुरीयम पुपोषयित्नु देवस्त्वष्टा सविता विश्वरू
पो देवत्वष्टेन्द्रवारु त्वमानट्रूपि शंगरूपः सुभरो वयोधाः प्रथमभाजं यशसं वयोधां सोमापूषणा जननारयी
णामिति सूक्तमादित्यानामवसा नूतनेन मा गिर आदित्येभ्यो घृतस्नूरादित्यास उरवो गभीरा इमं स्तोमस
क्रतवो मे अद्य मित्रो भूमी धारयन्त्री रत्नघृं न दक्षिणा वि चिकिते न सव्या मही द्यावापृथिवी इह ज्येष्ठे ऋतं दिवे
तद्वोचं पृथिव्या इति द्वे प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्वे प्र द्यावा यज्ञैः पृथिवी ऋता वृधा मही नो रुद्रेण नोम
यस्तृपीतिर्द्वे आ ते पितर्मरुतां सुम्नमेतु मा बभ्रो देव वृषभाय श्वितीचद्दुतिस्त्र आपश्चातानासस्तापुरस्ताद्गो
मतानासस्तारथेनेति चतस्रो हिरण्यस्तूपो धुवर्णो घृतस्नु रभिक्रन्देन्द्र भूरयं स्त्वमहां इन्द्र त्वं ह स्थाः सत्राहणं दा
धृषिं तुम्रमिन्द्रं सहस्रानुं पुरुहूत क्षियन्तं स्तुतमिन्द्रो मघवा यद्धवृत्रा भूरीण्येको अप्रतीनि हन्ति ... चेतना
निपतं गोधा चं मनसा विभर्ति चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवीयं निति द्वे देवीं वाचमजनयंत देवा जनीयं

रम०
९६

तो नेमन्वद्ग निति स्तो दिव्यं सुपर्णं वायसं बृहन्तं सवाहधे नर्यो योषणामुपस्य अग्ने तं पशवोऽयंत्रि सर्वे यस्य व्रतमुपतिष्ठ
न्त आपः। यस्याग्ने ते पुष्टिपतिर्निविष्टस्तं सरस्वंतमवसे हुवेम। अत्र अष्टादशपङ्क्त्या आम्नाताः। तैश्चाष्टादशपशवो।
विहिता भवंति। तत्राम लिंगत्वात् प्राजापत्याद्द सूक्तं। इति पशवः। इत्येतद्याज्यानुवाक्या लिंगकल्पितदेवतास्य पशवो
स्मिन् सूत्रे विधीयते। एतेषां को नविंशत्पशवः निर्मिते ऐन्द्राग्न इत्यस्मिन्श्च कोविधास्यते तेन च सह त्रिंशत्पशवोऽस्मि
न् अध्याये विहिताः तत्रैकादशिनो गणात्मकत्वात् गणाएवाम्नातोनैकैकः पशुस्तेषां एतदुक्तं भवति। एकादशि
नी गणाम्नाता आग्नीषोमादय श्चैकैकश आम्नाता निरूढश्चाम्नातः अन्ये च केचनास्मिन् गणस्थपशव आम्नाताः
तेषु सर्वेषु पौर्णमास मेव तं। असमाम्नाते षष्ठार्थात् कल्प्यंतत्रं। सौम्याश्च निर्मिताश्च सौम्याः सोमांगभूता इत्य
र्थः अस्मिन्नुखंडवे हृदयेये पशव आम्नाता स्तेषां केचित् सोमांगभूताः केचित्स्वतन्त्रा इत्यर्थः। निर्मितं ऐन्द्राग्नः। ऐन्द्रा
ग्नो निरूढो नाम पशुः कर्तव्यः। अयमपि पशुः पशूनां प्रकृतिः तेनांगभूतानामग्नीषोमीयः प्रकृतिः स्वतन्त्राणां नि
रूढः प्रकृतिरिति तिष्ठेव पश्चिषिर्नांगभूतेष्विसे व मर्थ निरूढा प्रकृति त्वाम्नानां। पात्रामास्यः सां वत्सरो वा। सोयंनि

८७

सू॰ वृ॰
८७

रूढः षट्सु षट्सु मासेषु कर्तव्यः संवत्सरे वा। अतो वीप्सावचनात् लिप्सोऽयं पशुरिति गम्यते। प्राजापत्यस्तु पांशुसावि
त्रसौर्य वैश्वकर्मणाश्चैतेषां नत्रो पांशुयाजविकारान्वक्ष्यामः। ऐषु वैपुंक्तो विकारः पांशुकेषु नं त्रेषु इदानीं विकार उ
च्यते। प्रैषादिराग्नुरस्थाने। आग्नुरोयत् स्वरस्थानमुच्चैस्त्वं नाम तामतत्त्वे षादेरपि भवति। उच्चैरिति वक्तव्ये आग्नुरः। स्था
नइति। वचनमाग्नुः परिमाणे हि पद एव प्रैषादिशब्दवाच्य इति ज्ञापनार्थं। आदद्धसत्करदितिचेतानि यथास्थानमेव
पांशु। एतामीति वचनमाददादीनां सप्तानां ग्रहणार्थं यथास्थानवचनं। सर्वत्रैष परिग्रहार्थं च शब्दो विकारसमुच्च
यार्थः कस्यचिदुच्चैस्त्वविधानात् कस्यचित्पांशुत्वविधानाद् न्यस्यतं त्रस्वरत्वं भवति। तिन प्रधानो पांशुषु आददादे
रनदुच्चैर्भवतीति तत्रो पांशुषु प्रैयादेरन्दुरं पांशु भवातीति सिद्धं॥८॥ सौत्रामण्यां। सौत्रामणीति कर्मनाम तस्यां वि
धिर्वक्ष्यत इति संबंधः। आश्विनसारस्वतैन्द्राः पशवः॥ बार्हस्पत्यो वा चतुर्थः॥ ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः। आ
श्विनसारस्वतैन्द्राणामेते ऐन्द्रादयः पशुपुरोडाशा यथासंख्येन भवंति। बार्हस्पत्यस्तु स्वदेवतएवान्यस्याविधाना
त्। मार्गेर्जयित्वा पुर्वं सुराममश्विनेति ग्रहाणां पुरोनुवाक्या होता यक्षश्विना सरस्वती मिंद्रं सुत्रामाणं सोमानां सुरा

राम॰
८७

मणां जुषंतां मंत्रु पिबंतु सोमं सुरामणो होतर्यजेति प्रैषः पुत्रमिव पितरावश्विनोभेति याज्या। मार्जनं चात्वाले मार्जनं त
त्कृत्वा ग्रहैः प्रचरेयः ते चाश्विनसारस्वतैन्द्रास्तेषामेता अनुवाक्या प्रैषयाज्या उक्ताः याज्यादीनां त्रिदेवतालिंगत्वात्तैः सह प्र
चारः ऐन्द्रे वीहीत्यत्र वषट्कारः सुरासुतस्याग्ने वीहीति वा। मध्नाहि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योम
ति। सुरात्वमसि शुष्मिणी ति सुराम वेक्ष्याधोवाहू सोमएष इति सोमं। सोममवेक्षेतेति शेषः तानाहि वामिति। कुम्भी
स्थां सुरामवेक्ष्य ततो वाहू अधोक्षं त्वा ग्रहपात्रस्थां सुरामवेक्षेत सोमएष इत्येनेन मंत्रेण ऋषयण ऋष्यमात्रिरात्रवास
नऊवीकरणपावनश्रयणोर्ध्वपात्रसंवंधात् सुरैव सोमस्त्राद्वेनोका यदत्र रिप्तं रसिनः सुतस्य यदिंद्रो अपिबच्छ
चीभिः इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामीति भक्षजपः। भक्षयेदिति वक्तव्ये भक्षजप इति वचनं। पयो
ग्रहेषु पि अस्य मंत्रस्य प्रापणार्थं। प्राणभक्षोत्र। अत्रेति वचनं सुराग्रहेष्वेव प्राणभक्षो भवति पयोग्रहेषु प्रत्यक्ष
भक्षएवेति प्रदर्शनार्थं अस्मिन्कर्मणि केषांचित्पशुपुरोडाशानां संति ग्रहा एव तेषां पशुपुरोडाशकार्यं भवतीती
ति। अस्मिन्कर्मणि केषांचित्लेषामसंति तत्रापि मैत्रावरुण एवाकर्त्रा शूप मूहा। यावद्वचनमपोद्युत इति नग्रहति पात्रमे

(८)

वावतिष्ठते। आदेशस्तु कर्तव्य एव। अथैवं सति तन्नैवादेशस्य कृतत्वात् याज्यायामादेशप्रतिषेधः कृतः। असति तस्मिन्याज्या
यामादेशः कर्तव्य एव। कौकिल्यां तु सौत्रामण्यां प्रयाजादीनां प्रैषादयः एके चत्वार इत्यर्थं तस्यैवाम्नाताः न त्वापि यावदाम्ना
तं तत एव न्यूनहीनं यदितरत्सर्वं प्रकृतिप्राप्तमेवेति सिद्धं॥८०॥ विध्यपराधे प्रायश्चित्तिः। प्रायश्चित्तिरित्यधिकारोऽयमाध्या
यपरिसमाप्तेः। विधिशब्देन विहितमुच्यते। अपराधोऽन्यथाभावः। अभावो वा। विहितस्याकरणे अन्यथाकरणे च प्राय।
प्रायश्चित्तिः कर्तव्या। प्रयो विनाशः। चित्तिः संधानं। विनष्टसंधानं प्रायश्चित्तिरित्युक्तं भवति। विध्यपराधे प्रायश्चित्ति
रित्युक्तं भवति। विध्यपराधे प्रायश्चित्तिरिति किमर्थं। अपराधे सति तदर्थं तया विहितमस्ति चेत्तदेव कर्तव्यं। तन्नास्ति चे
त्तदेव कर्तव्यं। व्याहृतिहोमः कर्तव्यः। तस्मादेवैव यज्ञे प्रायश्चित्तिः कर्तव्येति वचनात्। विध्यपराध इति वचनाद्धि वि
संपादने प्रायश्चित्तिर्नास्ति। यथा यदि वा साग्निहोत्र उपसन्नरुत्स्यात् एवं नरागमनं निषेधावसरे यजमानस्यांतरा
गमनं विहितं तस्मिन्वा समयमित्यर्थः। कालस्य प्रायश्चित्तिनां नैमित्तिकत्वान्निमित्तानंतरं कर्तव्यानीत्युत्सर्गः। शिष्टा
भावे प्रतिनिधिः। शिष्टं विहितमित्यर्थः। तस्याभावे प्रतिनिधिरूपादानं। अभावश्चेत्तावत्तेषु सिद्धं शिष्टग्रहणं

यत्कार्यार्थं तया यद्विहितं तस्य स्वरूपसत्तायामपि तत्कार्याशक्तौ प्रतिनिधिरूपादानस्य प्रयुक्त्येवेत्येवमर्थं। अर्थद्रव्यविरो
धेऽर्थो बलीयानित्ययमपि न्यायोऽर्थात्तत्र मुख्यादितौ भवति। इदं चापरं कार्यसामर्थ्ये सति च गुणसंपादनार्थं उपादा
नं स्यात् इति प्रतिरेकाल्लुप्यते। अत्रापि न्यायांतरं मुख्यादितं भवति द्रव्यगुणविरोधे द्रव्यं बलीय इति। प्रतिनिधीयत
इति प्रतिनिधिः। एतदुक्तं भवति यत्कार्यार्थं तया यद्विहितं तस्य तत्कार्याशक्तौ तस्य यत्प्रतिरूपं तत्तत्कार्यकरणा
योपादानस्यमिति। अनेन प्रकारेण स्वादृशः प्रतिनिधिरुक्तो भवति। न्यायादेवायमर्थो लभ्यते शिष्टाभावे प्रतिनि
धिरिति वचनस्येदं प्रयोजनं प्रतिनिधिप्रयोगेऽपि विहितस्वरूपापचाराद्विध्यपराधशंकानिवृत्त्यर्थं। अनस्तत्र प्रा
यश्चित्तिर्न कर्तव्या विधिशक्तिरेवं रूपा विपरिणमते नात्र विध्यपराधोऽस्तीत्येवमर्थं सूत्रप्रणयनं। अन्वाहिता
ग्नेः प्रयाणोपपत्तौ पृथगग्नीन्नयेयुः। अन्वाहिता अग्नयो यस्य सोऽयमन्वाहिताग्निः तिष्ठिमध्य इत्यर्थः तस्य प्रयाणो
पपत्तौ अग्नीन् पृथग् नयेयुः प्रत्यक्षं च पृथग्ग्रहणं असंसर्गार्थं। उपपत्तिवचनमतात्स्वाधीनमगमनसूचनार्थं। चोरा
ग्न्यादिभयात्तत्क्षणमपत्त्रवस्तुमशक्यमिति यदिमत्र कमापद्यते तदेष्टिमध्ये प्येतेन प्रकारेणाग्नीन् गृहीतांगतम्।

सू॰वृ॰
८९

।अन्यथा कर्ममध्ये न गंतव्यमित्येवमर्थमुपपत्तिवचनं।तुभ्यं ता अंगिरस्तमेति वा आहुतिं हुत्वा समारोपयेत्।एतामाहुतिं हु
त्वा समारोप्य गंतव्यमित्यर्थः।प्रत्यक्षनयनमाहुतिहोमो नास्ति समारोपणस्वरूपमाह।अयं ते योनिर्ऋत्विय इत्यरणी गार्ह
पत्ये प्रतितपेत्।पूर्वमेव हि अरणी गार्हपत्ये प्रतितपेत् नाग्न्यंतरोपरि दक्षिणाग्निर्भिन्नयोनिः न तत्र स्यात् एवं तरे॰ मैवैव मं
त्रेण समारोपणं भवति।पाणी वा या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मानमच्छा वसूनि कृण्वन्नर्या पुरूणि यज्ञो भूत्वा यज्ञ
मासीद स्वां योनिं जातवेदो भुव आजायमान इति।द्वौ पाणी गार्हपत्ये सकृदेव प्रतितपेत्।द्वयोरपि च समारोपणं यजमान एव
कुर्यात्।पूर्वमंत्रस्य प्रत्यगाशीष्ट्वात् उत्तरस्य चात्मानमिति लिंगात्कर्त्रैव रविप्यभावाच्च।एवमात्मन्याहिताग्निरहुत्वा स
मारोप्य गमनं प्राप्तो गच्छेदिति शेषः।अतो न त्वाहिताग्नेः प्रत्यक्षयत्नं नास्ति प्रयाणकाले।विहारदेशे पि यत्कापि संचार
यितव्यः शुश्रूषुता संचारयितव्यः।अपि तु तस्य गार्हपत्यस्येव नियमो विहृतानामपि सर्गैर्वे धां युगपल्लयप्रवृत्तेनैव भव
ति त्रैकैकस्य नयेन।अनसानयने कचित्प्रत्युच्छ्रूसनियमो नास्ति तेन अनेनैव प्रकारेणाग्नीन् सर्वदा नयेत्।अन्यथान
यनेऽग्नीनां लौकिकत्वाशंका स्यात्।यदि पाण्योररणी संस्पृश्य मंथयेत्प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनः

रामा॰
८९

प्रजानन्।प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शंयोरिति।अरण्योर्हस्तयोर्वा समारोपणमुक्तं।तत्रावरोहण
काले यजमानः प्रत्यवरोह जातवेद इत्येतं मंत्रं हुत्वा मंत्रांतेन तयोररण्योरग्निं मंथयेत्।तत्र यं वा मंथयेत्।एवमरणीसमा
रोपणे।यदि हस्तयोः समारोपणं स्यात् तदैतेन मंत्रेणारणी संस्पृश्य मंथयेद्यजमानः मंथनकाले यावदग्निर्जन्यते
तावद्धरणी संस्पृश्य वा तेन मथ्यमाने गौणत्वादनसमर्थः प्रयत्नो निष्फलः स्यात्।तदा पुनरारंभावसरे मंत्रआ
वर्तयितव्यः।एवं समर्थेऽसमर्थे पुनः पुनरावर्तयेत्।अग्न्यवरोहणार्थमरणी मंथयेदित्येकोऽर्थः।यदि पाण्योः समारोपणं
तदैवमवरोहयेत्।पाणिभ्यामरणी अनेन मंत्रेण संस्पृश्य मथयेदित्यपरोऽर्थः।आहवनीयमवदीप्यमानम
वा कश्चित्परासादिदं तत एकं परकृतमेकमिति संवपेत्।आहवनीयस्यैकदेशः समभ्यावायत्यायतनाद्दृष्ट्वा वा
कश्चित्परासादिदं बहिर्गच्छेत् तदा तमिदं तदेकं इत्वा यतने संवपेत्।ततः सममस्याभिर्व्यात्तत्तिभिर्होमः कर्तव्यः।
अग्नीनां सर्ववेदसंबंधित्वात्सर्वत्र विनष्टसंधानं हि विधं।आयतनात्परास्याग्नेः पुनः प्रक्षेपात्संदिग्धं संधानं
तत्रैव व्यात्तत्तिभिर्होमादर्तीप्रियं।अतो यत्र यागो होमो जपो दानं दक्षिणारूपं वास्ति तत्र तैरेवानीन्द्रिय संधानं शः

(८८)

सू.वृ.
९०

सिध्यति। यत्र लेपा मन्यनमन्त्रास्ति नत्र्यात् तिहोमेनानीद्रियां शसंधानं कर्तव्या आहवनीयं गृह्णाराद्यं नरेनैन नन्द्राय
ग्निं नीत्वा तत्र तूष्णीं प्रक्षिप्य स्यात् तिहोमः कर्तव्यः। तस्याश्च विध्यपराधत्वात्। दीप्यमान वचनं यावत् स्थायाग्निर्नं न विस्फु
लिंगाश्च त्रस्यिले वमर्थः। यदि लक्ती यादृश्यमावास्यां पौर्णमासीं वा नीयाद्यदि वान्यस्याग्निषु यजेत यदि वा स्यैस्यो ग्निषु
यजेत यदि वा स्यान्योग्निरत्नीन्यवेयाद्य दिवास्याग्निहोत्र उपसंनेह वि षिवानि रुष्मेव क्रीवत्सूपुरुषोवा विहार मंतरि
याद्यदि वाथे प्रमीयेत तेष्टिः। उक्तं शम्यापरादेशमनति क्रान्तस्या अतिक्रान्तस्य इद मुच्यते। यदि लक्नीयात् छम्यापरासदेश
मित्यर्थः। यद्यमावास्यां पौर्णमासीं वा स्वकाले कृत्वा नीयात्। अन्यस्याग्निषु यागं कुर्यात्। अन्याग्निषु न्योवा यजेत्
। अस्याग्नीनन्योवाग्निर्व्यवेयात्। यस्याग्निहोत्रमेकु शोपूपसादिनेदर्शपौर्णमासादिषु वा हविषि निरुप्ते च क्रीवत्तर
पशकलादिश्वावा पुरुषो मनुष्य जातिः स वाऽग्नी नामधेनाग्निकोमेत। यदि वा यजमानो ध्वनि प्रमीयेत यस्मिन्
न्नाप आसतेन तस्मां द्वा मंतरे म्रियेत इत्यर्थः। एतेषु निमित्तेष्विष्टिं कुर्यात्। अग्निः पथिकृत्। तस्यामियं देवता अग्निः प
थिकृत् गुणः। वेत्था हि वेधो अध्वन आदेवानामपि पंथामगन्मेति। अनड्वान् दक्षिणा। शकटवहनसमर्थो नड्वान्दक्षि

रामः
९०

णा। अथवा यत्ल न ग्निनाप्राग्निष्टेगो मंतरे णातिक्रमयेत्। अग्निं च क्रीवत्स्पुरुषैर्व्यवायेद्वष्टिरुक्ता। न त्र अग्निवर्जितैर
न्यैर्व्यवायेगवातिक्रमणं भस्मराजाउदकराजिभ्यां संतानमनुगमयित्वा प्रणयनमुपस्थानमिति विशेषः। व्यवायेत्ल
यमप्यरो विशेषः। भस्मना शुनः पदं प्रतिवपेदिति। एतेपदार्थो निमित्तानंतरमेकर्तव्याः। ततो वर्तमानं कर्म समा
प्येष्टिः कर्तव्या। (तितो) ष्टिः कर्तव्या दर्विहोममध्ये एषविधिः। इष्टिमध्ये तु न देवतं त्रमुपजीव्येत त्रैव तैवपथिकृत्त्कार्यः
। प्राग्निगिष्टेरिति वचनं पूर्वोक्ता या अपीष्टेः प्रागेवैते पदार्थाः कार्या इसेवमर्थः। भस्मना श्वनः पदं प्रतिवपेदिदं विस्तर्विच
क्रमदूति। शुनो यावन्ति पदानि तानि भस्मना प्रतिवपेत्। पूरयेदित्यर्थः। प्रतिपदं मंत्रावृत्तिः। गार्हपत्याहवनीययोरंत
रं भस्माराज्या उदकराज्या च संततया तंतुं तन्वन्नजसो भानुमन्विहीति प्रतिराजि मंत्रावृत्तिः। अनुगमयित्वा हवनीयं
पुनः प्रणीयोपतिष्ठेत यदग्ने पूर्वं प्रहितं पदं हि ते सूर्यस्य रश्मीनन्वाततान। तत्र रयिष्ठामनुसंभवेतं सं पूनः सृजसुम
त्या वाजवत्या। त्वमग्ने सप्रथा असीति वा राजिभ्यां संतानं कृत्वाहवनीयमनुगमयेत्। ततः प्रणीयोपतिष्ठेतायेद
ग्नेपूर्वं त्वमग्ने सप्रथा असीति च ऋग्भ्यां वशब्दः पूर्वां तद्वृत्तिकाराभावात् त्वमग्ने सप्रथा असि इत्यस्य पूर्वमंत्रेश

८९

सू.वृ.
९१

पोशंकानिवृत्त्यर्थः। इतरेरपि स एव त्विहारः प्रायश्चित्तउत्पन्ने सर्वं प्रवृत्ता अग्नयो मा पवृज्यंत इति अस्यार्थस्य सा
धनार्थमुत्तरत्र वक्ष्यति। अनुगमपित्वा वाहवनीयं पुनः प्रणयेदिति। अध्वे प्रमीतस्याभिवान्यवत्साया: पयसा॥
ग्निहोत्रं जूहुंनीसर्वहुतं जुहुयुरासमावायात्। पथिहुतं कृत्वात स्मिन्नेव विहारे जूहुंनी धर्मकमग्निहोत्रं नाम कर्मा
तरमनेन विधीयते। न त्वस्यैव मग्निहोत्रं व कर्तव्यं। सर्वहुतत्वं तु विशेषः। अतो नात्र भक्षोस्ति। कालश्च संयंप्रात्तरं
वा सांगं प्रधानं जूहुंसी॥ प्रधाने प्रजापतिध्यानं कर्त्तव्यं। अभिवान्यवत्सा नाम अन्य वत्सेन दोहनीया। अभिवान्यो व
त्सो यस्याः सा अभिवान्यवत्सा। अभिवान्यो भजनीय इत्यर्थः। आसमवायादिति आशरीरस्याग्निसंबंधादित्य
र्थः। यद्याहिताग्निरपरपक्षे म्रियेत ताहुतिभिरेनं पूर्वपक्षं हरेयुः। यद्याहिताग्नेरपरपक्षे मरणशंकास्यात्तत
दातस्यावशिष्टा आहुतीः पक्षहोममन्यायेन हुत्वा ऽमावास्यां च हुत्वा कर्मभिरेव मेनं पूर्वपक्षं नयेयुः। आहिताग्निग्र
हणमन्या अप्यनाहिताग्नेरपरपक्षाश्रिता यानि त्याहुतयस्ताः सर्वा होतव्या इत्येवमर्थं। एष पूर्वोपि कृतानां का
लापकर्षो विधीयते। ते न जीवत एवमरणशंकायामेतदिति गम्यते। मृतस्यानधिकारात्। अत एव पूर्वसूत्रे अ

राम०
९१

ग्निहोत्रनामकं कर्मांतरमिस्युक्तं। हविषां व्यापन्नानामाज्येनैषिंसमाप्य पुनरिज्या। आवाहनादूर्ध्वं प्रधानयागार्दर्वा
ग्यदि हविर्व्यापद्येत तस्याप्रधानयागादि सर्वमाज्येन समापयेत्। अव्यापन्नानि च यथापूर्वं समापयेत्। एवं समा
प्य ततो व्यापन्नहविर्मात्रस्यैवाग्न्यन्वाधानादि पुनर्यागः कर्त्तव्यः। एवं द्वयोर्बहूनां व्यापत्तौ कर्तव्यं। हविषामिति ब
हुवचनमविवक्षितं। ब्राह्मणेन च सर्वशब्दो स्य प्रायश्चित्तस्य सर्वहं विषुप्रापणार्थो नैकस्मिं द्वयो र्वा प्रतिषेधार्थः। इ
ष्टिग्रहणं प्रधानयागे कृते शेषकार्ये वा केवले हविषि व्यापत्ते आज्येन समापनं कुर्यादित्येवमर्थं तत्र पुनर्यागो न भ
वति। व्यापन्नानि हवींषि केशनखकीटपतंगैरन्यैर्वा वीभत्सैः। अन्यैर्वा वीभत्सैरिति वचनात्केशादिभिरपि वीभत्सै
रेवेति गम्यते। तेनाच्युतकेशनखसंसर्गो न दोषाय भवति। तथा कीटपतंगैरप्यमेध्यनिवासिभिः संसर्गः। न अन्यै
र्वा वीभत्सैरिति वमनादीन्युच्यन्ते। एतैः संसर्गे हवींषि व्यापन्नानि भवंतीत्यर्थः। वीभत्सैरित्येतावतैवास्मिन्न
र्थे सिद्धे केशादीनां पृथग्ग्रहणं केशादिसंसर्गस्मृत्युक्तः शुध्युपायो यः स इह विषिन भवती त्येवमर्थं। भिन्नानि वाभि
च सिक्तानि च हवींषि दुष्टानि भवंति कठिनेषु भेदनं द्रवेषु क्षरणमिति। अपो ऽभ्यवहरेयुः। दुष्टानि हवींषि अप्सु प्रक्षिपे

९८

इत्यर्थः॥ एते षां प्रतिपत्तिः॥ प्रजापतेर्न त्वदेतान्यन्य इति वल्मीकवपायां वा सान्नाय्यं मध्येमेन पलाशपर्णेन जुहुयात्॥ सान्नाय्यं दुष्टं मध्येन पलाशपर्णेन प्रजापत इत्यृचा स्वाहाकारान्तया वल्मीकद्वारे प्रतिसिंचेत्। अप्सु वान्तमी मिति विकल्पः॥ मध्यमग्रहणं द्विपर्णस्य मा भूदित्येवमर्थं विष्यंदमानं महीद्यौः पृथिवी च न इत्येतेन॥ परिधि देशे निवपेत्पांसुः॥ द्विविधं विष्यंदनं सिक्तमसिक्तं च॥ किं तद्दुष्टमन्यद्दुष्टं। यद्विष्यंदमानं कुंभीमतीत्य सा द्यौः पृथिवी वा प्राप्नुयात्तत्सिक्तं भवति। तत् दुष्टं चान्यदेव यत् कुंभ्यां बहिर्गमनमात्रेण विष्यंदते तदसिक्तमदुष्टं च। यद्विष्यंदनेन दुष्टं वा यद्विष्यंदनेन दुष्टं नरे वं प्रतिपादयेत्तां मही द्यौरित्यनया चौनः परिधिदेशे निषिंचेत्। देशग्रहणं परिध्यभावेपि तस्मिन्देशे निनयनार्थं। अन्यतरा दोषेभ्यास्तिच्य पवेरन्॥ अदुष्टे प्रातर्दोहे एतद्भवति। न प्रातर्दोहस्य दोषे। तस्मात्प्रातर्दोहं भ्यासिंच्य हूयोः पात्रयोः कृतातयोरन्यतरत्। दधिभावाया न यता भ्यां दधिपयोभ्यां प्रचरेयुरित्यर्थः॥ अत एवादुष्टे प्रातर्दोहे इत्युक्तं। पुरोडाशवात तत्स्तेनापयसि दुष्टे एतदेव भवति पूर्वोक्तस्यासंभवेन नयत्बाधितविभापेयं। उभयदोष ऐंद्राग्नं पंचशरावमोदनं। सान्नाय्यहूये दुष्टे पंचशरावपरिमितान्व्रीहीन्निर्वपेदिंद्राग्निदेवत्यो दत्तसिध्यर्थः। तयोः पृथक्प्रचर्यां तयोरिंद्राग्न्योर्हविरुत्पत्तौ

सहोद्दिष्टयोरपि प्रचारकाले तस्मादेव हविषस्तयोः पृथगेव यागः कर्तव्य इत्यर्थः। तत्राग्निर्वे देवतानां प्रथमं यजेदिति श्रुतेरग्निरिंद्रं यजेत्। ऐंद्रमेतस्ये के। एके ऐंद्रमेव पंचशरावमुत्साद्य प्रवासेंद्राग्न्योः पृथक्कृत्य आचार्या आहुः॥ अत्राप्यग्निरेव प्रथमं यष्टव्यः॥ अस्य पक्षस्येयं श्रुतिर्मूलं यस्योभयं हविरार्तिमार्छेतैंद्रं पंचशरावमोदनं निर्वपेत्। अग्निं देवतानां प्रथमं यजेदिति। अस्यां श्रुतावग्निया गस्यानुवादत्वेनापि संभवादैंद्रमेव निरुप्य इंद्रायैव यष्टव्यमिति केचित्सूत्रार्थं वर्णयंति। वत्सानां धाने वा यवाग्वां। सान्नाय्यार्थमपाकृतानां वत्सानां पाने वायुदेवत्याय वाग्वं निरुप्य तया यष्टव्यमित्यर्थः॥ सर्वपाने एतत्प्रायश्चित्तं। पीतशिष्टमेव हविः पर्याप्तं चेत्स्यादाहुतिहोम एव। तया यवाग्वः॥ यथागवायां गच्छता पुनर्यागः कर्तव्यः॥ अग्निहोत्रमधिश्रितं सवदभिमंत्रयेत गर्भं स्रवंतमगदमकर्माग्निहोत्रात्पृथिव्यंतरिक्षं यतश्च तदग्नावेवर्तं माभिप्राप्नोति निर्ऋतिं परस्तादिति। अधिश्रितमग्निहोत्रद्रव्यं स्थाली मूलेन यदि स्रवति तदनेनाभिमंत्रयेत गर्भमिति॥ २०॥ यस्याग्निहोत्रमुपावसृष्टं दुह्यमानोपविशेत्तामभिमंत्रयेत यस्माद्भीषा निषीदसि ततो नो अभयं कृधि पशून्नः सर्वान्गोपाय नमो रुद्राय मीढुष इति। उपावसृष्टा दुह्यमाने त्युभयं विशेषणं व

सू०वृ०
९३

त्सं संसर्गो द्याद्दोहनपरिसमाप्तेरेतस्य प्रापणार्थे। यस्येति ब्राह्मणानुवादः। अथैनामुत्थापयेदुदस्थाद्देव्यदितिरा
युर्यज्ञपतावधात्। इंद्राय कृण्वती भागं मित्राय वरुणाय चेति। अथेति संबंधार्थः। यो भिमंत्रयेत स एवोत्थानमपि
कुर्यात्। यजमान एवोभयं कुर्यात् होमकर्ता वेत्येवमर्थं। अथास्या ऊधसि च मुखे चोदपात्रमुपोह्य दुग्ध्वा ब्रा
ह्मणं पाययेद्यस्याभोक्ष्यन्स्याद्यावज्जीवं संवत्सरं वा। ऊधः स्तनप्रदेशः। अग्निहोत्र्या ऊधसि मुखे च समीपे उ
दपात्रमुपहृत्य दुग्ध्वा तत्पयो ब्राह्मणं पाययेत्। यस्यान्नं यावज्जीवं न भोक्ष्यमाणो भवेत्। य एतत्पयः पिबति तस्यान्नं
यावज्जीवं नाश्नीयादित्यर्थः। संवत्सरं वा नाश्नीयात्। अत्र कालानाम्नानाद्यावज्जीवमित्युक्तवानाचार्यः। संव
त्सरं व्रतं नात्येतीति सामान्यानुवादात् संवत्सरवचनं। अथ शङ्कुः पूर्ववत्। वाश्यमानायै यव संप्रयच्छेत्सूयवसाद्
गवती हि भूयाऽइति। एतदप्युपावसर्गादिही दोहनपर्यंतमेव। वाश्यमानायै शाद्यायवसो भक्षः। शोणितं दुग्धं
गार्हपत्ये संधाप्यान्येन जुहुयात्। संक्षाम्येति यावत् निरवशेषं भवति तावद्दोहयित्वान्येन द्रव्येण जुहुयात्। अत्रा
न्य वचनात्पूर्वं व्रतं वा अन्यां वा पुनर्दुग्ध्वा पयसैव जुहुयात्। तच्चैवं ब्राह्मणं। अथैनां ब्राह्मणाय दद्यादिति। तद्

राम०
९३

नं पूर्वोक्तेन पयःपानेन विकल्प्यते दानपक्षेऽन्यामेव दुग्ध्वा जुहुयात्। भिन्नं सिक्तं वाभिमंत्रयेत समुद्रं वः प्रहिणोमि।
स्वां योनिमपि गच्छत। अरिष्टा अस्माकं वीरा मयि गावः संतु गोपताविति। स्थालीभेदेन विक्षिप्तं द्रव्यं भिन्नमित्युच्य
ते। विक्षेपात् तत्तु द्रव्यं भवति सिक्तमिति स्कन्नमुच्यते। स्कंदने च यावत्स्कन्नं तावन्मात्रं द्रव्यं भवति न पात्रगतं भिन्न
सिक्तानिवेति वचनात् तद्भिन्नं सिक्तं च समुद्रमित्यनेनाभिमंत्रयेत। ततः अपोऽभ्यवहरेयुः। अपोऽभ्यवहरेयुरित्यस्य
वचनस्य प्रकरणविशेषाभावाद्वा पन्याह विमार्त्रमेवास्य विषय इति भेदने द्रवद्रव्यमेवास्मिन् प्रकरणे सर्वोवस्थे प
यसि अन्येषु द्रव्येषु च। स्कंदने पुनः पयसि वक्ष्यमाणत्वादिदमभिमंत्रणं द्रव्यांतरे चेति स्थितं। यस्याग्निहोत्रमु
पावसृष्टं दुह्यमानं स्यंदेत तस्य पत्तत्रस्कंदयेत्तदभिमृश्य जपेद्यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्य
दापः पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीति। दोहनावस्थायां पयसि स्कन्ने यदद्येत्यनेन स्क
न्नमभिमंत्रयेत समुद्रं व इत्यनेनास्य तुल्यकार्यत्वात्। अत एव समुद्रं व इत्यत्राप्यभिमर्शनं कर्तव्यं। स्कन्नमभिमं
त्रयेत दोहनावस्थायां स्कन्नं एतत्प्रभवतीत्येतावदत्र विवक्षितं द्रव्यांतरं ब्राह्मणानुवादः। पयोलिंगत्वात्पयस्येव

(९२)

सू.वृ.
९४

दं भवति। तत्र यत्परिशिष्टं स्यात्तेन जुहुयात्। अर्थप्राप्तस्य विधानं शेषकार्यस्यापर्याप्तावपि तेनैव होमः कर्तव्यः शे
षकार्यस्य भक्षादेर्लोप एव स्यात् अप्रयोजकत्वाद्द्रव्यस्येति। अनेन वाभ्यानीय। जुहुयादिति शेषः। होमापर्याप्ता
विरं भवति। एतद्धोमार्थप्राचीनहरणात्। मर्यादायामयमाकारः। उत्तरत्र तेनेति वचनात्। दोहवचनं पूर्वसूत्रे
स्कंदन निमित्तविशेषस्याविवक्षितार्थत्वसूचनार्थम्। आदिग्रहणामधिश्रितेपि पयसि स्कन्न एतदेव प्रायश्चित्तं
न ब्राह्मणोक्तमधिश्रितं स्कंदति वा विष्यंदते वेति। इदं तु इष्ट्यंतरेषु भवति विष्यंदने तु पयस्यपीदमेव भवति विष्यं
दने अधिश्रिते अन्यस्यानाम्नानात्तत्र यत्परिशिष्टमित्यादि इष्ट्यंतरेष्वपि साधारणं अन्यस्यानाम्नानात्। उ
न्नीयाहवनीयसमूहरणं प्राचीनहरणमित्युच्यते। प्रजापते विश्वभृति तन्वं हुतमसीति तत्र स्कन्नाभिमर्शनेनेदं
मपि पयस्येव पूर्वेण संबंधितात्तत्रेति प्राचीनहरण इत्यर्थः। शेषेण जुहुयात्। अंतरेणापि वचनं सर्वस्य वा प्रधा
नमात्रस्यैव पर्याप्ते शेषेणैव होमो युक्तः। उक्तत्वादस्य वचनमिदानीं किमर्थं। अयमभिप्रायः अस्ति तत्र शेषः
स्व होमद्रव्यस्यापर्याप्ते तथाविशेषेणैव माचाहीनेनापि जुहुयादिति वचनं। पुनरुन्नीयाशेषे। स्रुग्गतस्याशेषेषु

रामं०
९४

न्नं नीय जुहुयात्। पुनरुन्नयने अयं विषयः प्राचीनहरणे यावति गते स्कन्नं भवति गते स्कन्नं भवति तावत्येवाध्वनि उप
विश्य स्थालीमन्येन प्राचीनीतात्तत्रैव उपविष्ट उन्नयेत्। न स्वयं स्रुग्वा प्रत्यगच्छेत्। आज्यमशेषास्थाल्यामपि य
दा अंगृहीतात्तस्य यथासंभवं संस्कारं कृत्वा उन्नीयते न जुहुयात्। एतदा होमात्। द्वयोरपि होमयोः प्रधानत्वात्। हो
मद्रव्यपर्याप्तमेतदेव प्रायश्चित्तं भवति। वारुणी जपित्वा वारुण्या। विशेषाभावाद्येकं च न वारुण्यैव भवतः। पूर्वे हो
मे प्राकृतस्य मंत्रस्यापवादो वारुणी। अनशनमीन्याप्राग्धोमकालात्। यजमानस्येदं न होमकर्तुः। वारुणी जपो वा
रुणीहोमो ऽनशनमिति एतत्त्रयं शेषेण जुहुयादित्यस्य माप्या पचारहोमे पुनरुन्नीय होमे आज्यहोमे च भवति
। पुनर्होमं च गार्गेगारिः। एतेष्वेव त्रिषु पक्षेषु गार्गेगारिः पुनर्होममिच्छति आचार्यग्रहणं विकल्पार्थं पुनर्होमे पू
र्वं समाप्य पुनः विहरणादि सर्वं क्रियते। निमित्तप्रयोगावृत्ति विधानात्। अग्निहोत्रं शरद्यहारायत्तमोषासुमिति
द्वे एवर समुदाहरेत्। अधिश्रितमग्निहोत्रं इष्ट्यं यदि शब्दयेत् तदानइसंसमोषासुमिति अभिमंत्रयेत। असुमित्यस्य
स्थाने यजमानद्विष्टनाम निर्दिशेत्। अधिश्रितविशेषणं तत्रैवास्य संभवाच्छान्तान्तरदर्शनाच्च। विष्यंदमानं म

93

सू॰वृ॰
९५

द्यौः पृथिवी च नद्व्रत्याहवनीयस्य भस्मांतेति। नयेत्। उद्वासिते विष्यंदिने एतद्भवति अधिश्रिते तु ब्राह्मणो क्रमेव। सान्ना
य्यवद्धोमस्ते। प्रजापतय इत्यनया मध्यमेन पलाशपर्णेन जुहुयादित्यर्थः। अग्निहोत्रे मित्रो जनान्यातयति ब्रुवाणा
इति समिदाधानं अधिके यं समित्। उत्तराहुत्यर्थस्याप्यभिवर्षणसंभवात्। अतः पूर्वाहुत्याः आगम्य स्मिन्निमित्ते
सति निमित्तानंतरं समिदंतरमाधेयमेवाय अत्र वेत्थ वन स्यात्तद्युत्तरस्या आहुत्याः स्कंदने। समिदाधानमिति शे
षः॥११॥ प्रदोषांतो होमकालः। प्रदोषो नाम रात्रेः पूर्वश्चतुर्थो भागः। प्रदोषास्यांतः प्रदोषांतः॥ अंतो यस्य स प्र
दोषांतः। प्रदोषांतो तद्धत्यर्थः॥ स सायं होमस्य कालः केषांचित् पंचमी षष्ठी नाडिके प्रदोषशब्देनोच्येते। तदंतो वा
सायं होमकालः। संगवांतः प्रातः॥ यस्मिन् काले गावो वत्सैः सह संगच्छन्ते स संगवः कालः तावदित्यर्थे ते प्रातर्होमस्य समयः
। केचिद्दक्षतृतीयो भागः संगव इत्याहुः तदंतः संगवांतः दशनाडिका इत्यर्थः। अस्तमिते उदिते च विहितो होम
एवं भवति काले क्रियमाणे नीत कालो न भवतीति पुनः कालविधिः। नमत्तिनीय चतुर्गृहीत माज्यं जुहुयात्। क
स्मिन् काले केन मंत्रेणेत्यत आह। यदि सायं दोषावस्तर्नमः स्वाहेति यदि प्रातः प्रातर्वस्तर्नमः स्वाहेत्यग्निहोत्र

राम॰
९५

नी३

मुपसाद्य भूर्भुवः स्वरित्यग्निहोत्रमुपसाद्य जपित्वा वरं दत्त्वा जुहुयात्। उपसादनवचनं क्रमार्थं उपसाद्य जपं वरदा
नं च कृत्वा समिदाधानादि पूर्ववद्धरदानं यजमानो वरं ददाति गो जाति रुप्य नेति। तं च वरं दत्त्वा जुहुयादिति पूर्वकालनामा
त्रं विवक्षितं व्यवधानं कर्त्रैकं चाइष्टिश्च वारुणी। कर्तव्ये स्येष्यः समाप्तेग्निहोत्रहोमे नैव वाग्निर्विषय मिष्टिः कार्या। उ
नरत्रानुगमनविधानात्। हुत्वाप्रातर्वरदानं कर्तव्यं। अनुगमयित्वाचाहवनीयं पुनः प्रणयेदिहैव क्षेम्य एधि मा प्रहा
सीरमुं मामुष्यायणमिति। समाप्ते ग्निहोत्रहोमे आहवनीयस्यानुगमनं कृत्वा पुनस्तमेवाद्धरेदिहैव क्षेम्य इति मंत्रेण।
मा प्रहासीरमुं मामुष्यायणमिति पाठः कर्तव्यः। अमुमित्यस्य स्थाने यजमाननाम षष्ठ्यंतीयथा निर्दिश्येत्। आमुष्याय
णशब्दस्य स्थाने गोत्रनाम। मा प्रहासीर्देवदत्तं भारद्वाजमिति। पित्रा दीर्जीवति भरद्वाजायन मिति वदेत्। दक्षिणा
ग्निहोत्रिक एव आहवनीयस्यैवानुगमनविधानात् तद्वदनुगमनं कस्याहवनीयस्येति न विद्मः। आग्निहोत्रिक
स्य चेत्। नासमाप्ते च प्रयोगे अनुगमनविधिमिति। तथा सति पुनः प्रणयनमदृष्टार्थं स्यात्। अथायमभिप्रायः भूय
र्थं विहृतस्येति तदा पुनः प्रणयेत् तद्दृष्टिरिति समन्वयो नोपपद्यते। अथायमभिप्रायः समाप्तेग्निहोत्रे लौकिक।

९५

सू॰ वृ॰ ९६

स्यसतोनुगमेनैकर्तव्यं नायत्तनाद्धि हि स्वाग इति। तदाहवनीयत्राह्मो नोपपद्यते। अत एवं वदतः सूत्रकारस्यायमभिप्राय
इति वर्णनीयः। यस्य कस्यचित्कर्मणोर्थाय विहृतेष्वग्निषु यत्किंचिदग्निसाध्यं नैमित्तिकमुत्पद्यते तस्य नैमित्तिकसहिता।
स्यत एवाग्नयो भवेयुः न पुनः पुनर्विहर्तव्या इति। तत इष्टिर्मित्रः सूर्यः। एते देवते। अभियो महिना दिवं। प्रसमित्र मर्तो
अस्तु प्रयस्वानिति। गृहस्थितायां पत्न्यां सहवाग्यतोग्नीञ्ज्वलतो हरन्नश्चानुपासीना समामायामिष्टौ पत्नीयजमा
नौ यतवाचौ भूत्वा तानेवाग्नीन् ज्वलयंतावनीश्वं तावहः शेषं उपासीयातां उपासीनयत्योः सहैवं कुर्वन्नु अग्नी
नां समीप आसीतेत्यर्थः। हूयोर्दुग्धेन वासेग्निहोत्रं जुहुयात्। वासो रात्रेः पूर्वश्चतुर्थभागः। हूयोर्गवोर्दुग्धेन पयसा साय
सायमग्निहोत्रं स्वकाले जुहुयादित्यर्थः। अधिश्रिते न्यस्मिं द्वितीयमनयेत्। अयमत्र विशेषः। एकस्या गोर्दुग्धं प
योधिश्रित्य तस्मिन्नेव पयसि द्वितीयं गोर्दुग्धमवनयेत्। तेन पयसा होमः। ततोग्न्योरपवर्गः। प्रातरिष्टिः। ततः श्वोभू
ते पूर्वाह्ण इष्टिः कार्या। उपमपि प्रातः कालातिपति निमित्ते वा प्रातरिति कालविधानात् प्रयोगभेदस्ततो विहरण
मेदोपरमन्योरपि भवति। अग्निर्व्रतभृत् शुचिव्रतभृत् गुणो। ग्निर्देवता। त्वमग्ने व्रतभृच्छुचिरग्ने देवां इहावह। उप ९६

तं ह विश्वनः। व्रतानि बिभ्रद्व्रतपा अदब्धो यजासि देवां अजरः सुवीरः। दधद्रत्नानि सुमृडीको अग्ने गोपाय नो जीव
से जातवेद इति। एतत्प्रायश्चित्तं स्वकाल एव प्रणीतेष्वग्निषु होमकालातिपत्तौ भवति। अप्रणीतेषु उक्त वा कालातिप
त्तावत्यं तावत्यं तापदि अनुद्धृतप्रायश्चित्तं कृत्वा होमं कुर्यात्। अनापदि मनस्वती होमेनानुद्धृतप्रायश्चित्तेन च सहितो
होमः कार्यः। विहृतेषु वाग्निषु अहुतेषु होमान्तरकालप्राप्तावुपक्रान्तमेव होमकालातिपत्ति प्रायश्चित्तसहितं कृत्वा वर्त
मानकालीयमनुद्धृतप्रायश्चित्तसहितं कुर्यात्। अविहृते कालांतरप्राप्तौ मनस्वती होमं कृत्वातिपन्नस्य प्रतिहोमं कृ
त्वा अनुद्धृतप्रायश्चित्तादि पूर्ववत्। एवमनेककालातिपत्तावपि द्रष्टव्यं। विहृतेषु विहृतेषु ककालातिपत्तौ मनस्वती
होमं प्रतिहोमं प्रतिवावश्यं कुर्यात्। विहृतेषु तेषु वाग्निषु अविहृतेषु तु मनस्वत्यादि कृत्वा प्राप्तकालस्य विहरणं।
दि क्रियेत। एवमत्र विचार्य यद्युक्तं तत्कर्तव्यं। विचारस्यास्य दमात्रमत्र लिखितमिति मंतव्यं। एषैवास्रोक्पाते आ
त्योक्पाते दुःखेनाश्रुपातेन धूमादिनेत्यर्थः। एतद्दर्शपूर्णमासयोस्तत्। प्रकृतिषु च भवति। आह्लण उपवसथेश्रु
कुर्यादिति दर्शनात्। यद्याहवनीयमप्रणीतमभ्यस्तमियाद्बहुविद्ब्राह्मणोग्निं प्रणयेद्दर्भैर्हिरण्येन नोद्ध्रियमाणे।

+ श्चिताभ्यामेवोक्तः। स्वेनस्वेन कालात्ययाप्राय + २

अग्निहोत्रार्थविधिनानुद्धृतमाहवनीयेयद्यस्तमियात्तदानीमेवानेतुंशक्येषु ब्राह्मणेषु योबहुवेतितमानीयतेनो
द्धरणादिनिधानांतमाहवनीयस्य कारयेत्। अग्नेःप्रणीयमानस्याग्नेोहिरण्यंदर्भैरेवनयेत्। ब्राह्मणग्रहणंबहुवि
द्यत्वेपिजात्यंतरनिवृत्त्यर्थं। अभ्युदितेचतुर्गृहीतमाज्यंरजतंचहिरण्यावदग्नेोहरेयुः। अनुद्धृतमभ्युदितेसतिब
हुविदस्तिंप्रणयेत्। तस्याग्नेश्चतुर्गृहीतमाज्यंनेतव्यंरजतंच। यदिहिरण्यबहुवचनेनरजतस्याग्नेोहरणंप्राप्ये
ततदादर्भैर्हरणमपिप्राप्नुयात् आज्यस्याग्नेोहरणंत्वनप्राप्नुयात् अतोदर्भनिवृत्त्यर्थमाज्यस्याप्रापणार्थंचागतत
इतिवचनं। एवंचेद्धिरण्यबहुवचनंपूर्वोक्तस्यबहुविद्ब्राह्मणाग्न्युद्धरणस्यप्रापणार्थं। अथैनदाज्यंजुहुयात्पुरस्ता
त्प्रत्यङ्मुखउपविश्योषाःकेतुनाजुषतांस्वाहेति। हिरण्यारजतयोरग्नेोहरणमेवकार्यं। आज्यस्यकार्यांतरमुच्य
ते। निहितेग्नावाहवनीयस्यपुरस्तात्प्रत्यङ्मुखउपविश्योषाःकेतुनेतितदाज्यंजुहुयात्। कालात्ययेनशेषः। उभ
योःकालयोरनुगतेद्धृतप्राय श्चित्तशेषःकालात्ययप्रायश्चित्तेनाग्निहोत्रमुपसाद्येत्यादिवारुणीष्ट्यंतंसायंकाले
भवति। प्रातःकालेपितदाद्येवप्रातःप्रातर्भूतीष्ट्यंतंभवति। नात्विहाग्निरनुगम्यः। प्रातःकालेअयंविशेषः अनुगम

पितान्वाहवनीयामित्येतन्नभवति। तेनाग्निहोत्रार्थेष्वाग्निषुसायंहोमांनंभवति। आहवनीयेचध्रियमाणेगार्हपत्यो
नुगच्छेत्त्स्वभ्यएनमवक्षामेभ्योमंथेयुरनुगमयेत्तिनरं। विद्यमानआहवनीयेगार्हपत्योयद्यनुगच्छेत्। तदात्स्वेभ्योवक्षा
मेभ्यएनंगार्हपत्यंमंथेयुः। ततद्वितरमनुगमयेत्। आहवनीयमित्यर्थः। गार्हपत्याशानृदिवगार्हपत्यप्रत्ययेसिद्धेतत्त
पत्ययार्थमेनमितिवचनंसर्वावस्थस्यगार्हपत्यानुगमनेमंथनमेवोत्पत्तिःएवंरूपावसेनिज्ञापनार्थं। तुशब्दस्य
यमर्थोद्योतते। गार्हपत्यमनुगतंमंथनमेवोत्पादयेत्। ध्रियमाणआहवनीयेयंविशेषः। तंचानुगमयेदिति। अवा
क्षाणानिमंथनसमर्थानिकाष्ठानि। क्षामाभावेभस्मनारणीसंस्पृश्यमंथयेदितोजज्ञेप्रथममेभ्योयोनिभ्योअ
धिजातवेदाः। सगायत्र्यात्रिष्टुभाजगत्यानुष्टुभाचदेवेभ्योहव्यंवहतःप्रजानन्निति। मंथनसमर्थक्षामाभावेभ
स्मनारणीसंस्पृश्यलेपयित्वातेतोमंथयेत्इतोजज्ञइतिमंत्रेणामंथयेदिति णिचप्रयोगात्स्वकृतेकर्मणियः कर्ता
सएवमंत्रंब्रूयात्। येकेचनसमर्थामंथेयुरित्येवमवगम्यते। अरणीमंथनएवायंमंत्रोनावक्षाममंथने। यद्युभ
योरभिप्रेतःस्यात्पूर्वत्रैवमंत्रंब्रूयात्अनुगमयेत्तिनरमितिवचनात्तथाचनकृतं। तेनपूर्वस्मिन्मंथनेमंथनमंत्रोना।

सू॰वृ॰
९८

स्तीति सिद्धं। अवरोहणमंत्रस्तूभयोरपि भवति। अरणीगतावरोहणस्यापि तस्मिन्नेव सूत्रे विधातुमिष्टत्वात्। मथित्वाप्रणीयाहवनीयमुपतिष्ठेताग्ने सम्राडिषेराये रमस्व सहसे द्युम्नायोर्जे पत्यायासम्राडसि सारस्वतौ त्वौत्सौ प्रावतामंनोदत्वा नपस्यायाद् धाइति। मथित्वेति वचनमितो जइत्यस्य प्रणयनमंत्रत्वशंकानिवृत्त्यर्थं। अत एव केचित् प्रणयंत्यन्वास्त्यदक्षिणां। अत्रैव विषये अयं द्वितीयः कल्पः। ध्रियमाण आहवनीये गार्हपत्यानुगमने सति अत एवाहवनीयादाहवनीयं प्रणयेदित्येके। तथा सति दक्षिणाग्निरप्यनुहर्तव्यः। सह भस्मानं वा गार्हपत्यायतने निधायाथ प्रांचमाहवनीयमुद्धरेत्। इदमपि कल्पांतरमाहवनीयमुद्धरेदित्येतावतैव सिद्धे प्रांलेकंप्रंमिति वचनमाहवनीयात्प्रत्यंचं गार्हपत्यं प्रणीयापि विहारसिद्धिरितीदमपि कल्पांतरमिति ज्ञापनार्थं। एते चत्वारः कल्पाः ब्राह्मणे समुद्दिष्टाः। तत्र निंदाविधंतरस्तुत्यर्थः। अतः सर्वेषां कचित्कचित्छाखांतरे विधानमस्तीति तान् सर्वान् कर्तव्येन तयासूचितवानाचार्यः। सह भस्मानमित्यस्मिन् पक्षे दक्षिणेन विहारं नीत्वा गार्हपत्यायतने निधानंतत इष्टिः। अग्निस्तपस्वान् जनद्वान् पावकवा। एका त्र देवता। सचाग्निस्त्रिभिर्गुणैर्युक्तः। आयाहि तपसा जनेष्वग्ने पावको अर्चिषा उपेमां सुष्टुतिं मम। आनो

रामं॰
९८

याहि तपसा जनेष्वग्ने पावकदीद्यत्। हव्या देवेषु नोदधदिति। प्रणीतेनुगते प्राग्घोमादिष्टिः। अग्निहोत्रार्थं प्रणीत। आहवनीयेनुगते प्रायश्चित्तत्वेनेयमिष्टिः कर्तव्या। प्राक् पूर्वाहुतिप्रक्षेपादेषैवेष्टिः प्रायश्चित्तिर्भवति। उत्पत्तिस्तु ब्राह्मणोक्ताभवति। नदादुर्यस्याग्निमनुद्धृतमादित्योभ्युदियादित्यादि हिरण्यं पुरस्कृत्य सायमुद्धरेदिजतमंतर्धाय प्रातरुद्धरेदित्यत्रोक्ता। इयमेवोत्पत्तिरस्मिन्नवसरे प्रणीतो वा प्राग्घोमादुपशाम्येदिति वचनादग्नावनुगतेंतराहुती इति वक्ष्यति। उत्तराहुत्यां हुतायामग्न्युत्पत्तेः प्रयोजनं नास्ति। एवमग्निहोत्रे निर्वोहइत्यस्य सूत्रानुसारेण मन्यामहे। अग्निर्ज्योतिष्मान्वरुणः द्वे देवते। ज्योतिष्मान् त्वग्नेर्गुणः। उदग्ने शुचयस्तवाग्नेर्वह न्तुषसामूर्ध्वो अस्थादिति। सर्वाश्चेदनुगता नादित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वा। यदि सर्वेष्वग्निष्वनुगतेषु आदित्योस्तमुदयं वा गच्छेत्तदाग्न्याधेयं वा प्रायश्चित्तं भवेत्। अनयोरेव कालयोः शास्त्रांतरे गार्हपत्याहवनीययोर्द्वयोरेवानुगतावेतत्प्रायश्चित्तमुक्तं। तस्मिंछास्त्रे दक्षिणाग्निर्भिन्नयोनिः। अत एवं द्वितिवेशः। एकयोनित्वेसर्वानुगमने भवति। भिन्नयोनित्वेद्वयोरेवानुगम इति। अत्राग्न्याधेयपुनराधेयशब्दाभ्यां सद्भिकेतंगत्येनेअग्न्युत्पादकत्वसामान्यात्। एतदर्थमेवाधाना

सू.वृ.
९९

द्वादशरात्रमजस्रादुत्पन्नसेष्टिकेऽग्न्याधाने आधानशब्दप्रयोगः संव्यवहारार्थं कृतः। अस्मिन्काले सर्वदा सर्वेऽग्नयो वि
हृता एव प्रायेणासते। न च केवल गार्हपत्यानुगमने मथनेनोत्पाद्य न पस्वती कार्येत्युक्तं। दक्षिणाग्न्यनुगमने विस्व
योनि वितो विहृत ससेवेष्टिः कार्या। आहवनीयानुगमने पि प्रायश्चित्तविशेष उक्तः। द्वयोरप्यनुगमने नान्ये वयथासं
भवं कर्तव्यानि। अतः सर्वानुगमन इदमवशिष्यते। अत्र सर्वशब्दाविवक्षायामपि नैमित्तिकस्य स्वभावपर्यालोच
नया सर्वानुगतावेवैतद्भवतीति मन्तव्यं। एकयोनित्व भिन्नयोनित्वकोविनिवेशः उभयोरनुगमने पि विधीयमान
स्याग्न्याधेयस्य सर्वोत्पादकस्य स्वभावात्यागान्नद्विधानसामर्थ्यादेवान शेपि दक्षिणाग्निर्नष्ट इति गम्यते। विहृ
तेष्वेवं भवति। अविहृतेष्वपि किं गार्हपत्यानुगमने सर्वानुगमोऽस्ति न वा। अस्तीति ब्रूयात्। तत्र हि सर्वेऽग्नयः समवेता
इति गम्यते। ततो विहरणदर्शनात्। कथं तत्र समवायः। अंगारसमवायस्तावन्नास्ति। कर्मार्थं पृथक्कृतानां कर्म
समाप्तौ तत्रैवानुगमनदर्शनात्। अथायमभिप्रायः अगाराश्रययोर्दक्षिणाग्न्याहवनीयाख्यः शास्त्रागम्यः सक
र्मसमाप्तौ गार्हपत्यागारानुप्रविशति। अन्यथा तत उद्धरणवचनं नोपपद्यते। न तत्संसर्गे संसर्गदोषश्च नास्ति।

राम०
९९

अंगारसंसर्गे हि स।। तथा वशाखान्तरे वचनं। यदि पूर्वोऽनुगतः संचर्य पश्चाद्धि स न हि गत इति। एवमपि नयुज्यते अ
विहृतावस्थायां गार्हपत्ये गार्हपत्यं प्रज्वलयेति सूत्रप्रयोगात् तथा वशाखान्तरे सूत्रकारप्रयोगो मन्त्रकारप्रयोगो मंत्रे
वर्णश्च दृष्टपने गार्हपत्यमभिमंत्रयते सु गार्हपत्या इति। तेनावगम्यते तत्रानुप्रवेशोऽवेद्यन्तरस्य नास्तीति। यत्पुनः पश्चा
द्धि स न हि गत इति तदान्यपरं। यदि हि सर्वदानुगतस्याहवनीयस्य गार्हपत्यानुप्रणयनेनैवोत्पत्तिः स्यान्न तदैवेन।
लिंगमनुप्रवेशस्यात् न हि शास्त्रे मंथनादप्युत्पत्तिरुक्ता। अतोऽस्यायमर्थः अस्मिन्ननुगमने गार्हपत्यात्प्रणयने
नोत्पत्तिरुक्ता न दानुगते तेन रासंचरणमविरुद्धं मंथनोत्पाद्येऽनुगतेऽप्यन्तरा न संचरितव्य इति। अतो ब्रूमः इति। अतोऽन्यप
रत्वादेवास्य वाक्यस्यानुप्रवेशे लिंगं भवितुमर्हति। अतस्तत्र समवायः प्रत्यक्षेण शास्त्रेण वा यः प्रत्यक्षेण शा
स्त्रेण वा लक्षयितुं न शक्यते। कथं तर्हि न तदुद्धृत आहवनीयादिर्भवति वचनगम्यो हि सः। वचनमेवं भवति गार्हप
त्यं प्रज्वल्य ततो दक्षिणाग्निमुद्धृत्य गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेदिति। तेनाधिकृतेन पुरुषेण तत्स्विद्युक्ते नवा
अग्निहोत्राद्यर्थे स्वकाले यथोक्तेन विधिना यदुध्रियते स एवाहवनीयादिर्भवति नान्यथा। अन्यथा वेदुधियते न तरा

सामीप्यनमग्निविक्षेपप्रायश्चित्तं कर्त्तव्यं नान्यदन्युदितेष्टोनुवचनानान्मध्योद्धृतोप्याहवनीयादिर्भवति एवं तर्हि क
र्मान्तरालकाले क्वासौ तिष्ठति। वयमपि न जानीमः क्वासौ तिष्ठतीति। एतावदत्रावगंतुं शक्यते सर्वकर्मार्थं अ
ग्नय आहिताः तत्र गार्हपत्यो यावज्जीवं धार्यते वचनात् इतरौ तु कर्मणि कर्मणि उद्ध्रियेते। गतश्रियः सर्वे धा
र्यते वचनादेव। नान्यदतो वक्तुं शक्यते। एवं सति कर्मापूर्ववत्तिष्ठंतीत्यर्थः यथा याग दिजनितान्यपूर्वाणि या
वत्फलभोगसंबंधं तिष्ठति। तथाहवनीयादिरपीति। अतो नुद्धृतेषु गार्हपत्यानुगमने सर्वानुगमनं नास्तीति तत्रा
ग्न्याधेयं पुनराधेयं वा न कर्तव्यमिति सिद्धं। समारूढेषु चारणीनाशे। अग्निष्वरण्योः समारूढेषु सत्सु अ
रण्योर्नाशेग्न्याधेयं पुनराधेयं वा कर्तव्यं। अन्यतरारणीनाशेपि भवत्येव न तु प्रायश्चित्तं तयोरेकैकस्याप्येककार्य
विशेषे नियमाज्ज्यायापति संस्तुतत्वाच्च। न त्वरणीनाश इति शब्दे एकस्यामप्यनष्टायां न प्रवर्तत इति। सत्यमसौ श
ब्दो न प्रवर्तते तथापि मंथनपदार्थो नैकया संपादयितुं शक्यत इति अनष्टापि नष्टैवेति कृतोक्तं। यदि परमनशामेव
द्विधा कृत्वा मंथानसिद्धिरिति। तथापि नैवं वर्कुं शक्यते उपादानकाले अरणी आहरेदिति द्वयोरुपादानमात्र दृष्टार्थ

स्यादित्युक्तं कार्यभेददर्शनादिति। एवं सति उर्वशी पुरूरवः संस्तुतिरधरोत्तरयोररण्योः श्रूयमाणा चोपपन्ना भवती
त्युक्तं॥१२॥ अथाग्नेय्यस्त्रयः। अथानंतरं यावक्ष्यंतेता अग्निदेवस्याइष्टय इति वेदितव्यमित्यस्य सूत्रस्यार्थः। या
न्यत्र चतुर्थ्यंतामि निपदानि तान्यग्नेर्गुणवाचकानीत्यर्थः। एतेनावगम्यते सर्वत्र चोदितैव देवता चोदनायां सत्या
मसत्यां तु चोदनायां याज्यानुवाक्यालिंगादवगंतव्या देवता गुणस्तु चोदनात एवावगंतव्यः कथं तर्हि वैश्वानरपार्जन्या
यां वैश्वानरशब्दोग्नेर्गुणः। तयोरेव याज्यानुवाक्ययोरत्र प्रवेशात्। अत्र हि वैश्वानरशब्दस्याग्निगुणत्वं चोदितमेवे
ति। व्रतातिपत्तौ व्रतपतये। यस्मिन्कर्मणि यानि चोद्यंते व्रतशब्देन धर्मशब्देन वा तत्रैतेषामितिपत्तौ वेष्टिः कार्या
। साग्नावग्निप्रणायने ग्निवते। निर्वृत्तकर्मणा वा अग्निना सहित आहवनीयायतने यद्यन्योग्निराहवनीयार्थं उद्ध्रिये
त तमग्निमाधायेवस्मरति वेदायतन रथमुदूह्य इदानी मुद्धृतं निरध्यानुं तथा सतिइष्टिर्भवति। एतस्मिन्नपि पक्षे
यद्युपवृत्त कर्मोदूह्य तत्र दाय्यान्नत्तिहोमः कर्तव्यः। अपवृत्तकर्मा चेन्न किंचिदपि प्रायश्चित्तं विद्यते। पयस्मृत्वेव
तस्मिन्पूर्वप्रणीते निदध्यान्न राद्यमिष्टिः कार्या। क्षामायागारदाहे। श्रूवयेसंसर्जनेग्निनान्येन। अन्यइतिशवाग्निरु

सू॰वृ॰
१०१

ग्नेनिमिथश्चेष्टिर्विवचये।गार्हपत्याद्दक्षयःसर्वे द्वौ द्वौ वा परस्परं यदि संसृज्येरन् तदा विविचयइष्टिः कार्या।गार्हपत्याहवनीय
योर्वीतये।पूर्वस्यायमपवादः।ग्राम्येणसंवर्गाय।ग्राम्यःपचनाग्निः।वैश्यकृतेनाग्नेसंसृष्टे वैश्वानराय विमताना नाम्नेनमोज
ने।विमताविमनस्काः।शत्रवइत्यर्थः।द्विषद्न्नंयथाहिता ग्निर्भुंजीत तदा वैश्वानरायेष्टिः कार्या।एवंवकपालेन
ष्टेनुकौहासिते।केषांचिदध्वर्यूणांपुरोडाशश्रपणानंतरंकपालेोद्वासनंविहितं।केषांचिदनुद्वासनमेव।तत्र पूर्व
योःपक्षयोरनुद्वासितेनष्टएषेष्टिर्भवति।अनुद्वासनपक्षेपिप्रयोगमध्येभवति।प्रयोगसमाप्तौनभवतिविध्य
पराधाभावात्।अभ्याश्राविते वा।येषांश्रपणानंतरमुद्वासनंतेषामनुद्वासितेकपालेसत्याश्रावणेकृतेप्येषेष्टि
ःकर्तव्या।सुरभयएवयस्मिंजीवेमृतशब्दःयस्मिन्नाहिताग्नौजीवत्येवमृतइतियदिशब्दःसंजायेततदाइय
मिष्टिःकार्या।एवशब्दोगुणनियमार्थः।सुरभयएवनसुरभिमतइति।तेनान्यत्रगुणांतरस्मिंमेवं।(धोष्यस्तुपगतो
भवति।यथाक्षामायक्षामवतेवेत्येवमादि।त्वमग्नेव्रतपाअसियद्वोवयंप्रमिनामव्रतान्यग्निनाग्निःसमिध्य
तेत्वंह्यग्नेअग्निनाग्नेत्वमस्मद्युयोध्यमीवा३अक्रंदद्ग्निस्तनयन्निवद्यौर्विते विधस्वानसंसृताे अग्नेत्वामवे

राम॰
१०१

मानुषीरीळते विशोम्न आयाहि वीतयेयोअग्निंदेववीतयेकुविस्तु नोगविष्टयेमानो अस्मिन्महाधने स्वग्नेसधिष्ठ
वयदग्नेदिविजाअस्यग्निर्होतान्यसीदघजीयान्त्साधीध्धीमकर्देववीतिं नोअद्येति।यस्यभार्यागौर्वायमौजन
येदिष्टिः।मरुतोस्याभिष्टौदेवता।सान्नाय्येपुरस्ताच्चेद्इमसाभ्युदितेग्निर्दत्तेंद्रः प्रदाताविष्णुःशिपिविष्टः।सा
न्नाय्यशब्देनामावास्यंकर्मोच्यते।तस्मिंनारब्धेसतिचंद्रमायदिपुरस्तादभ्युदियात्तदाएतामिष्टिंकुर्यात्।अ
स्याअमावास्याविकारत्वात्प्रायश्चित्तेष्टीनांपोधमेउपांशुत्वंवात्रेघ्राज्यभागतावसनभवति।एकेदेशविकृ
तमनन्यवद्भवतीतिहृषन्नंताविस्याद्द्योःमावास्याप्रमाणएवभवंतिएनदुर्कंभवति।अकालेअमावास्याकर्तव्या
रब्धेसत्यकालोयमितिज्ञानेतामेवास्यांदेवताभिर्विकृतांसमापयेत्।अत्रकालेप्राप्तेपुनर्यागोस्तिनास्तीत्यत्राध्व
र्युभिःसहनिश्चयःकार्यः।दातान्नेर्गुणःप्रदातेंद्रस्य।शिपिविष्टोविष्णोः।अग्नेदादाशुषेरय्यिंसंयंतांविप्रए
षांदीर्घस्तेअस्त्वंकुशोभद्रातेहस्तासुकृतोतपाणीवषट्तेअद्यशिपिविष्टनामेति।अपिवाप्रायश्चित्तेष्टीनांस्था
नेतस्यैतस्यैदेवतायैपूर्वेणाहुतिंजुहुयादितिविज्ञायते।प्रायश्चित्तप्रकरणेयाइष्टयइष्टिशब्देनैवबोधते।याश्च

108

सू॰ह॰
१०२

ब्राह्मणोक्ताः तासामयं वैकल्पिको विधिरुच्यते। यास्तामिष्टीनां देवतास्तासामेकैकस्यै देवतायै एकैकां पूर्णाहुतिं जुहु
याद्वा। ह्यद्दशगृहीते न स्रुचं पूरयित्वा यद्धूयते सा पूर्णाहुतिरित्युच्यते। अथ पुनरनुपक्रान्तदर्शपूर्णमासस्य भवतिदः
विहोममध्ये च नान्यत्र भवति। हविषां स्कन्नमभिमृशेद्देवाञ्जनमगन्यज्ञस्ते स्य माच्छीरवतु वर्धतां। भूतिर्घृतेन मुंच
तु यज्ञो यज्ञपतिमंहसः। भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा यज्ञस्य त्वा प्रमयोन्मयाभिमयाप्र
तिमया इत्यस्कन्दीदिति दैवं जनमित्यादिनाः स्कन्नं हविरभिमृशेत्। आहुतिश्चेद्बहिः परिध्याग्नीध्रणां जुहुयात्।
यदि हूयमाना आहुतिर्बहिः परिधिः स्कन्देत् तदा तस्याः स्कन्नाभिमर्शने कृते तत्र आग्नीध्रस्तामादाय तूष्णीमेव जुहुया
त्। होमं कृतवते आग्नीध्राय तदानीमेव येन केनचिद्धान्यरसादिना पूर्णपात्रं दद्यात्। देवते अनुवाक्यायाज्ये
वा विपरिहृत्याज्ये अवदाने हविषी वा यद्योदेवा अतिपातयानि वाचा च प्रयुती देवहेळनं। अरायो अरायो स्मो अ
भिद्रुह्णाय तेन्यत्रास्मन्मरुतस्तं निधेत न स्वाहेत्याहुतिं हुत्वा सुखं धनं दद्यात्। देवताविपर्यासः आवाहनादि
षु सुल्क्रमः। अनुवाक्याविपर्यासो न्यदीयामन्यस्यानुब्रूयात्। एवं याज्याविपर्यासः। आज्यविपर्यासो जो हवीप

राम॰
१०२

भृतयोरित्यादि। अवदानविपर्यासः पूर्वार्धात् पूर्वमित्यादि। हविर्विपर्यासो निर्वपणादिषु व्युत्क्रमः। यागे वान्य
दीयेनान्यस्य यागः। एतेषु सर्वेषु यद्यो देवा इत्याहुतिं हुत्वा स्वगृहे यत्प्रधानभूतं द्रव्यं तद्धोमकर्त्रे ब्रह्मणे दद्या
त् यजमानः। हुत्वेत्यत्र समानकर्तृकत्वं अविवक्षितं। याज्यानुवाक्ययोस्तु तस्मिन्कर्मण्यविहितयोस्तद्देवत्ययो
रन्यदेवतयोर्वा विपर्यासे सति यागात् प्रागेव अभेषज्ञाने सति प्रायश्चित्तं कृत्वा पुनर्विहिते एवानूच्य यष्टव्यं। कृते तु
यागे अनुवाक्याविपर्यासज्ञाने प्रायश्चित्तमेव न पुनर्यागाभ्यासः। याज्यायामप्यविहितायां तद्देवत्यायां विहितदे
वतादेशं कृत्वा विहितामेव देवतां ध्यायन्नपि वषट्कुर्यात्तदापि नाभ्यासः। अन्यदेवत्यायामप्यादेश ध्याने विहित
विषये स्यातां चेत्तदापि नाभ्यासः। अतोन्यथा चेत् यागावृत्तिः कार्या। यागविषयेपि हविर्विपर्यासे यागावृत्तिशंका
नैव कर्तव्या। कृतत्वाद्यागस्य। एतद्धि लक्षणं यागस्य देवतोद्देशेन स्वद्रव्यत्यागो यागः इति देवता तावद्विहितैवा
स्मिन्कर्मणि। द्रव्यमपि स्वमेव। अथायमभिप्रायः। अन्यस्यै संकल्पितत्वात्स्वत्वं नापगच्छतीति। एवं चेत्तस्या
अपि देवतायै यद्धुतं शक्यते स्वत्वाभावात्। अथ संकल्पनकाल एव यागः क्रियत इति। सुतरां विपर्यासो यागे।

107

नावर्त्तयितव्यः प्रयाजस्यादेर्गुणत्वात्। तस्मात् यथासंकल्पकरणमेवात्रापराधोनयासिद्धिरिति। यदि पुनराग्नेयेनाग्नी
षोमीययागे कृते भ्रेषो ज्ञायेत तदाग्नीषोमीयेणाग्नेययागः कर्तव्यः सन्निहितत्वात् तस्य कार्यान्तरस्य चाभावात्तस्मि
न्संनिहिते सति स्वद्रव्येद्रव्यान्तरोपादानमशक्यमिति। तस्मादेवं कृत्वा प्रायश्चित्तमेव कुर्यात्। अत्र व्याहृतिहोमश्च
कार्यः॥ एतद्धि पर्यासे नरितद्दत्येत्रैवोक्तं। स्थानिनीमनावाह्य देवतामुपोत्थायावाहयेत्। यदि कस्मिंश्चित्कर्मणि
यष्टव्यां देवतामनावाह्यैवोत्तरं कर्म कुर्यात् तदा यावन्निगते स्मरति तत्र देवोत्थायावाहयेत्। वर्तमाना वधिस्वरेण तमंद्रे
णाय दिमंद्रेणैव स्यात्। उपोत्थानं न विदध्यात्। तस्याप्यावाहनधर्मत्वात्तस्मादुपोत्थानविधानान्नमंद्रनियमः॥ अ
वधिस्वर एवेति सिद्धं। मनसेत्येके। न आज्येनास्थानिनीं यजेत्। यद्यस्थानिनीं प्रमादादावाहयेत् तदा तस्मिन्नेवक्र
मे तां यजेत् निगमयेषु च निगमयेत्। यजेदिति वचनं तद्देवत्यो यागएवायं नाहुतिहोममित्येवमर्थं॥ १३॥ हविषि
दुःशृते चतुःशरावमोदनं ब्राह्मणान्भोजयेत्। यदा हविरपक्वं भवति तदा तेनैव हविषा तत्कर्म समाप्य चतुःशरावपरि
मितव्रीहिभिरोदनं पक्त्वा चतुरो ब्राह्मणान्भोजयेत्। क्षामे शिष्टेन हुत्वा पुनर्यजेत। एकदेशक्षामस्याशक्यपरिहारता

राम॰
१०३

त्प्रायश्चित्तं न भवति। यदा पुनरदग्धं किंचिदस्त्यवदाने भ्योन पर्याप्तं च न तदैतत्प्रायश्चित्तं भवति। अशेषे पुनरावृत्ति
ः। हविष्यशेषे दग्धे पुनरावृत्तिः कार्या। पुनरावृत्त्योरयं विशेषः वर्तमाने प्रयोगे समाप्य पुनरप्यादित एवारभ्यं तत्राकृतक्रियापुन
र्योगः पुनरावृत्तिस्तु वर्तमान एव प्रयोगे नष्टस्य हविषः पुनरुत्पादनमिति। पुनरावृत्तौ तु पुनरुत्पादिते न हविषा स एव प्रयो
गः समापयितव्यः अयमनयोर्विशेषः। प्रागावाहनाद्दोषे पुनरावृत्तिप्रसंगात्सूत्रत्रयमारब्धं। आवाहनकालान्प्रा
ग्घविर्दोषे सति पुनरावृत्तिरेव। अप्यस्तं गुणभूतानां। गुणभूतानामस्तं तमपि पुनरावृत्तिरेव अस्तं तमित्या कर्मापरिस
माप्तेरित्यर्थः। प्राक्स्विष्टकृत उक्तं प्रधानभूतानां। यत्तु नहेविषां व्यापत्ताविस्तुक्तं तत्प्रधानहविषामेव स्विष्टकृतश्च प्रा
गेवेति चोभयमनेन नियम्यते। तेनाप्याज्यं गानां पुनरावृत्तिरेव। अवदानदोषे पुनरायतनादवदानं। प्रसक्तानुप्रस
क्तमिदं। मध्यात्पूर्वार्धात्प्रगृहीतस्यादोषे ये सति तस्य हविषो मध्यपूर्वार्धाभावात्सदृशसद्देवेतिमन्यमानः प्र
धानहविषश्चेदाज्येनेष्टिमित्यादि कर्तव्यमंग हविषश्चेत्पुनरावृत्तिरेवमध्यपूर्वार्धयोरेवसाधनत्वेनोपसंहारादि
ति यो व्यवतिष्ठते तस्योत्तरमिदं सूत्रं। अवदानदोषे पुनरप्यवदानायतनान्मध्यपूर्वार्धादेवावदातव्यं। आपेस्सि

(12)

कृत्वा तयोः शकृन्मूत्रयोरिति। चतुर्मुष्ट्यादिभिर्व्रीहिभिः संपादितं हविः सर्वं यागार्थमेव। तत्र ह्यवदानेन यागसिद्धेः सत्त्वात्ता
दर्थं तत्रोपसंहृतं भवेत् नान्यथास्य तत्कार्यार्थं यदुपादीयते तस्य तत्कार्याकरणे तत्त्वात्तादर्थ्यं नापैति। अतः तादर्थ्यान
पायात्तेनैव हविषा यष्टव्यमिति सिद्धं। द्वेष्टि तिह दक्षिणां दद्यात्। प्रकृतमनुसृतं। श्वामेशिने हूयेत स्मिन्प्रयोगे या दक्षि
णा साहेष्टेरा तस्मान्न तिर्गम्यदृत्यर्थः। दक्षिणादान उर्वरां दद्यात्। सर्वार्थमिदं सूत्रं। सर्वेषु कर्मसु विहितदक्षिणादाने
उर्वरां दद्यात्। सस्यसंपन्ना भूमिरुर्वरेत्युच्यते। कपालं भिन्नमनपहृत्य कर्मणा यन्मात्वाशत्नाष्टरया संदधामीति
संदधायापोभ्यवहरेयुः अभिन्नो घर्मो जीरदानुर्यत आर्त्तस्तदगन्पुनः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनु संचरं
तु। त्रयस्त्रिंशत्तन्तवो या वितन्वते इमं यज्ञं स्वधया ये यजंते। तेभिश्छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवा
निति। अनपहृत्य कर्मवचनात्पुरोडाशश्रपणादूर्ध्वं न प्रायश्चित्तमिति गम्यते। एवमवलीढाभिः क्षिप्तेषु। अव
लीढानि श्वादिभिरभिक्षिप्तानि तद्दशनादिभिः। अन्यं वा श्वेषु विसंबंधीनि कपालान्यभिन्नानि अप्येवं कुर्यात्।
मेदाभावात्संधानमर्थलुप्तं। तेनाभिन्नमित्यादिना अपोभ्यवहरेयुः। अपएवान्यानि मृन्मयानि भूमिर्भूम्नेमगा

न्मातामातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति। कपालेभ्योन्यानि मृन्मयानि भिन्नान्यभि
न्नानि च भूमिर्भूमिमिति मंत्रेण अप एवाभ्यवहरेत् न संदध्यादित्यर्थः। यदि पुरोडाशः स्फुटेद्वोत्पतेत वा बर्हिष्येनं
निधायाभिमंत्रयेत किमुत्पत्तसि किमुल्लोपाः शांतः शांतेरिहागहि। अघोरो यज्ञियो भूत्वासीद सदनं स्वमासीद सद
नं स्वमिति मा हिंसीर्देवप्रेरित आज्येन तेजसाज्यस्व मा नः किंचन रीरिषः। योगक्षेमस्य शांत्या अस्मिन्नासी
द बर्हिषीति। स्फुटेत् भिद्यादित्यर्थः। उत्पतेत् उद्गच्छेदित्यर्थः। पूर्वो निधानमंत्रः उत्तरोभिमंत्रणार्थः। आनंतर्या
योगात्। अग्निहोत्रायकालेग्नावजायमाने प्यन्यमानीय जुहुयुः। अग्निहोत्रहोमार्थं प्रणयनकाले समारूढो
ग्निर्मथ्यमानो यदि न जायेत तदान्यं लौकिकमग्निमानीय प्रणीय तत्रैव होमः कार्यः। एतदनुगानेन भवति। अनु
गते तु मंथनादि तत्र स्वतीष्टयंतं तत्र प्रायश्चित्तं तत्राग्निसंधानमेव मंथनप्रवृत्तो निमित्तं नाग्निहोत्रहोमः। समा
रूढे तु नैमित्तिकस्याभावादग्निहोत्रायैव मंथनस्य निमित्तं नान्यता। अतः समारूढ एवेति युक्तमुक्तं। तेनानुगता
वजायमानेपि यावज्जन्मतावन्मथितव्यमेव। न तस्त पस्वतीष्टिः तोग्निहोत्रहोमानुद्रुत प्रायश्चित्तेन सह। यदि हो

(103)

सू०वृ०
१०५

मकालेऽतिपन्ने तदा मनस्वती होमश्च कार्यः ॥ अपवन्त्यमिति अन्यशब्दाल्लौकिकमग्निमानीय जुहुयुः । अपिशब्दात् आश्वा
णपाण्यादिवस्थमाणमपि गम्यते । पूर्वालाभ उत्तरोत्तरं । अग्न्यादीनां पृथिव्यन्तानां पूर्वपूर्वालाभे उत्तरोत्तरं गृह्णीयुः
। पूर्वालाभ इत्यलाभवचनाद्‌लाभे द्रव्यान्तरविधिः स्वयं न प्रतिनिधिनियम इत्यध्यवसीयते । तेन ग्रहणार्थानां संज्ञानाम
ध्येयस्य कार्यमस्तीति तदेव कार्यं नान्यत् । ब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सु काष्ठेषु पृथिव्यां । अग्नौ सर्वधर्मसंभवात
स्य पृथग्योगाभावः पाण्यादीनां चतुर्णां मिथनाधिश्रयणादिवर्जं पित्र्यान्यत् सर्वं संभवतीति पृथक् अभावः । काष्ठा
नामबभावे विधानादुदककार्याण्यपि काष्ठेषु न स्युरिति तेषां पृथग्भावः । पाण्यादिषु पंचासु आहुतिधारणार्थास
मिद्भवति इंधनार्थाऽस्तु न भवंत्येव समिधः । पृथिव्यां तु धारणार्थापि समिन्न भवति काष्ठाभावे तस्या विधानात् । ए
वमन्यदपि विचार्य कर्तव्यं । हुतानपि मथनात् होमं कृत्वाऽनंतरमेव मंथनं भवति अपिशब्दात् कालान्तरेऽपि भवति मंथ
नात् अत्र विनिवेशः यदा प्रधानकाले प्रधानं परिसमाप्तं तदा होमानंतरमेव मंथनं भवति । यदा न परिसमाप्तं प्रधानं त
दा पुनरपि होमकालः एवं मंथनमिति । तु शब्दो वधारणार्थः । हुत्वा मंथनमेव भवति । न पुनर्होम इति । पाणौ चेद्ब्राह्म

रान०
१०५

णवरो धः । यदि पाणौ जुहुयात् तदा ब्राह्मणस्य वासार्थिनो नावरोधः कार्यः । कर्णे चेत् मांसवर्जनं । आ आजमांसवर्जनं भ
वति । स्तंबे चेत् नाधिशयीत । अत्र दर्भाणामनधिशयनं । अप्सु चेद्विवेकः । अप्सु जा विवेकोऽपामिमा भोजनी यानु माऽअभो
जनीया इत्येवं रूपः । एतत्संवत्सरं व्रतं । यावज्जीविकं वा । पूर्ववत् विकल्पप्रतिभासहेतु ईदृश्यां अग्नावनुगते तेन रद्रू
तौ हिरण्यउत्तरं जुहुयात् हिरण्य उत्तरां जुहुयात् ॥ आहुत्योः अंतरा अग्नावनुगते स्यैं सति हिरण्यं निधाय तस्मिं द्वितीयामा
हुतिं जुहुयात् हिरण्य एव यथा संभवं शेषकार्याणि कुर्यात् । न पुनरग्निरुद्धर्तव्यः ॥ १४ ॥ ॥ इत्याश्वलायनसूत्रवृ
त्तौ नारायणीयायां तृतीयोध्यायः समाप्तः ॥ शुभमस्तु ॥ ॥ ७ ॥ हरिः ॐ दर्शपूर्णमासाभ्यामिष्टिपशुचातु
र्मास्यैरथ सोमेन । उक्ता हविर्यज्ञाः तेषु च प्रायश्चित्तमुक्तं । इदानीं सर्वसोमानां प्रकृतिभूतं ज्योतिष्टोमं वक्तुकामस्तद
धिकारिविशेषणार्थं केषांचित् कर्मणामनुष्ठानं क्रममुक्तवानाचार्यः । इष्टिराग्नयणेष्टिः ॥ पशुः निरूढः ॥ आधाना
नंतरं दर्शपूर्णमासयोरारंभ उक्तः । तदारंभोत्तरकालमिष्टिपशुचातुर्मास्यैरिष्ट्वा सोमेन यजेत् ॥ अथ शब्दः सोमे
नसंबध्यते । स चाधिकारार्थः । सोमगुणकं कर्म सोम इत्युच्यते । तच्च ज्योतिष्टोमाख्यं । एतदुक्तं भवति । अग्न्याधेयानं

185

सू॰वृ॰
१०६

तदेभेनेन क्रमेण दर्शपूर्णमासादिभिरिष्ट्वा ज्योतिष्टोमाख्येन सोमेन यष्टव्यं। तदुत्तरमाषष्ठाध्यायपरिसमाप्तेरुक्तमेवा
धिकृत्य सर्वमुच्यत इति। ऊर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्ति के। प्रागपि सोमेनैके। सोमेन यक्ष्यमाण इत्यस्मिन्सू
त्रे वसंतादिकालेभ्यः कालांतरविशिष्टप्रधानविधिपरे वाक्ये सोमपानयोगेनैव यजनमप्युक्तं भवति। अतः तस्यार्थ
स्यावक्तव्यत्वादिदमन्यदानंतर्यमित्यवगम्यते। तच्चाधानं कृत्वाग्निहोत्रहोमं कुर्वतः प्रागेव दर्शपूर्णमासयोरा
रंभात्सोमेन यष्टुं यद्युपपद्यते। ततः तदा तस्मिन्नपि काले यष्टव्यमिति सूत्रार्थः। तस्यर्त्विजः। वक्ष्यंत इति शेषः। ऋ
त्विजः कर्तार इत्यर्थः। तत एवं रूपा इत्याह। चत्वारस्त्रिपुरुषाः। त्रयः पुरुषा येषां ते त्रिपुरुषाः। तेषु सूत्रे वक्ष्यमाणेषु
चत्वारः पुरुषवंतः। तेभ्यश्चतुर्भ्योऽन्योन्येषां चतुर्णामेव पुरुषा इति वेदितव्याः। अनेन प्रकारेण चतुर्णां मुख्यत्व
मितरेषाममुख्यत्वमित्यवगतं भवति। एते मुख्या एतेषां पुरुषा इत्याह। तस्य तस्योत्तरे त्रयः। अस्मिन्नृत्वि
जामनुक्रमणे यस्य यस्योत्तरे त्रयः स भवति सुमुख्यः। उत्तरे च ये त्रयस्त्रयस्ते तस्य तस्य पुरुषा इति प्रति
पत्तव्याः। होता मैत्रावरुणो च्छावाको ग्रावस्तुदध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाच्छंस्याग्नीध्रः पोता उद्गा

१०६

ता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति। परकर्तृनिर्देशः सर्वपुरुषव्यापि पदार्थानुष्ठानेऽप्ययमेव क्रम इति ज्ञापनार्थः। एते हीनैकाहैर्याजयंति। एते याजयंतीति वचनादहीनैकाहैः षोडशैव पुरुषा याजयंति न सत्रिणः सदस्य शमितृ चमसाध्व
र्यव इति ज्ञापितं भवति। अतः सत्स्वपि वरणे तेषामृत्विक्त्वं न भवति। अहीनैकाहैरिति वचनं सत्रेष्वेतेषामपि वरण
निवृत्त्यर्थं। याजयंतीति वचनं स्वद्रव्यत्यागात्मकत्वाद्यागपदार्थस्य ऋत्विग्भिः सकर्तुं न शक्यत इति ज्ञापनार्थं। अतः
स्वामिकर्तृक एव यागपदार्थो भवतीति सिद्धं। एत एवाहिताग्नयः इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समोप्याग्नी
स्तन्मुखाः सत्राण्यासते। एत एवेत्यवधारणात्सदस्यादिवर्जिताः पूर्वोक्ता एव षोडश ये पदार्थसंबंधिनः पुरुषा अ
ग्नीनाधाय प्रथमयज्ञेनेष्ट्वा गृहपतिसंज्ञकेन केवलयजमानपदार्थकारिणा सप्तदशेन पुरुषेण सहिताः संतः स्वा
न्स्वानग्नीन्सर्वान्निमथ्यं यित्वा सर्वे च दीक्षित्वा गृहपतिमुखाः सत्राण्यासते सत्रैर्यजंत इत्यर्थः। इष्टप्रथमयज्ञा इत्या
हिताग्निविशेषणं। यद्याहिताग्नयस्तदेष्टप्रथमयज्ञा भवेयुरिति। तेनानाहिताग्नीनामपि सत्रासनमस्तीति गम्यते।
तन्मुखा गृहपतिप्रधानाः गृहपतस्यभिप्रेत्य वै कल्पिकदीपदार्थकारिणस्तथाविरुद्धधर्मसमवाये च गृहपतेरविरोधे

(105)

सू॰वृ॰
१०७

नकर्तव्यमित्यर्थः। तेषां समावापादियथार्थमभिधानमैष्टिके तंत्रे। तेषामिति सत्रिणः पुरुषाश्चयन्ते। समावापदृति
यस्मिन्कर्मण्यग्नयः समोप्यन्ते तत्कर्म समावापशब्देनोच्यते। साग्नीनामनग्नीनां च सत्रासनमुक्तं। तत्र साग्नीनां स-
त्रिणां समावापादियथार्थमूहः कर्तव्यः। ऐष्टिके तंत्रे। नावनस्पतियागे सूक्तवाकादौ च नैष्टिकेन पाशुकइत्यर्थः। तं-
त्रग्रहणं ऐष्टिकसंबंधेपि तंत्रशब्दवाच्य एव भवति। नान्यत्रेवेत्येवमर्थं। तेन प्रथमाध्याये विहिते प्रायश्चित्तेपि भव-
ति। तस्मिन्नध्याये तंत्राधिकारात्। न तृतीयाध्यायविहित इति तंत्रवचनं। दीक्षणाद्यनग्नीनां। साग्नीनां समावाप-
प्रभृतियथार्थमभिधानमुक्तं इदानीमनग्नीनां दीक्षणीयाप्रभृत्येव यथार्थमभिधानमैष्टिके तंत्रे इत्युच्यते सत्राण-
मग्निसाध्यत्वादनग्नीनां साग्निभिः सहैव सत्रासनं भवति। तत्र दीक्षणात्प्राक्तनेषु एकश्चेत्साग्निरेकवचनेन द्वौ चे-
द्द्विवचनेन बहवश्चेद्बहुवचनेनेत्येवं भवति। सत्रेष्वग्निबहुत्वे यजमानबहुत्वे च सति सर्वेषु यजुर्निगदेष्विति यथा-
र्थमूहे प्राप्ते समावापादीत्यनेन सूत्रेण यजमानाभिधायिनामेवेति नियम्यते। ऐष्टिके तंत्र इत्यपि चा। न तदुत्त-
रसूत्रेण तावेव नियमावनग्नीनां दीक्षणीयाजैष्ठ्येवन प्राग्भाविन्युखासंभरणादाविति विधीयते। अग्निमुख

रामं॰
१०७

-संस्कार्तीहोतासंवस्कार्या आहवनीयः आहवनीयस्य यदैजमानेनोत्पादितत्वात् यजमानस्य पुत्रवदुपचर्यते। तस्माद्यजमानस्याग्ने-
त्रमाहवनीयस्यापि भवति। तस्मात्संस्कार्यभूतस्य प्रवरणस्याप्याह्वनि। अग्नीनां तु गृहपतेराहवनीय एव आहवनीयो भवति। तस्मादनग्नीना-
मपि प्रवरणं कर्तव्यमेवानेनैव प्रकारेण सूक्तवाकेनामादेशश्च कर्तव्यः इति सिद्धांतभाष्यैः ४

मिति च याज्यानुवाक्ययोः। ऋत्वात् प्राप्त ऊहो विधीयते। दंडप्रदाने। अनैष्टिकत्वादस्य मंत्रस्योहविधानं। अ-
स्मिन्मंत्रे यजमानविषयस्य पदस्याभावेप्यूहविधानं सामर्थ्याद्दंडविषयस्यैवायमूहविधिरिति कल्पनीयं।
अत्र बहवो दंडाः संनिदीक्षितबहुत्वात्। दीक्षितदंडस्य च प्रकृतौ मैत्रावरुणाय दंडत्वमवगतं। अत्र च ते बहवः संनिहि-
ताः संति तेषां च सर्वेषां प्रदानं प्राप्तं। एवं प्राप्ते ऊहो विधीयते। मैत्रावरुणश्च सर्वान्दंडान्गृहीत्वा एकेन दंडेन दंडित्वसि-
द्धेस्तेषामेकेनाभिमतेन सहितः स्वपदार्थान्कुर्यादित्येवमत्र कल्पयितव्यं। प्रैषेषु निवित्सु। अप्राप्ते विधीयते। एतया-
ज्यायां। अनैष्टिकत्वादत्राप्राप्तविधिः। कुंडं चाऋत्वात्प्राप्तिः। अच्छावाकनिगदोपहवप्रत्युपहवेषु। निगदश्च
उपहवश्च प्रत्युपहवश्च निगदोपहवप्रत्युपहवमिति द्वंद्वैकवद्भावः। पुनश्चाच्छावाकेति शब्देन षष्ठीसमासः। अच्छावाक-
स्य निगदे यजमानहोतरध्वर्यो इत्यत्र उपहवप्रत्युपहवे प्रत्येतासुन्वन्निति तत्र आर्षेयाणि गृहपतेः प्रवरित्वात्सादीनां
मुख्यानां। आर्षेयवरणे गृहपतेः प्रथमं वरितत्वात्सादीनां मुख्यानां प्रहणीते। गृहपतेः एकवचनं यावंतो नंतर्हि तावत्सु भा-
पि पृथग्वरणार्थं। व आत्मादिवचनं दीक्षाक्रमनिवृत्त्यर्थं। तेन सूक्तवाकादौ नामादेशे दीक्षाक्रमस्यास्य च विकल्पः

१०६

सर्वत्र सिद्धो भवति। एवं द्वितीयतृतीयतुचतुर्थानां। सर्वत्रात्मवर्णादित्वमस्मत्सूत्रोक्तएव क्रमश्च। यावंतोनंतर्हिताः समा
नस्गोत्रास्तावतांसहकृत्।समानगोत्राःसमानार्षेयाइत्यर्थः सगोत्राणामपिभिन्नार्षेयत्वसंभवात्समानार्षेयत्वमेवतंत्रमि
ष्टोनिमित्तमितिलक्षणार्थत्वमत्राभिहितं समानगोत्रशब्दस्यार्षेयवरणस्याहवनीयसंस्कारत्वेससाहवनीयभेदेन सत्यार्षे
यस्यैकाहरणकालेकाप्याहरणे विशेषाग्नहरणंतत्रानुष्ठानमुक्तवानाचार्यः।आवर्तयेद्वाइत्यान्वयाः संस्काराः।वाशब्दःपक्षं
व्यावर्तयति।आवृत्तिरेवात्रकर्तव्याइत्यान्वयाः संस्कारायतः इध्मे अन्वयोयेषांते द्वान्वयाः संस्काराणां द्व्यवशवर्ति
त्वादित्यर्थः।प्रतिप्रधानं गुणाआवर्तंतेइति सिद्धो न्यायः।यत्तु न विशेषाग्नहणात् अनावृत्तिरपितदपि न एकवचनां
तस्यार्षेयस्य बहुषनभिधानादिति।एवं चेद्वचनोहः किमितिनक्रियते।तेषां समावापादिद्युत्यत्रयजमानवाचि
नामेवोहनियमात्।अतआवृत्तिरेवात्रयुक्ता।साग्निचित्येषु क्रतुषूखासंभरणीयामिष्टिमेके।अग्निचयनमग्नि
चित्यातयासहवर्तंतेइतिसाग्निचित्याः क्रतवः।तेषूखासंभरणीयानामेष्टिकेशाखिनआमनंतितउखासंभरण
प्रयोजनात्उखासंभरणीया।अग्निर्ब्रह्मएवानग्निः क्षत्रवानग्निः क्षत्रभृत्।ब्रह्मएवान् क्षत्रवान् क्षत्रभृच्छब्दाअ

ग्निर्गुणास्तिस्रोदेवताः।एतेनाग्नेब्रह्मणावावृषस्वब्रह्मचतेजातवेदोनमश्चपुरूथालायासवित्रचित्रंचितयंत
मस्मेअग्निरीशेबृहतः क्षत्रियस्याचोमिनेसुमतिं घोष्यवोमिति।इदं प्रभृतिकर्मणांशनैस्तरामुत्तरोत्तरंएदं प्रभृति
येषांतानीदं प्रभृतिकर्माणि तेषामुत्तरोत्तरंशनैस्तरां भवति।एतत्त्विपौर्णमासात्।एतदपुखासंभरणीयपौर्णमा
साच्छनैस्तरां भवति।अतएतत्सिद्धं भवति।मंद्रादिषुत्रिषुस्थानेषुषष्टेनयमेनदर्शपूर्णमासयोर्मंत्राणां प्रयोगः।सप्त
मेनवषट्कारइति।एवं पंचतुर्थतृतीयद्वितीयप्रथमेषूखासंभरणीयाप्राजापत्यादीक्षणीयाप्रायणीयातिथ्याःप्र
योक्तिव्याः।तस्मात्तस्मादुत्तरेणचवषट्कारः।प्रायणीयावत्सोमप्रवहणं।मंद्रस्यद्वितीयेनमेनेत्यर्थः।ऊर्ध्वं प्रथमा
याअग्निप्रणयनीयायाऔपवसथ्ये नियमः।औपवसथ्येयदग्निप्रणायनंतस्य प्रथमायाऊर्ध्वंस्वरेष्वनियमो भव
ति।मंद्रो वामध्यमो वाउत्तमो वासर्वो वासचप्रयोगपक्षेमंद्रादीनुत्तमपर्यंतानारोहणेरेवप्रयुंजीत।एकस्वरप्रयो
गेपियमानेवारोहयेत्।मध्यमादिघर्मे।घर्मेमध्यमोत्तमयोरेवनियमः।।नमंद्रस्यनत्रप्रवेशइत्यर्थः।अत्रापिस्व
रयोर्यमानां चारोहित्वमेवस्यात् २ दीक्षणीयायांधाय्येविराजौ।दीक्षाप्रयोजनाइष्टिः दीक्षणीयासाकर्तव्यात

स्०द्
१०९

स्यां धाय्ये विराजौ भवतः। अग्नाविष्णू। अस्या मियं देवता। अग्निर्मुखं प्रथमो देवतानां संगतानां सांगतानामुत्तमो
विष्णुरासीत्। यजमानाय परिगृह्य देवान् रक्षयेदं हविरागच्छतं नः। अग्निश्च विष्णो तप उत्तमं महो दीक्षापालाय वन
नत हि शक्रा। विश्वैर्देवैर्यज्ञियैः संविदानौ दीक्षामस्मै यजमानाय धत्तमिति। साग्निचित्ये त्रीण्यन्यानि हवींषीति
शेषः। वैश्वानर आदित्याः सरस्वत्यदितिर्वा। अंत्ययोर्विकल्पः। त्रीण्यन्यानीत्युभयविशेषणात्। आग्नावैष्णवाद
धिकानि त्रीणीति गम्यते। धाय्ये न आदित्या सो जगत्स्थाइति द्वे। एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा। एते एव वै आ
दित्येभ्यो भुवद्वद्भ्यो आदित्येभ्यो भुवनपतिभ्यश्च याज्यानुवाक्ये भवतः। भुवनपतिलिंगयोरेव भुवनपतीनां
विधानादेतद्गम्यते। सगुणे अपि निर्गुणाया विहितेव चनात् ते सगुणाया स्तेन भवुत इति। नेदमादिषु मार्जनमपा
गुरयनीयाया। इदमादिषु कर्मसु प्रागुरयनीयायामार्जनं भवति। द्विविधं चेह मार्जनं त्यते। चोदितं लैंगिकं
च। परिस्तरणे रंजलिमंत धीयापआसेवयते। स ब्रह्मकाश्चालालेमार्जयंते इति चोदितं। प्राच्यां दिशि देवा ऋत्वि
जो मार्जयंतामिति लैंगिकं। तदुभयं प्रतिषिध्यते। शास्त्रांतरे चरप्र वव नमस्तिरीक्षणीयादिषु योल्कविमोका

हेरंबु
१०९

दिन भवतीति। तेन उभयप्रतिषेधो वगम्यते। एवं सति दर्शनारग्नीषोमीयसवनीययोश्चात्वालमार्जनं न प्रति
षिध्यते। कुतः चात्वाले मार्जनेन प्रतिषिध्यते। कुतः चात्वाले मार्जयित्वाध्वर्युपथ उपतिष्ठंत इति सवनीये दर्शनं
। अग्नीषोमीयेणाचाल मार्जनादिति सिद्धवदनुवादाद्ग्नीषोमीयेप्यस्तीति गम्यते। एवं सत्यनयोर्न प्रतिषेध इति
सिद्धं। इदमादीळायां सूक्तवाके चागूराशीस्थाने। इळायां सूक्तवाके च या आशिषस्तासां स्थाने आगूर्नामप्रेषः
प्रयोक्तव्यः। आगुरं प्रक्षिप्याशिषऽद्द्त्सयथा तो प्रयुज्यते इळायां सूक्तवाकेन यथा पाठं नेवदर्शयति। उपहूतो यं य
जमानोस्य यज्ञस्यागुर उदृचमशीयेति तस्मिन्नुपहूतः। एवमिळानिगद इत्यर्थः। उपहूतो यं यजमान इत्य
स्मादुपरिष्टात् तस्मिन्नुपहूत इत्यस्मात् पुरस्ताद्यः पदसमुदायः ता आशिषः इत्युच्यंते तत्स्थाने यः पदसमुदा
यः इदानीं पठ्यते असावागूरित्युच्यते। एवमिळानिगदः। आशास्तेयं यजमानोस्य यज्ञस्यागुर उदृचमशीयस्या
शास्ते इत्येवं सूक्तवाक इत्यर्थः। आशास्तेयं यजमान इत्यस्मादुपरिष्टात् आशास्ते वै यदनेन हविषेति। अस्मा
त्पुरस्ताद्यः पदसमुदायस्ता आशिषस्तत्स्थाने यः पदसमुदाय इदानीं पठ्यते स चागूः। एवं सूक्तवाक निगदः। अ

(109)

सू.टी.
२२०

स्य यज्ञस्यागुरस्मृदत्वमशीयेत्युभायद्यागूः अस्यायमर्थः। अस्य यज्ञस्य प्रारब्धस्य समाप्तिं प्राप्नुयामिति। तस्मिंनुप
हूतदर्शीक्षायां। प्राप्नुयामित्याशास्तेऽद्विति सूक्तवाके। अतऽयमप्याशीरेव। आगूरित्यस्य उद्गाशासनरूपत्वादागुरि
त्युच्यते। न चात्र नामादेशः। पाठादेव नामादेशाभावेसिद्धे पुनः प्रतिषेधवचनं अन्यत्सर्वं प्रकृतिवदेवेति वक्तुं
प्रयोजनार्थं। प्रकृत्यासांसत्स्यऊर्ध्वं पश्चिळायाः। सर्वनीयपश्चिळाचगृह्यते। तच्छन्दोदिनत्वात्। असदितिवचनादहर्ग
णेऽप्यस्येहलिप्तश्चिळास्यते। एकाहेषु नदेवाधुर्मत्यचभवति। दीक्षितानां संचरो गार्हपत्याहवनीयावंतरा येनः त्र
णयेना। संचरशब्द आसनशयनादीनां प्रदर्शनार्थः। तेनाग्निलवधीनयोरेवाग्न्योर्मध्ये समीपेयजमाना
वृत्तेरन्। अग्निप्रणयनोत्तरकालं संचरदेशः शाखांतरादवगतव्यः। दीक्षणादिरात्रिसंख्यानेन दीक्षा अप
रिमिताः। प्रकृतेरिदं दीक्षाविधानं यस्मिन्नहोरात्रदीक्षयां क्रियते तदेवारभ्य रात्रिरेव संख्यायापरिमिताश्चदी
क्षाः कर्तव्याः। तस्माद्दीक्षितो द्वादशाहं भृतिं विन्देतेति प्रकृतौ नित्यवदाम्नातं। नदामासं संवत्सरं यद्वा वा कृशः स्या
दिति परिमिता। अपरिमिताश्चदीक्षाकल्प्याः शाखांतर आम्नाताः। तेषां प्रदर्शनार्थमपरिमितवचनं। अध्व

२२०

र्युप्रत्ययत्वाद्दीक्षा नियते। तत्सूचनामात्रमत्रोक्तवानाचार्यः। सत्राणां दीक्षाविधानमत्रोच्यते। एकाहप्रभृत्यासं
वत्सरान्। संवत्सरांतु क्षसत्त्रे। महाव्रतसहितसत्रे अयं विशेषः। संवत्सरमेवेति। द्वादशाहतापश्चितेषु यथासु
त्योपसवः। तेषु सत्रेषु यथासुत्योपसदः। तथा दीक्षा अपि कर्तव्याः। उपसत्संख्याया अप्यन्यत्राविहितत्वा
दत्रैव विधिः कल्प्यते। यत्संख्याः सुत्या उपसदश्च तत्संख्या दीक्षा एवेति। एतदुक्तं भवा। द्वादशाहतापश्चितेषु य
त्संख्याः सुत्यास्तत्संख्याः सुत्या एवोपसदश्च दीक्षा भवंतीति। कर्मोचारस्त्वेकाहानां। आचीर्यते स्मिंनित्याचारः
कालः। कर्मण आचारः कर्मणचारः। एकाहानां प्रयोगकालो वक्ष्यतऽत्यर्थः। एकाहशब्देनात्र विकृत्येकाहा
उच्यंते। अहर्गणान संबंधात्। प्रकृतौ दीक्षाणां विहितत्वात्। तुशब्दो विशेषविध्यर्थः। अस्मिन्प्रकरणे दीक्षाका
ल एव विधातव्ये दीक्षोपसत्सहितानामेकाहानां प्रयोगकालो विधीयतऽद्विति विशेषः। एकातिस्रो वा दीक्षा स्ति
स्र उपसदः सुत्यमहरुत्तमं। उत्तमग्नाहणं प्रातरनुवाकादुदवसानीयांतमेकमेवाहः स्यात न तु सुत्यशब्देनान्यत
दित्येवमर्थं। दीक्षाकालविधानस्योपसत्सुत्यानामपि विधानं त्रिप्रकाराणामेवं सोमिकत्वसिध्यर्थं। तेन दीक्ष

१०७

णी। याया: प्राग्भाविन्त्रवासंभरणी यादेः सौमिकप्रमेत्रपांशुत्रादिर्नभवतीति सिद्धं। दीक्षांते राजक्रयः। दीक्षाहः सु
परिसमाप्तेषु अनंतरं यदहस्तस्मिन्नहनि राजक्रयः कर्तव्यः। सोमः क्रेतव्य इत्यर्थः॥ २१॥ तदहः प्रायणीयेष्टिः।
यस्मिन्नहनि सोमः क्रेष्यते तदहः प्रायणीया नामेष्टिः कार्या। दीक्षांते राजक्रय इत्युक्तां तदहरिति वचनात् दी
क्षांते यदहस्तस्य राजक्रय इति संज्ञा। अथात्र नाभवतीति गम्यते। तेनायमर्थः। तदहरिति यस्मिन् राजक्रयसंज्ञमहस्त
स्मिन्नित्यर्थः। पथ्यास्वस्तिरग्निः सोमः सविता दितिः। स्वस्ति नः पथ्यासु धन्वस्विति हे अग्ने नय सुपथा राये अस्मा
न् देवानामपि पंथामगन्मत्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्यां मा विश्वेदेवं सत्यतिं
यद्य मा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसं महीमषु मातरं सुव्रतानां सेद मिरग्नी रत्यस्त्वन्याति
तिद्वे संयाज्ये शंय्वंते यं। इयमिति वचनात् इयमेव शंय्वंता नोदयनीयेत्यर्थः॥ अनाज्यभागा। चशब्दो ध्याहर्तव्य
ः। अनाज्यभागा चेयमेव भवति। नोदयनीया। संस्थिता यां॥ ३॥ राजानं क्रीणंति। संस्थितायामिति वचनं
प्रायणीयया राजक्रयस्य असंबंधार्थं। तेनाहर्गणेषु प्रायणीया यावद्राजक्रयो नाभ्यावर्तते पितन्मः। सकृदेव

कर्तव्य इत्यर्थः॥ क्रीणंतीति वचनं सोमप्रवहणे यदस्माकं कर्म विहितं तत्क्रयोत्तरकालवर्तिष्वेव प्रवहणे भवति
नान्यकालीन इत्येवमर्थं। तं प्रबद्धस्य सुपश्चादनसस्त्रिपदमात्रेंतरेण वर्त्मनी अवस्थाय प्रेषितो भिहिंकारात्
विप्रस्तं कविरस्त्वविश्वानि धारयन्। अपजन्य भयं नुदेत्यस्यं दयत्यासीं प्रपदेन दक्षिणापांसून्स्त्रिरुदुह्यानुब्रू
यादुद्राद्भिश्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु। अथेमवस्य वर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीर इ
ति तिष्ठन्। तं क्रीतं सोमं राजानं प्राग्वंशसमीपं नेष्यत्स्वध्वर्युषु पश्चादनसस्त्रिपदमात्रे गतीते चक्रयोर्यैवर्त्मनी। तयो
श्च मध्यदेशस्यार्जवेन यो देशस्तस्मिन्नवस्थाय प्रेषितः सन्नभिहिंकारात्प्राक्प्राचीनमेवाल यन्प्रपदेन द
क्षिणस्यां दिशि णस्यां दिशि पांसून्स्त्रिरुदूह्य पेत। त्वं विप्रइति मंत्रेण। ततस्तस्मिन्नेव सामीप्ये स्थित्वा अभिहिं कृत्वा
नुब्रूयात् तिष्ठन्निति वचनं व्रजत्स्वध्वर्युषु प्रथमामसमाप्य न व्रजेदित्येवमर्थं। अनुव्रजंस्तुत्तराः अंतरेणैव व
र्त्मनी। अंतरेणैव वर्त्मनी अनेन यथानुव्रजन्नुत्तरा अनुब्रूयादित्यर्थः। व्रजन्नेवानुब्रूयान्न व्रजन्न विक्षेपेद्
त्येवमर्थं व्रजतिग्रहणं। सोम यास्ते मयास्ते म यो भुव इति स्त्रः सर्वे नंदंति यशसागतेनाग न्देव कतुभिर्वर्ध

१२८

स्. वृ.
११२

तुक्षयमित्यर्धर्चे आरमेत्। अवस्थितेन सिद्दक्षिणात्यश्चाद् भिक्रम्य राजानमभिमुखो वतिष्ठते। अनस्य वृस्थि
तेनस्य दक्षिणपार्श्वे नराजसमीपं गत्वानमीक्षमाणस्तत्रैव तिष्ठेत्। प्रपाद्यमाने राजन्यग्रेण ग्नो तुसं व्रजेत्।
अनुव्रजन्तु त्तराइतिसर्वास्वृक्षु अनुव्रजतानुवचन सिद्धो सत्यामनुव्रजेदितिवचनं सम्यग्गात्तोनंतरमेवानु
व्रजेत्नव्यवायमन्त्रेषं कुर्यादित्येवमर्थः। अतोग्नेणाहवनीयं गतस्यानुव्रजनं कृतं भवति। यानेधाम निह विपा
यजं तामां धियं शिक्षमाणस्य देवेति निहिते परिदध्याद्राजानमुपस्पृशन्। निहितइति व्रजनमाप्तिर्दर्शनो
तिष्ठन्नेव परिदध्यात्। वसतैश्रुषुवा। उपस्पर्शे नयि पस्य विकल्पो यां मंत्रेण बद्धस्य विस्रंसनेबंधन शास्त्र
विरोधः। वसानो पस्पर्शने च राज्ञोपस्पर्शन शास्त्रस्य विरोधः। तत्रान्यतरस्य लक्षेणाश्रयणो सति उपस्पर्श
नस्यैव लक्षणाश्रयणं युक्तं। बंधनो नरकाले विहितत्वादिति वसनरज्जुक्तं वचनाद्धस्य [illegible] वचनादेवं वि
स्रंसनेन दोषइति मत्वा अंशुर्शुवेत्युक्तं। वाशब्दे पस्पर्शाद्यर्थः। वद्धो वसती तिवचनात्पुनरपि बंधनं कर्तव्य
॥५॥ अथातिथ्येष्टौ तां। अथातिथ्ये आतिथ्या नामेष्टिरनंतरं कर्तव्या। तस्या अग्निमंथनं नस्याहुति

राम ०
११२

वचनं तदंगतया सिध्यर्थं नेनास्मिन्नग्निमंथने मंत्रस्य प्रथमयमः साधितो भवति। धाय्ये अतिथिमंतो।
समिधाग्निं दुवस्यतानाप्याय स्वसमेतुतइति विश्वुरिदं वि विचक्रमेतदस्य प्रियमभिपाथो अश्यां नौ होतारं चित्र
रथमध्वरस्य प्रप्रायमग्निर्भरतस्य शृण्वे इति संयाज्ये। संस्थितायामाज्यं तानूनप्त्रं करिष्यं तो भिमृशंत्य
नाधृष्टमस्यनाधृष्यं देवानामोजो अभिशस्तिपाः अनभिशस्त्येञ्जसा सत्यमुपगेषं स्विते माधा इति। सं
स्थित इति वचनमहर्गणेषु तानूनप्त्रस्या नाष्टत्यर्थं। तानूनप्त्रमित्याज्यविशेषस्य नाम। करिष्यंत इत्यार्त्वि
ज्यं करिष्यंतः करिष्यंतग्रहणं सर्वे स्वयमेवाभिमृशेरन्नु नान्यो न्यस्य प्रातिनिध्येनेत्येवमर्थं। स्पृशेद
ण्डं राजानमाप्याययंति। आप्यायन स्वरूपमुक्तमद्भिः संस्पर्शनाधिक्यादि भिंतिइदमादि मंत्रं नारब [illegible]
पसत्यु इतः प्रभृत्युपसत्सुपद्धको पस्पर्शनं क्रियेत तत्रमरंतीरेवग्रहीयान्। मेदं सोना मनमा आपः। उप
स्पर्शन संनिधावाढुकत्वादुपस्पर्शन एवायं नियमो नाचमनादावपीति गम्यते। अर्थग्रहणमर्थप्राप्त्युपस्प
र्शने भवतीत्येवमर्थं। अंशुरंशुष्टे देवसोमाप्यायतामिंद्रायैकधनविद आतुभ्यमिंद्रः प्यायतामात्वमिं

११८

सू० वृ०
११३

इन्द्राय प्याययास्मान्त्सखीन् । सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति । आप्यायनमंत्रोऽयं । स्पृष्ट्वो
दकं निह्नवं ते प्रस्तरे पाणी निधायोत्तानौ दक्षिणं सव्यान्नीचरणोत्तानं यप्रष्टावामानित्रेषेभगाय । ऋतमृत
पाभ्यो नमो दिवे नमः पृथिव्या इति । निह्नवो नाम नमस्कारः । द्यावापृथिवीभ्यामेव तन्नमस्कुर्वन्तीति दर्शना
त् । तेन पाणिनिधानं नमस्कारांजलिरूपेष्वं ॥ ५ ॥ स्पृष्ट्वोदकं प्रवर्ग्येण चरिष्यत्सूत्तरेण खरं परिव्रज्य पश्चात्ख
रस्योपविश्य प्रेषितोऽभिष्टुयाद्ग्रावाणं । एतान्युदकोपस्पर्शनान्युत्तराङ्गानि आप्यायननिह्नवप्रवर्ग्याणामंगानी
त्यर्थः । प्रवर्ग्यशब्दः कर्मविशेषवचनः । तेन चरिष्यत्स्विति वचनं होतुरभिष्टवनकालविधानार्थं । तेन कालांत
रे यद्यध्वर्युर्वश्वरं तिनप्यभिष्टुयादेव । खरो नाम यत्र महावीरः संसाद्यते स देशः । एतदुक्तं भवति । अध्वर्यौ
प्रदिशं प्रवर्ग्येण चरिष्यत्सु होतोत्तीर्थेन प्रपद्य खरस्योत्तरेण प्रव्रज्य तस्य पश्चादुपविश्य ततः प्रेषितः सन्न
भिष्टुयाद्ग्रावाणं । ग्रावाणलक्षणमाह । ऋचमृचमनवानमुक्त्वा प्रणुत्यावस्येत् । अस्य विधानस्य ग्रावा
नमिति संज्ञेति प्रदर्शनार्थं । पूर्वसूत्रे ग्रावाणशब्दप्रयोगः । अवसानमुक्त्वा सार्धमित्युक्तं तेनार्धर्चाः संहित

रामः
११३

यावत्क्याः । तत्रार्धर्चान्तसंधाने भाषिकेव संहितास्यान्न छांदसीतिमे तत्वं । ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसी
मतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः । इयं पित्र्या राष्ट्र्येत्वग्रे प्रथमा
य जनुषे भूमनेष्ठाः । तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणंतु प्रथमस्य धासेः । महान्मही अस्तभायद्विजा
तो द्यां पिता सद्म पार्थिवं च रजः । स बुध्नादाष्ट जनुषाभ्युग्रं बृहस्पतिर्देवता तस्य सम्राट् । अभि त्यं देवं सवि
तारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिं । कविं । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्स
वीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः । तृपा स्वरिति वा । संसीदस्व महाँ असीति संसाद्यमानेऽजंनि
यं प्रथायंतो न विप्राद्रूप्यमाने पतंगमक्तमसुरस्य मायया । यो नः सनुत्यो अभिदासदग्ने भवा नो अग्ने सु
मना उपेतौ वितिष्ठत्वाः कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पंच परित्ता । गिर्वणो गिरो विद्धि धारयस्व उक्थ्य
क्व्यं वचः । शुक्रं ते अन्यद्यजतं ते अन्यत् । अपश्यं गोपामनिपद्यमानं सकृत्कृद्रष्टस्यायं वेनश्चोदयत्पृश्निग
र्भाः पवित्रं ते विततं ब्रह्मणस्पत इति द्वे । वियत्स वित्रं धिषणा अतन्वत घर्मं शोचंतं प्रणवेषु बिभ्रतः । समुद्रे अं

112

सू.दृ.
११४

तरा यद्वो विवक्षणं चिर॒न्तेना मन्त्रवर्णस्य मन्त्रतागणानां त्वाग्नयश्च यस्या पश्यं त्वे त्ये नस्याग्रयायजमानमी
क्षते द्वितीयया पत्नीं तृतीयया स्नानं कारा धन्नो आश्विनावामिति नवाभ्यात्मनिर्ग्नो वा णेवेच्छे द्यावापृथिवी इति
प्रागुत्तमाया अरूरुचदुषसः पृश्निरमियद्दत्वा वपे नोत्तरेणा धर्वेन पत्नीमीक्षेतोत्तमया परिहिते समुत्थाप्ये
नाध्वर्यवो वाचयंतीति नु पूर्वे पटलं॥ एतावत्पूर्वमभिष्टवनं॥ अत्र मध्ये यद्व्याख्यानेव चनेन तदेव व्याख्यायते
॥ कृपा स्वस्तृपा स्वरिति द्वा॥ ऋगवयवभूतयोः कृपा तृपा शब्दयोः प्रयोगविकल्पोयं॥ संसी० यमानो सम्य
क् साध्यमान इत्यर्थः॥ अंजः मानो अभिपूर्यमाणो वा॥ उत्तरा स्वप्याभिरूप्यं यथाशक्तिसंपाद्य पठनीयं॥ अप
श्यं० क्षते॥ द्विती० लीं तृती० स्नानं॥ प्रागुत्त० वपेत॥ उत्तरेणा० क्षेत॥ अत्र क्रियांतरसंबद्धा ऋचस्ता सामर्थ्यात्स
भिष्टवनेनेव कार्यं अभिष्टवनं नाम घर्मस्य संस्कारो भिधानरूपः॥ एतच्च घर्ममभिष्टु॥ हीति संप्रैषादवगतं
॥ तत्र यत्क्रियांतरमीक्षणादि तदानुपूर्वीकं॥ तदपि वचनात्कर्तव्यमेवा॥ तत्क्रियमाणमेवं क्रियेत यजमाना
दीनिरीक्षमाण एताभिरभिष्टुयादिति॥ अरूरुचदित्यस्या मृच्युत्तरमेवाधर्वं मीक्षमाणो ब्रूयात्॥ उत्तरेणेति वच

११५

नात् अस्मादेव वचनात्पूर्वी स्वप्याशारं भोवगतः॥ उत्तमया० वयंति॥ परिधानीयानंतरं अध्वर्युभिर्युदुक्तं तदस्मदी
येरपि कर्तव्यमित्यर्थः॥ उत्थाप्यावाचयंतीत्यध्वर्युशास्त्रोक्तस्य होत्रादिभिरनुष्ठेयत्वं सूचयति॥ इति नु पूर्वं पटलं॥ ब्र
ह्मज्ज्ञानमित्यादियविदमुक्तं तत्पूर्वमभिष्टवनमित्यर्थः॥ इतिकारः समाप्तिसूचकः॥ नुशब्द उत्तरविवक्षासूच
नार्थः॥ १५॥ अथोत्तरं॥ अथशब्दः संबंधार्थः॥ पूर्वोत्तरयोः पटलयोः संबंधप्रयोजनमुत्तरेपि पटले ऋग्गाथाना
दि धर्मप्रापणार्थः॥ उत्तरमिति वचनं यज्ञाभ्यवधाने सत्येकाभिष्टवनत्वसूचनार्थं॥ उपविष्टेष्वध्वर्युर्घ
र्मदुघामाह्वयति स संप्रैष उत्तरस्य॥ उपविष्टेषु होत्रादिषु यदध्वर्युर्घर्मदुघामाह्वयति असावेहीति तदेवांत
रस्यारंभे निमित्तमित्यर्थः॥ उपविष्टेष्विति वचनेयदध्वर्यवो नोत्थापयति तदाप्युत्थाय स्वयमेव कुर्युरित्यस्या
र्थस्य सूचनार्थं॥ अनभिहिंकृत्य उत्तरमभिष्टुयादिति शेषः॥ उपह्वये सुदुघां धेनुमेतामिति द्वे अभित्वादेव
सवितः समीवृत्संनमातृभिः संवत्सइव मातृभिर्यत्ते स्तनः शशयो यो म० यो भूर्गौरमीमेदनु वत्सं मिषंतं न
मसेदुपसीदत संज्ञानाना उपसीदन्त भिज्ञा दशभिर्विवस्वतो दुहंति सप्तैकां समिद्धो अग्निराश्विना तप्तो

11B

स०टी०
११५

वां घर्म आगतं । दुग्धं ते गावो वृषणे ह धेनवो दस्रा मदंतिकारवः । समिद्धो अग्निर्वृषणा रतिर्दिवस्तप्तो घर्मो दुह्यते
वामिषे मधु । वयं हि वां पुरुतमासो अश्विना हवामहे सधमादेषु कारवः । नदुप्रयक्षममस्य कर्मात्मन्वन्न भो दुह्य
ते घृतं पय उति प्रवर्णस्य तद्दैतामुक्त्वा वतिष्टेन दुग्धायामधुक्षत्पिप्युषीमिषमित्यादिं यमाण पा३पयसा गो
धुगो षमा घर्मे सिंचय उस्त्रियामाः । विनाकमस्थ्य स्वविनावरे एयानुद्यावापृथिवी स्तु प्रणीतिरिस्ता सिच्यमान^
आ नूनमश्वियमित्याज आसिक्तयोः समुत्से मूहनीरपइति महावीरमादायोतिष्ठत्सूदुद्धदेवः सविता हिरण्य
येस्य नूनिष्टे स्ते तु ब्रह्मणस्पतिरित्यनुब्रजेद्दूं धर्वंद्रस्था पदमस्या रक्षमरनी । निरवरमवेक्ष्य तमा । गतिक्रम्य नाके सु
पर्णमुपयत्संतंती तिसमाप्य प्रणवेनोपविशेद्निरस्य तृणं प्रेषितो यज । तिनत्तो वां घर्मेनिक्षतिस्व होता प्रवाम
ध्वर्युश्चरति प्रयस्वान्नू मधोदुग्धस्याश्विना तनायावीतं पयस उस्त्रियायाउ आ पिबतमश्विनेनिचो भाभ्याम
नवानमेग्ने वीही त्यनुवषट्कारो घर्मस्याग्ने वीहीति वा ब्रह्मा वषट्कृते जपत्यनुवषट्कृते च विश्वा आशा
दक्षिणसाद्विश्वान्देवानयाळिह स्वाहा घृतस्य घर्मस्य मधः पिबतमश्विनेत्येवमेवा परा हि केयदुस्त्रियास्वा

राम०
११५

हुतं घृतं पयोयं स वामश्विना भाग आगतं माध्वी धर्तारा विदथस्य सत्पती नर्त्तं घर्मं पिवतं सोम्यं मध्वस्य पिबत
मश्विनेति चा प्रेषितो होतानुवषट्कृतः शुचिर्देव शुघं मों यो अश्विनोश्चमसो देवपानः । तमीं विश्वे अमृता
सो जुषाणा गंधर्वस्य प्रत्यास्ना रिहंति । समुद्राद् र्मिमुदियर्त्ति वेनो द्रप्सः समुद्रमभियज्जिगाति । सखेस॰
स्वायमभ्याववृत्स्वो ध्वेऊष्णकृतयइ तिहूतं घे मिश्शानमस्विनरति प्रागाथो पुर्वाह्ने काण्वीमपरांवात्स्यं तंका
ण्वी । त्वेवोत्तमे पाक्क क्षशोचे नव हिक्षयं परीत्युक्त्वा भक्षमाकांक्षेद्धाजिनेन भक्षो पायोद्गुतंह । विमधुहविरिंद्रत
मेग्नावृश्याम ते देवघमतः पितुमतो वाजावतो गिरस्वतो नमस्ते अस्तु मा हिंसीरिति भक्षजपः कर्मणा घर्मं भक्ष
येयुः सर्वेत्तु दीक्षिताः सर्वे पुदीक्षिते पु गरहूपते स्तनीयो न मोभक्षो संप्रेषितः श्ये नोनयो त्रिंसदनंधियाक
तमायस्मिन्नत्तवासवारोहत्तु पूर्वो रुहः । ऋषिहे ही घे क्कजमरुंदुस्य घर्मो अतिथिः । सूपमवसाद्भगवती हि
भूयाइति परिदध्यात् । एतावदुत्तरं पटलं । तन्मध्यगतानि व्याख्येयानि व्याख्यंते । ३ति । ९ इते । उपाधाया मिश्रु
तएदाननिमित्तदर्शनादेवावस्थाने सिद्धे अवनिष्ठतइति वचनमैत्रेवावतिष्ठते नपूर्वो सुळिंगापेक्षा कर्तव्येत्येव

175

सू॰वृ॰
११६

मर्थं । दुग्धाय॰ मिति । आह्नि॰ रिति । आसि॰ गमे । आसु॰ आजे । आसिचमानदृत्यनुषज्यते गम आजदृतिवचना
त्पयो विपर्यासे ऋग्विपर्ययः । आसि॰ पदृनिहृयोः पयसो रासेचनपर्यवसाने सन्निसमुत्थे महती रपदृति रपदृति ब्रू
यात् । महावी॰ रेत् । एनं तथा मिश्रवनेहत्वाऽनंतरमुतिष्ठन् । प्रेतु॰ व्रजेत्॰ तिष्ठन्नेवाल्कानुव्रजेत् । गंधर्वे॰ तृणं । ख
रावेक्षणं तस्य पश्चात् । आङ्॰ मुखस्य तिष्ठतः पुनस्तमभिं तिक्रम्यानुव्रजेत् । प्रजिता श्रोणिदेशं प्राप्य नाके सुपर्ण
मित्यस्या ऋचः प्रणवोच्चारणेतसहतत्रैवोपविशेत् । वाचोन्यत्र व्याप्टतत्वान्निरसनेऽप्युपवेशने मंत्रोच्चारणं न संभ
वति । प्रति । प्रतिषेधस्तु निरसनक्रियाप्रतिषेधार्थः । प्रेषितो॰ वा तं । अत्रे वावसरे यजेति प्रेषित एवाभ्यामृ
ग्भ्यां यजति ऋचोरेवात्रह्निं तन याज्यायाः । तेनस ऊ देवा गूर्वषट्कारो कर्तव्यो । अग्ने॰ कारःषप॰ तिवा । ब्रह्मान्वे
ति । प्रति वषट्कारं अपावृतिः । एवमे॰ ह्निके । अपराह्निक प्रवर्ग्ये एवमेव सर्वं भवति । तत्र विशेषमाह । यदुस्त्रि॰ ति
चा । एतेनो ऋचौ याज्या भवति । भप्रे अप्रे॰ हुते । उत्तरं ब्रूयात् इति विशेषः । अप्रेषितवचनं पूर्वसूत्रे प्रेषितो यजतीत्यस्या
नुवृत्तिसूचनार्थं । तेन यदुस्त्रियास्वाहुतमिति अस्य पिबतमित्येताभ्यामापराह्निके प्रेषितो यजतीति गम्यते ।

राम:
११६

होतृग्रहणं ब्रह्माधिकारनिवृत्त्यर्थं । तेनापराह्निकेपि प्रवर्ग्ये वषट्कारानुवषट्कारानुयोर्ब्रह्मजपोस्तीति गम्यते । ते
घे॰ वीहि । काण्वी॰ हेतु अस्य॰ संतं । अनयोरन्यतरामेव वा सर्वेषु प्रवर्ग्येषु ब्रूयादित्यर्थः । काण्वीह्वेवतनमे । अन्यतर
पक्षेप्ययं विशेषः । उत्तमे प्रवर्ग्ये काण्वीमेव ब्रूयादिति । अनयोर्ऋचोः विशिष्टकालनिर्देशादन्यत्सर्वं साधारणमि
ति गम्यते । पावकं॰ स्येत् । एतामृचमुक्त्वा भक्षार्थमाकांक्षेत् । अत्रावस्थाय्य भक्षणं कर्तव्यमित्यर्थः । वाजि॰ पायुः ।
उक्त इति शेषः । उपायवचनमिळामिव प्रतिगृह्य सेवमादेर्धर्मस्य प्रापणार्थं । हुतं ह॰ जपः । यन्मेरेतः इत्यास्यापि
वादः । अत्रापि प्राणभाक्ष एव यजमानं वर्जयित्वा कर्मिणो॰ येयुः । वाजिनस्य वैश्वदेव्यामुत्पन्नत्वात् तत्र च प्रतिप्र
स्थातुर्भावादत्र प्रतिप्रस्थातुरुपहवव्याभार्थं कर्मिणां भक्षणविधानं । क्रमस्तु वारुणप्रघासिकवात्तस्यप्रा
यत्नभत्वात् । सर्वे॰ क्षिताः । भक्षयेयुरिति शेषः । यजमानत्वादेव सर्वेषां भक्षणप्राप्तेर्वचनमिदं मे आषरुणामस्यादी
यानामस्मच्छास्त्रविहितोपाये नैव भक्षणं भवतीत्येवमर्थं । सर्वे भ॰ क्षौ सत्रोधिकारे पुनः सर्वसंग्रहार्थं सर्वे
षु दीक्षितेष्वि निवचनमसत्रेष्वपि यजमानो गृहपतिशब्देनोच्यत इति ज्ञापनार्थं । तेन होताध्वर्युर्गृहपतिभ्यामपि

स्तोरपि यजमानसंप्रत्ययः सिद्धो भवति गृहपतेस्तृतीयोत्तमभक्षविधानमुपहवे क्रमविधानार्थं । तेन होत्रादिशब्दैरेव तदेषामुपहवयाचनं भवति । गृहपतिशब्देन यजमानशब्देन वा गृहपतेः । एवं सत्यस्य सूत्रस्यार्थवत्ता भवती । ति । संप्रेषितः । उत्तरां ब्रूयादिति शेषः । सूर्यं॰ धाता परिदध्यादिति वचनं विस्पष्टार्थं । उत्तमे प्रागुत्तमाया हविर्हविष्मो महिस मदे व्यमित्याव पेत । उत्तमे प्रवर्ग्ये इत्यर्थः ॥१॥ अथोपसत् । अथशब्दः संबंधार्थः प्रवर्ग्योपसदोः । तेन सप्रवर्ग्यायामुपसदि स्थानाचमनप्रदानानि न भवंति । प्रवर्ग्यार्थं प्रपन्न एवोपसदमपि कुर्यात् । अतः अप्रवर्ग्यायामुपसदि स्थानाचमनादीनि भवंत्येव तस्यां पिष्ट्याज्यया । उक्तादिति शेषः । लुप्यं तदित्यर्थः । प्रादेशोपवेशनेच । पिष्ट्यैव व्याख्यातेनेह प्रादेशः । ईक्षितः सीदः होत रिति वोक्त उपविशेदिति एवं व्याख्याते इत्यर्थः । प्रकृतेऽहोपस्थः पिष्ट्यायोपवेशनातिदेशात्तस्योत्तर्युपस्थनाम सकोदक्षिणोत्तर्युपस्थता त्र विधीयते । उपसद्यायमीन्द्र षदितितिस्र एवैकांचिरनवानं ता ॥ सामिधेन्यः । उपसद्यायमीन्द्रषदिति एतासां त्रिसृणां मृचां मध्ये एकैकामेवैवं त्रिरनवानमब्रूयात्ताएव नवर्चः सामिधेन्यो भवंति । एवैकां मितिवचनात्त्रिसृणामनपरं स्वरं

संतानः कार्यत्वेः । स्वाहृतोनुपरस्यरं संततोनोस्त्येव आसुसप्रेर्वे प्रणवास्ति मात्राएव । अवसानविध्यभावात्पूर्वत्रावसानद्वयमस्ति न चार्थ प्राप्तं । सर्वार्थ एकैकामिति प्रत्यक्करणं । तस्मादत्र च तु मीत्र तावसानेनास्तीति सिद्धं । नवस्वपुप्रणवोस्ति । नवसामिधेनीरन्वाहेति सर्वासां सामिधेनीत्वात् । तासामुत्तमेन प्रणवेनाग्निं सोमं विष्णुमित्यावाह्योपविशेत् । प्रकृतावुत्तमेन प्रणवेन निगदसंधानमुक्तं । अत्रतु तेनाग्न्यादिदेवतावाहनस्य संधानविधानादग्नेमहानिसादेराज्यभागदेवतापर्यंतस्य मंत्रस्य लोपो भवति । ता देवता आवाह्योपविशेदेवन निगदशेषं ब्रूयादित्येवमर्थं । आवाह्योपविशेदित्युक्तं । आज्यप स्विष्टकृदावाहनमर्थ लुप्तमेवेति । नावाहत्येके । आ नावाहनेप्येता एव देवताः । आवाहनं नाम यष्टव्यानां देवता । नां संग्रहणरूपः संस्कारः । न चावाहनप्रतिषेधे सति देवताभावोप्याशंक्येत । तदा नू कानि वृत्यर्थं च वचनं । अग्निर्वृत्राणि जंघनद्युम्न द्विवशाय्यहा त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेदं विष्णुर्विचक्रमे त्रीणिपदा विचक्रम इति । स्विष्टकृदादि लुप्यते प्रयाजा आज्यभागौ चालुप्यं तदित्यर्थः । नित्यमाप्यायनं निह्नवश्चोक्त इत्यर्थः । एषैवापराह्णे । एषोपसदपराह्णेपि कर्तव्या । तस्यां विशेषमाह । इमां मे अग्ने समिधमिमामिति तिस्रः सामिधेन्यः । विपर्यासो याज्या

नुवाक्यानां। पार्णे एयोश्च निरूढवद्रस्तुपसदः। इत्थमुपसदः पौर्वाह्णिक्य आपराह्णिक्यश्च कर्तव्याः। बहुवचनं वक्ष्यमाणन
हुत्वा पेक्षं सुपूर्वाह्णे च याः पौर्वाह्णिक्यस्ताः स्युः पूर्वाह्णे कर्तव्याः। या अपराह्णिक्यस्ता स्वपराह्णे इति। राजक्रयाद्यहः संख्या
नेनैकाहानामितरः। यस्मिन्नहनि राजक्रयः कृतस्तदाद्यहान्येव संख्याय एकाहानामितरत्र उपसदो भवंति। पूर्वाह्णि
क्याः पराह्णिक्याः पराह्णिक्याश्चेकीकृत्य एकोपसद्व्यवहारः। सैवं विधोपसत् त्रिरहः सुकर्तव्येत्यर्थः। नान्यहान्यु
पसदश्चंतरित्यर्थः। अत्रैकाहः शब्दः प्रकृतिविकृत्योः साधारणः। बहुवचनसंबंधात्। प्रकृत्यर्थत्वेन विध्यं
तराभावाच्चविकृत्से काहार्थत्वेन वाच्यैव विहितानां प्रयोगकाले परिज्ञानार्थे कर्मा चारस्त्वेकाहानामित्यत्र संकी
र्तनं। षट्। अध्वर्युवशाद्व्यवस्था निश्चयः। अहीनानां द्वादश चतुर्विंशतिः संवत्सर इति सत्राणां। इतिकारः प्रदर्श
नार्थः। तेनाध्वर्युमत्स पादुपसत्त्विश्च यद् इति उक्तं भवति। प्रथमयज्ञे नैकेषां मी। ज्योतिष्टोमस्यामथमप्रयोगे घ
र्मे मे केशा खिनो नेच्छंति। द्वितीयादावभ्यासे इच्छंत्येव। अभ्यासस्तु वसंते वसंते ज्योतिष्टोमइत्यनोवचनाल्लभ्यते।
अभ्यासत एव प्रथमयज्ञत्वं तत्स्वरूपतः इति न्यायसिद्धोपमर्थो। औपवसथ्य उभे पूर्वाह्णे। औपवसथ्येहनियेउपस

दौ ते पूर्वाह्ण एव कर्तव्ये। उपसदोपकर्षे प्रवर्ग्यावप्यपकृष्येते। प्रथमस्यामुपसदि वृत्तायां प्रेषितः पुरीष्यचितयेन्वा
हहोतादीक्षितश्चेत्। औपवसथ्येहनि या प्रथमो पसत्तस्यां समाप्तायां प्रेषितः पुरीष्यचितसर्थमन्वाद होतादीक्षित
श्चेत्। यजमानो दीक्षिते। अदीक्षिते होतरि यजमानुएव ब्रूयात्। यजमानो दीक्षित इत्येतावनैव सिद्धे यद्धोता दीक्षितश्चे
दिति वचनं तत् ज्ञापयति। अन्यदपि दीक्षितस्य होतुर्विहितं अदीक्षिते होतरि यजमानेक कर्तव्यमिति। पश्चात्सद
मात्रे वस्थायाभिहिंकृत्य पुरीष्यासो अग्नय इति त्रिरुपांशु सप्रणवां। सप्रणवां। समानप्रणवां। सर्वे त्रिमात्राः प्रणवा
इत्यर्थः। अपि वासुमंद्रां सुमंद्रशाह्वे नमंद्रस्याद्यो द्वितीयो वा यमउच्यते नानेनैवान्वाहनोपांश्विति। व्रजत्स्वनुव्रजेत्। व्र
जत्स्वध्वर्युषु अनुब्रुवं न तु व्रजेत्। नातिएत्सु विसृष्टवाक् प्रणायते इति ब्रूयात्। तेषु निष्टत्सु अनुवचनान्तरं भस्थाने स्थिता
भूर्भुवः स्वरिति वाचं विसृज्य ततः प्रणयते निसं प्रैषं ब्रूयात्। अथाग्निं संचितमनुगीतमनुशंसेत्। अथेति पूर्वेणास्य
संबंधार्थः। तेन पूर्वस्मिन्होता दीक्षितश्चेदित्येष धर्मो त्रापि भवति। संचितमग्निं प्रस्तोत्रानुगीतमनुशंसेत्। शंसतिर
प्यर्थं संस्कारकर्मैवाग्निमिति द्वितीयानिर्देशात्। पश्चादग्निपुच्छस्योपविश्याभिहिंकृत्याग्निरस्मि जन्मना जातवेदा

117

स्रू॰ वृ॰
११९

इतित्रिर्मध्यमायावाचा। वाक्स्तरणं स्वरस्य इते श्च मध्यमत्वसिध्यर्थं। एतस्मिंनेवासने वासने वैश्वानरीयस्य युजंति। प
श्चानेदग्निपुच्छस्येत्यर्थः। त्रयमेतत्साग्निचित्ये। पुरीष्यचितिरनुशंसनं वैश्वानरीयमिति एतत्त्रयं साग्निचित्येषु क्रतु
षु भवंति। पुरीष्यचितिरितिनामधेयात्पूर्वस्य अग्निमनुशंसती तिवचनान्मध्यमस्यैवैतस्मिन्नेवासन इति पुच्छसंबं
धादेवार्थस्य सिद्धौ सत्यां सूत्रप्रयोजनमपृच्छा अप्ययः संतितेषु प्येतत्त्रयं कर्तव्यमिति ज्ञापनार्थं। ब्रह्मा प्रतिरथं ज
पित्वा दक्षिणतोग्नेर्बर्हिष्यास्ते औदुंबर्यामिहवानात्। ब्रह्मणो यं नियम उच्यते। यदुक्तोग्निप्रणयनेऽप्रतिरथज
पः स्तंसमाप्योपविशेत्। चित्यस्याग्नेर्दक्षिणतो बर्हिर्वेद्यास्ते आ औदुंबर्या अभिहवनात्। औदुंबर्या अभिहवनं। आ
अभीत्यत्रोपसर्गो उक्तमग्निप्रणयनं। यदुक्तमग्निप्रणयनं। तदिदानीकर्मव्यादीक्षितस्तु वसोर्धारामुपसर्पेत्।
यदि दीक्षितो ब्रह्मा तदा वसोर्धाराहोमकाले तां प्रतिगच्छेत्। तु शब्दो दीक्षितस्य ब्रह्मणो यं विशेष इति। तेनरं सूत्रे ब्र
ह्मा प्रतिरथमित्यस्मात्सूत्रादर्थतो नंतरं द्रष्टव्यं। ब्रह्मा प्रतिरथमित्यस्य सूत्रस्यत्रयमित्यस्मादनंतरं वचनं साग्नि
चित्ये एव बर्हिर्वेद्यामेवासन इति ज्ञापनार्थं। ततो न्यत्र वेद्यां बर्हिर्वेदि वाना त्र नियमः। एतदुक्तं भवति। सर्वत्र सोमिकेऽ

रम॰
११९

ग्निप्रणयनेऽप्रतिरथं समाप्य दक्षिणत उपविश्यास्ते औदुंबर्याभिहवनात् साग्निचित्ये तु बर्हिर्वेद्युपविश्यास्ते व।
सोर्धारायां चोपगच्छति॥८॥ हविर्धाने प्रवर्तयंति। हविर्धाने शकटे ते अस्मिन्काले प्रवर्तयेत्। स्वध्वर्यव इत्युक्तं सोमप्रव
हणेन। तत्र यत्कर्तव्यं तत्सोमप्रवहणेनोक्तं। दक्षिणस्य तु हविर्धानस्योत्तरस्य चक्रस्यांतरा वर्त्म पादयो॥ तत्रैकं
शकटं अनुनुदे। अत्र विशेषविध्यर्थस्तु शब्दः। अयमत्र विशेषः दक्षिणस्य शकटस्य यदुत्तरं चक्रं तस्य यद्वर्त्म त
स्माद्यो मध्ये यथा भवति तथा भतितत्थापश्वादनस्त्रिपदमात्रे नीत्तयोदेशस्तत्र स्थित्वा पूर्ववत्क्रत्वानुब्रू
यादित्यर्थः। युजे वां ब्रह्म पूर्व्यं नमोभिः प्रेतां यज्ञस्य शंभुवा युवां यमेरवयतमानयदेतमधिहृयोरदधा उव
कथ्यं वचतुरस्य धर्च आरमेदेव्यवस्त्रा चेद्दराटी। यदिरराटी अव्यवस्त्रा अबद्धा भवेत् तदा अधिहृयोरदधा उक्थ्यं
वच इत्यस्या अर्धर्च आरमेत्। विश्वा रूपाणि प्रतिमुंचते कविरिति व्यवस्त्रायां। व्यवस्त्रायां तस्यानामीक्षमाणो
विश्वारूपाणीत्यनुब्रूयात्। तस्या अर्धर्च आरमेत्। यदि मेथ्यो न निहते स्यातां। मेथ्योरुपनिहतयोः परित्वा
गिर्वणो गिर इति परिदध्यात्। मेथ्योरुपनिहतयोरेतया परिदध्यात्। अत्र केचिदध्वर्यवः पूर्वं मेथी निहननं

सू०टी०
१२०

हुत्वा ननोरण्टीबं धनं हुत्वा ततः परिश्रयणं कुर्वन्ति। तत्रापि मिथ्यो रूप निहतयोरिति भूतकाल विशिष्टत्वेन योः स्र
वणोत्तक श्रिहोषगः क्रमविपर्यासशंका न कर्तव्या। यथा सूत्रमेवेदमनुवचनं वक्तव्यमिति सिद्धं॥ ९॥ अग्नीषो
मो प्रणेष्यत्सु तीर्थेन प्रपद्योत्तरेणाग्नीध्रीयायतनं सदश्च पूर्वया द्वारा पत्नीशालां प्रपद्योत्तरेण शालामुखीय
मतिव्रज्य पश्चादस्योपविश्य प्रेषितोऽनुब्रूयात्। सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै। अथा
स्मभ्यं सवितः सर्वतातादिवेदिव आसुवा भूरि पश्वद् इत्यासीनः। तीर्थेन प्रपदनं प्रपन्नस्यापात्र नियमेन
प्रपदनाभ्यं स्याप पश्चादस्योपविश्येति शालामुखीयस्येत्यर्थः। उपविष्टस्यैवासीन इति वचनं व्रजत्स्वध्वर्युषु प्रथ
माप्य न व्रजनायोतिष्ठेदित्येवमर्थं। अनुव्रजन्तु तराः। अनुब्रूयादिति शेषः। प्रैतु ब्रह्मणस्पतिर्होता देवो अमर्त्यः
पुरस्तादुपत्वाग्ने दिवेदिवे दोषावस्तरुपप्रियं पनिप्नतमित्यर्धर्च आरमेत्। आग्नीध्रीये निहिते भिहूयमानेऽग्ने
जुषस्व प्रति हर्य तद्वच इति समाप्य प्रणवेनोपरमेत्। प्रणवेनोपरमेदित्युक्ते अधिकेन प्रणवेन त्याशंक्येत। अथ
समाप्योपरमेदित्यते। तदा प्रणवनिषेधाशंका स्यात्। तस्मादुभयविशेषणं कृतं। उत्तरेणाग्नीध्रीयमतिव्रज

राम०
१२०

त्स्वति व्रज्य सोमो जिगाति गातुविद्देवानां तमस्य राजा वरुणास्तमश्विनेत्यर्धर्च आरमेत्। आग्नीध्रीयमतिव्रजत्स्व
ध्वर्युषु उत्तरेण तमतिव्रज्य सोमो जिगातीत्येता अनुब्रूयात्। नमस्य राजेत्यस्या अर्धर्च आरमेत्। प्रपाद्यमानं
राजानमनु प्रपाग्ना अदितिर्भवासि श्येनो न योनिं सदनं धिया कृतमस्तभ्नाद्यामसुरो विश्ववेदा इति परिदध्यात्।
त्। उत्तरा या वा क्षेमाचारे। क्षेमाय आचारः क्षेमाचारः आचरणमाचारः। वाशब्दो व धारणार्थः। अस्यामवस्था
यां क्षेमार्थं मं यमतीकारे कर्तव्यं सति उत्तरयैव परिदध्यात्। एवं माख्यायमाने मत्स्य क्षश्रुतिरनुसृज्ञा भव
ति। ब्रह्मैवमेव प्रपद्यापरेण वेदिमतिव्रज्य दक्षिणतः शालामुखीयस्योपविशेत्। उत्तरेण शालामुखीयमति
व्रज्येत्येवमंतं समानं। ततोऽपरेण वेदिं दक्षिणमतिव्रज्य दक्षिणतः शालामुखीयस्योपविशेत्। स होतारमनूत्थायायुंथे
न मग्नत्तो व्रजे यदि राजानं प्रणयेत्। यदिशब्दस्वं बंधात् ब्रह्मणः सोमप्रणयनं पाक्षिकमिति गम्यते। प्रणयने एवं भ
वति। उक्तं प्रणयतः। यदुक्तं दक्षिणतो व्रजन्नाप्नुः शिनाशा न इति सकृज्जपित्वा ततोऽग्निणाहवनीयं परीसर दक्षिण
तो निरसनोपवेशने कृत्वा तत्रैवासीत इति तदप्रणयतो ब्रह्मणो भवति। प्रणयतस्त्विदानीमुच्यमानं भवति। तच्च प्रणयत्

मग्ने गमने। गृहपतेर्येप्रदायतनो हविर्धाने अग्रेणापरेणवाति व्रज्य दक्षिणत आहवनीयस्य निरस्योपविष्टो तत्र य यग्रेण प्रपंनः स्यात्। तदा प्रपाद्यमाने राज नि प्रत्येत्य पुनरपरेणवा ति व्रज्य पूर्वासनएवोपविशेदित्येवमुभयोः प क्षयोरनुष्ठानविशेषः। प्राप्य हविर्धाने गृहपतेर्ये राजानं प्रदाय हविर्धाने अग्रेणापरेणवाति व्रज्य दक्षिणत आहव नीयस्योपविशेत्। हविर्धाने प्राप्य गृहपतये राजानं प्रदाय हविर्धाने सोमं वाग्नेयापरेणवाति व्रज्य दक्षिणत आ हवनीयस्योपविशेत्। अस्मिन्द्वितीये हविर्धानग्रहणे राज्ञः एवोग्नेर्वापरेणवा रेति व्रजेत्स तिनु तस्मिं स्तयोरपि अग्नेणापरेणवा गमनं भवीतितिपुनस्तहचनं। अग्निपुच्छस्य साग्निचित्यायां सोमयागक्रियायाम ग्निपुच्छस्य दक्षिणतदुंउपविशेत्। एतत्प्रपाद्यनोपपाद्यतश्च सा धारणमुपवेशस्थानं। एतदृत्विग्भिः समं पक्षो। एत दासनं ब्रह्मणो ग्नीषोमीये पशौ भवति। दृष्टिपुत्रेष्टिकमेव। दृष्टिपशुष्वामन्यत्र यत्पुधर्मादितन्त्र नस्यैव दक्षिण त आसनं नाहवनीयस्येति सिद्धं। प्रातश्च वपाहोमात्। सोमस्ये वाहनि वपाहोमपर्यंतमाहवनीयस्य दक्षिणत आसीतसदः प्रवेशोत्तरकालं सदस्येवासीतवचनादन्यत्रैति। यदित्व ग्नेणप्रसेपात्प्रपाद्यमाने गृहपतये

राजानं प्रदाय यदि राजानं हविर्धाने चाग्नेणनो गतः स्यात्तदा प्रपाद्यमाने राजन्यासनार्थं पुनः प्रत्येयात्। अवाय परि हारार्थं तत्र तदानीमेव प्रत्येतव्ये सति किमित्यग्नेणवापरेणवा पूर्वमतिव्रज्य गच्छेत्। तत्र गमने प्रयोजनमस्ति वै सर्जनहोमोनाम त्रिष्वपि त्रिष्वग्निपुरुक्रियते तत्राहवनीये हूयमाने तस्य दक्षिणत आसनार्थं यदा दक्षिणतो गतः स्यात् तत्र यदापरेण राजानं हविर्धाने च गतः स्यात्तदा तत्रैवासीत न प्रत्येयात्। अवाया भावात्॥१०॥ अथाग्नीषोमीयेण चरंति। पशुनेति शेषः। उत्तरवेद्यामादंडप्रदानात्। दंडं प्रदायेत्युत्तरसूत्रे दंडप्रदानोत्तरकालमेव सदः प्रवेशवि धानात्। एतावतः पदार्थान्उत्तरवेदिसमीपे कर्तव्यान्इति प्राप्ते वचनमिदं अग्नीषोमीयादिष्टधर्मिकायामनूब ध्यायां सदसि कर्तव्यायामपि एतावंतः पदार्था उत्तरवेदिसमीपे कर्तव्याः इत्येवमर्थं। दंडं प्रदाय मैत्रावरुणम न्वतः हृत्तोत्तरेण हविर्धाने अतिव्रज्य पूर्वयाद्वारा सदः प्रपद्योत्तरेण यथास्वं धिष्ण्यावतिव्रज्य पश्चात्स्वस्य धि ष्ण्यस्योपविशति होता। उत्तरेण धिष्ण्यावतिव्रज्येत्युच्यमाने द्वावुत्तरेणेत्याशंका स्यात्। तन्निवृत्त्यर्थं यथास्वमि त्युच्यते। योयस्य यथास्वं। स्वंस्वं धिष्ण्यमुत्तरेणेत्यतिव्रज्य न द्वावुत्तरेणेत्यर्थः। पश्चात्स्वस्येत्येतावते सिद्धे

सू० वृ०
१२२

धिष्ण्यस्येतिवचनमागंतुका अपीष्टयोस्मिंनवसरे अंत्रे वोपविशतांकर्तव्याः ॥ नवेदिश्वोण्यामित्येवमर्थं ॥ अव
तिष्ठतद्दतरः ॥ स्वस्यधिष्ण्यस्यपश्चादवतिष्ठते मे त्रावरुणाद्वस्वर्थः ॥ यद्दिदेवसूनां हवींष्यन्वायातयेपुरग्निर्गृहप
तिः सोमोवनस्पतिः सविता सत्यप्रसवोबृहस्पतिर्वाचस्पतिरिंद्रोज्येष्ठो मित्रः सत्योवरुणोधर्मपती रुद्रः पशुमा
न्पशुपतिर्वा यदिशब्दसंयोगादनित्यत्वमेषामवगम्यते ॥ तत्राध्वर्युवशाद्विशेषज्ञानं ॥ देवसूनां हवींषीत्येषां सं^
ज्ञाष्टौ ॥ अष्टावत्र देवताः सर्वाः सवा गुणा एव ॥ पशुमान्पशुपतिरितिरुद्रस्य गुणविकल्पः ॥ त्वमग्ने बृहद्वयवा यो
ळ्मिरजरः पितान स्त्वं च सोमनोवशोब्रह्मादेवानां पदवीः कवीनामा विश्वदेवं सत्पतिं नप्रमियेसवितुर्दैव्यस्य
तद्बृहस्पतेप्रथमंवाचो अग्रं हं सैरिव सखिभिर्वावदद्भिः प्रससाहिषे पुरुहूतशत्रून्भुवत्वमिंद्र ब्रह्मणामहाननमी
वासद्वळ्या मदंनः प्रसमित्रमर्तो अस्तु प्रयस्वांस्त्वा नहवाम्नहिमायरुक्षते त्वया वृद्धोमुमुक्षते ॥ त्वं विश्वस्माद्भुवना
त्पासिधर्मणासुर्यात्पासि धर्मणा यत्किंचेदं वरुनउप ते स्तोमान्पशुपाइवाकरमिति ॥ १२ ॥ यद्युवेसर्वदृष्टान्य
ग्निर्गायत्र्यस्त्रिवृद्राथंतरोवासंतिकइंद्रस्त्रैष्टुभः पंचदशो बार्हतोग्ने ष्मो विश्वेदेवा जागताः सप्तदशो रूपा वार्षिका

राम०
१२२

मित्रावरुणावानुष्टुभावेकविंशौ वैराजौ शारदौ बृहस्पतिः पांक्तस्त्रिणवः शाक्वरो हैमंतिकः सविता तिर्छंदास्त्रयस्त्रिंशो
रैवतः शैशिरो दितिर्विष्णुपल्न्यनुमतिः ॥ उवेदृतिनिपातो पक्षांतरविवक्षायां भवतः ॥ सर्वेष्टष्टानीतिवक्ष्यमाणानां
हविषां संज्ञा ॥ एतानि चान्नायात्यानि अन्नायात्यानां देवतोपदेशो ध्यानार्थः ॥ अष्टावत्रदेवताः ॥ तत्रादितः षण्णामग्न्यादीना
मग्न्यादीनामेकैकस्याएव चत्वारश्चत्वारो गुणशब्दाः ॥ ततोदितिर्हविर्विलिपल्नीत्येकः ॥ ततश्चानुमतिः ॥ समिद्दि
शामाशायानः स्वर्विन्मधुरे नो माधवः पात्वस्मान् ॥ अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रं रक्षतु पात्वस्मान् ॥ रथंतरं
सामभिः पात्वस्मान्गायत्री छंदसां विश्वरूपा ॥ त्रिवृन्नो विष्टया स्तोमो अह्नां समुद्रो वात इदमोजः पिपर्तु ॥ उग्रा
दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीनां ॥ इंद्राधिपतिः पिपृतादतो नो महिक्षत्रं विश्वतो धारयेदं
॥ बृहत्साम क्षत्रभृद्वृद्धवृष्ण्यं त्रिष्टुभौजः शुभितमुग्रवीरं ॥ इंद्रस्तोमेन पंचदशेन मध्यमिदं वातेन सगरेण रक्ष ॥ प्रा
चीदिशां सहयशा यशस्वती विश्वेदेवाः प्रावृषाह्नां स्वर्वती ॥ इदं क्षत्रं दुष्टरमस्त्वोजो नाधृष्यं सहस्यं सहस्वत् ॥ वै
रूपे सामन्निह तच्छकेयं जगत्यैनं विक्ष्वावेशयानि ॥ विश्वे देवाः सप्तदशेन वर्च इदं क्षत्रं [illegible]

(12)

स्० वृ०
१२३

दिशांस त्वमिंद्रदाधारोपस्थाशानां मिदंदाधारोपस्थाशानां मित्रवदस्त्वोजः। मित्रावरुणा शरदाह्ना चिकित्नम
स्मै राष्ट्राय महि शर्म यच्छतं वैराजे सामं नधि मे मनीषा अनुष्टुभा संभृतं वीर्यं सहः। इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरु
णा रक्षेतमाधिपत्ये। सम्राड् दिशां सहसाम्नी सहस्वत्यृतुर्हेमंतो विष्टया नः पिपर्तु। अवस्युवाता बृहतीनु शक्व
री मं यज्ञमवतु नो घृताची। स्वर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची। त्वं गोपाः पुर एतोत पश्चाद् बृहस्प
ते याम्यां युङ्धि वाचं। ऊर्ध्वा दिशां रंतिराशौषधीनां संवत्सरेण सविता नो अह्नां। रेवत्सामातिछंदा उ छंदो ऽजातशत्रु
स्योना नो अस्तु। स्तोमत्रयस्त्रिंशे भुवनस्य पत्नि विवस्वद्वाते अभि नो गृणीहि। घृतवती सवितराधिपत्ये पय
स्वती रंतिराशा नो अस्तु। ध्रुवा दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता। बृहस्पतिर्मातरिश्वोत वायुः सं
ध्वाना वाता अभि नो गृणंतु। विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी। अवस्वती पयंती सुभू
तिः शिवा नो अस्त्वदितेरुपस्थे। अनु नो द्यानुमतिर्यज्ञं देवेषु मन्यतां। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः।
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि। क्रत्वे दक्षाय नो हिनु प्रण आयूंषि तारिषः इति वैश्वानरीयं नवमंका

राम०
१२३

यं दशमं। तत्र मद्गुशमशाह्लौवेन योरपि सर्वत्र प्रांतर्भावार्थौ। को अद्य युंक्ते धुरि गा ऋतस्येति द्वावौपयजैरंगारैरन
भिपरिहारे प्रयतेरन्। उपयद्भिमार्थो औपयजाः। तैरंगारैर्यं वापपरिहारेयत्नः कर्तव्य इत्यर्थः। आग्नीध्रीयाच्चेदु
त्तरेण होतारं। तेषामाग्नीध्रीयादाहरणे क्रियमाणे उत्तरेण होतारं पश्चाद्वान्नीलांतमेव दक्षिणेन हृत्वा होत्रीये निधा
नं कर्तव्यं। शामित्राच्चेद्दक्षिणेन मैत्रावरुणं। शामित्रादाहरणे अंतरा यूपमाहवनीयं च दक्षिणातिहृत्य दक्षिणेन वि
हारं पश्चाद्वान्नीलांतमैत्रावरुणं च तस्योत्तरतो हृत्वा होत्रीय एव निधानं भवति। उपायोपदेशो देवाग्निन्यर्थे सिद्धे
पूर्वसूत्रं व्यवायपरिहारार्थमेवायमुपाय उपदिश्यते नाहृत्यर्थमिति ज्ञापनार्थः। ते नयत्रैवं कृतेव्यवायो ना।
स्तित्रैवं कर्तव्यं यत्र तु नैवं कृते व्यवाय एव स्यात्तत्रैवं न कर्तव्यं। यथा सवनीयादौ। तत्र यद्युत्तरे णाग्नीध्रीयं
परिव्रज्य सदः प्रसृप्त मिति। उपोत्थानमेव कृत्वा निक्रम्य वेदं गृह्णीयात्। निक्रम्य वेदं गृह्णीयादित्येतावता
सिद्धे उपोत्थायवचनं पदार्थव्यत्यासे पिप्राकृतमेवेदमुपोत्थानमिति ज्ञापनार्थं। तेनास्य समंत्रत्वं साधितं
भवति वचनमन्यत्र पूर्वकाले क्रियमाणेनोपोत्थानेन पत्नीसंयाजार्थगमन सिद्धौ तस्मिन्नेवोपोत्थाने मंत्रप्रापणा

१०२

सू० द०
२२५

र्यतेन यथा प्रसृप्तमित्यत्र चोदायुतिष्ठेत्। विदग्ग्रहणं तु सरल्पविसर्जनोत्तरकालमेवेति सिद्धं। नेदमाहित्युत्तरयम्पू
लमर्वागनूर्वंध्यायाः। तद्यम्पूलोद्वासनमित्यर्थः। संस्थितेव संती। वरीः परिहरंति दीक्षिता अभिपरिहारयं
रन्। अवसती वरीणां परिहरणे क्रियमाणे दीक्षिता अंतर्भवेयुः। ९ अदीक्षिता बहिःस्युरित्येवमर्थं वचनं॥ २२॥ अथै
तस्या रात्रेर्विवासकाले प्राग्वयसां प्रवादात्प्रातरनुवाकायामंत्रितो वाग्यतस्तीर्थेन प्रपद्याग्नीध्रीये जाग्वाच्या
हुतिं जुहुयादासत्यान्नाम्नं आत्याहिकस्याश्विदभिशस्येस्वाहेति। एतस्या रात्रेरिति वचनाद्द्वात्रावेवायं पशुः समा
पनीय इति गम्यते। यस्यां रात्रौ पशोः समाप्तिस्तस्या विवासकाले चतुर्थभागे प्राक्प्राक्पक्षिणां प्रवादना
प्रातरनुवाकार्थमामंत्रितो वाग्यतस्तीर्थेन प्रपद्याग्नीध्रीये जाग्वाच्याहुतिं जुहुयादासत्यान्नाम मंत्रान्दित्येन। ना
वाग्यतस्तीर्थेनेति वचनं प्रपदनकालादारभ्य वाग्यवाग्यमनसिध्यर्थं। आहुतिमिति वचनमाग्नीध्रीये जा
ग्वाच्यैकामाज्याहुतिं जुहुयादाहवनीये न्येहुतिज्ञापनार्थं। तेनोत्तरयोरप्याहुत्योर्ध्रीजाग्वाच्येति सिद्धि
र्भवति। प्रातरनुवाकायामंत्रितस्य विधानादस्य सर्वस्य विधेः प्रातरनुवाकांगत्वं भवति। अतस्तस्याहुतिर्भि

राम०
२२५

वाहुतिर्भवति। आहवनीये वा गग्नेगा अग्नये तुरस्तस्यैवा त्रेस्वाहा। वाचं देवीं मनोनेत्रां विराजमुग्रां जेत्रीमुत्तममेह
भक्षां। तामादित्यानां बमिवारुहेमानुमतो पथिभिः पारयंती स्वाहेति द्वितीयां। द्वितीयाग्रहणमाहुतिमित्येक
वचनस्य प्रकृतत्वाद् द्वितीयैकैवाहुतिर्माभूतिमोभूदित्येवमर्थं। आतः समानं ब्रह्मणश्च चशब्दो होतुरनुकर्ष
णार्थः। ब्रह्मणश्च होतुश्चायं विधिः समानं द्यर्थः। होतुरर्थया विहितस्यानुकर्षणात्प्रापणस्यैदं प्रयोजनं ब्रह्म
णः प्रथमं प्रपदनं पश्चाद्धोतुरिति। प्राप्य हविर्धाने रराटीमभिमृशत्सुर्वेतरिसंवीही तिः। हविर्धानशब्देन हविर्धा
नसमीप मुच्यते। यस्यां शालायां हविर्धाने तिष्ठतस्तस्याः शालायाः पूर्वस्मिन्द्वारे रराटी नाम रज्जुर्बद्धा तामभि
मृशति। प्राप्य हविर्धाने हविर्धानयोः समीपावर्ति शालायाः पूर्वद्वारं प्राप्येत्यर्थः। द्वार्ये स्थूणे देवी द्वारौ मा
संतासंलोमेलोकरक्षतो पृणुतमिति। द्वारि भवे द्वार्ये दक्षिणेन पाणिना पर्यायेणाभिमृशेन्मंत्रस्तु सकृदेव द्वि
वचनलिंगत्वात्। प्रपद्यांतरेण युग धुरावुपविश्य प्रेषितः प्रातरनुवाकमनुब्रूयान्मंद्रेण। हविर्धानयोर्मध्य
देशं प्रपद्य युगधुरावंतरेणोपविशेत्तत्रोपविश्य प्रेषितः सन् प्रातरनुवाकमनुब्रूयात् मंद्रेण स्वरेण। प्रेषितव

(123)

सू०वृ०
१२५

चनमन्यत्र आप्ते सति होतरि अन्योपि प्रेषितो नु ब्रूयात् आ न रनुवाकमित्येवमर्थं । अप्राप्तोयं मन्द्रस्वरो विधीयते ।
तेन ज्ञायते कार्यं संलग्नानामेवातिदेशेन प्राप्तिर्नावधिसंबद्धानामिति । आपो रेवतीः क्षयथा हि वस्व उपप्रयंत इ
ति सूक्ते अवा नो अग्न इति षळग्निं मीळेग्निं हूतं वसिष्ठाहो तिसृकमो रुतमामुद्रे त्वमग्ने व्रतपा इत्युत्तमा
मुद्रे त्वं नो अग्ने महोभिरिति नवमे विप्रस्येति सूक्ते युक्ष्वा हि प्रेष्ठं वस्त्वमग्ने ष्ट हृदय इत्यष्टादशर्चेन स्त्वेति सूक्ते ।
अग्ने पावकद् तं व इति सूक्ते अग्निर्होता नो अध्वर इति तिस्रो ग्निर्होतान्नइळे ति चत्रस्रः प्रवो वाजा उपस घोपतम ।
न्ये यतानामिति तिस्र उत्तमा उद्द्रे इमे हस्य ग्निं हि त्वं तुनः प्राग्नये वाचमिति सूक्ते इमां मे अग्ने समिधमिमामिति
त्रयाणामुत्तद्द्रे दितिगाय त्रं त्वमग्ने व सूक्तं हि षे नवद् ग्नायो होता जनिष्ट प्रवो देवायाग्नेक रादन इति पंच सखा
यः सं वस्त्वा मग्ने हविष्मं त इति सूक्ते बृहद्वय इति दशानां चतुर्थ नवमे उद्द्रे दुत मां चादि नस्त्र याणामित्या नुष्टुभम
बोध्यग्निः समिधेति चत्वारि प्राग्नयेहत ते प्रवेप से कवयेत्वं नो अग्ने वरुणस्य विद्वानित्येतत्प्रभृतीनि चत्वारि रू पु
णः स सस्य यद्वियुत्तेति पंच भद्रं ते अग्न इति सूक्ते सोमस्य मातवसं प्रत्यग्निरुषस इति त्री एषा होतेति दशानां त्

रा म०
१२५

तीयाष्टमे उद्द्रे दिवस्परीति सूक्तयोः पूर्वस्योत्तमामुद्द्रे त्वं ह्यग्ने प्रथम इति षण्मं द्वितीय मुद्द्रे त्यु रोवो मंद्र मिति चत्वा
रि तं सुप्रतीकमिति षद्दुवेवः सुधोत्मानं निहोता होतृषदन इति सूक्ते त्रिमूर्धानमिति त्रीणि वह्निं यशसमुप प्रजि ।
न्वे निति त्रीणि कानउ पेति रिति सूक्ते हिरण्यकेश इति तिस्रोपश्यमस्य मह त इति सूक्ते द्वे विरूपे इति सूक्ते अग्ने नयामे
वहन्नित्स ष्टानामुत्तमा दुत्तमास्तिस्र उद्द्रे त्वमग्ने सुहवो रण्वसंदृगिति पंचाग्निं वो देवमिति दशानां तृतीयचतुर्थे उद्द्रे
दिति त्रैष्टुभमेना वो अग्निं प्रवोयद्भुमग्ने विवस्वस रवा यस्त्वा यमग्निर आग्ने पात्या छानः श्रीरश्रो विषमिति षष्ठचद
शिगानु वित्तम इति सक्षेत्तिवा हं तमग्ने वाजस्येति तिस्रोः पुरुत्वा त्वा मग्न इं छिष्ठाहो त्यो त्नि हं जनस्य गोपास्त्वामग्न ऋ
तायव इममू षु वो अतिथिमुषर्बुधमिति नव त्वमग्ने द्युभिरिति सूक्ते त्वमग्ने प्रथमो अंगिरा नूचित्स होजा अमृतो नितु
द इति पंच वेदिषणांतृतीय मुद्द्रे दिमं स्तोममर्हते स जागृवद्भिर्ध्विन्न इच्छिशोचे वसुं न चित्रमह सा इति जागतमग्निं
तं मन्य इति पांक्तं । एतदाम्नानं प्रात्तरनुवाकार्थं । अत्र विछेद संविदेवतानां चोह्यारो विधीयते अनुष्टुप् पूर्वं कीनां वि
छेदस्त्वादुद्धारो नाभीष्टः अत उत्तमामुत्तमां चारित इत्यत्र छंदस एवारित इत्याग्नेयः क्रतुः । एतावांस्समाम्नायो ग्निदेव

(१२५)

तदित्यर्थः। तेनोर्ध्वं ऊषुण इत्यस्य प्रागाथस्य रूपाभिधाने विनियुक्तस्याप्याग्नेयमध्यवर्तित्वात् लिंगविरोधाच्चाग्नेय
त्वं साधितं भवति। अस्य क्रतुरिति संज्ञा भवति॥२३॥ अथोषस्यः क्रतुरिशतिशेषः। आग्नेयः क्रतुरुक्तः। अथेदानीं
मुषस्यः क्रतुरुच्यत इत्यर्थः॥ प्रति ष्या सूनरी कस्त उष इति तिस्र इति गायत्रं सुषोमद्भिरित्यानुष्टुभमिदं श्रेष्ठंइथूर
थइति सूक्ते प्रत्यु ष्यो स्तुता यामानमुषो वाजेनेदमु त्यदु भ्रियइति सूक्ते व्युषा आवो दिविजा इति षळिति त्रैष्टुभं प्रत्यु
अदर्शि सहवामेनेति वाहेत पुरुत्वं चित्रमाभरेति तिस्रः ओलिहमेनात इत्या इति चतस्रो जागतं महे नो अद्येति पांक्त-
मित्युषस्यः क्रतुः। भंउभयत्रोषस्य वचनं अयं क्रतुः कृत्स्नः प्रयोक्तव्य इत्येवमर्थं॥२४॥ अथाश्विनः। क्रतुरिति
शेषः। एषो उषा प्रानयुंजेति चतस्र आश्विना वस्या गोमदू षु नासत्येति तृचा दूरादिहैवेति तिस्र उत माउत्तरे ह्या हिष्टो वां
हवानामिति च तस्र उदीराथामामे हवमिति गायत्रं येद्य स्थ इति सूक्ते आनो विश्वाभिरूत्य चिदत्रिमित्यानुष्टुभ
मा भात्यग्निरिति सूक्ते ग्रावाणेव नासत्यामिति त्रीणि धेनुः प्रत्नस्य कउप्रवदिति सूक्ते स्तुषे नरेति सूक्ते युवोरर
जांसीति पंचानां तृतीयमुदु ष्य स्तिवां रथमिति सप्तानां द्वितीयमुदु रे दिति त्रैष्टुभमिमा उवाम पांक्तमो स्व महत्व आर

थमिति सप्तगुमीवां येरुद्र इति वाहे तमश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ युवो रुष्य रथं दुवइति पंचदशो स्तो
लिहमवोध्यग्निर्ज्म एषस्य भानुरा वां रथमभूरिदं यो वां परिज्मेति त्रीणि त्रिभिर्नो अद्ये लेयावा पृथिवी इति जागतं
प्रतिप्रियतममिति पांक्तं। कं इत्येते षांछंदसा प्रथक्सूक्तानि मिनि प्रातरनुवाकः। कर्तव्य इति शेषः॥ यान्येतानि त्रिषु
क्रतुषु सप्तसप्त छंदांस्युक्तानि तेषां सर्वेषां पृथक्सूक्तानि गृह्णीयात्। न किंचिदपि छंदः परिवर्जयेत्। सर्वेषां छं
दसामेकैकं सूक्तं गृह्णीयादित्यर्थः॥ सूक्तग्रहणं सूक्तानामखंडनार्थं। एवं क्रियमाणे यावन्सूक्तसमूहः संपद्यते
स प्रातरनुवाको भवतीत्यर्थः। शतप्रभृत्यपरिमितः। पूर्वोक्तादन्योपि प्रातरनुवाकः शतप्रभृत्यपरिमितइति शताधि
कोपि शतादर्वाग् नित्य न संख्य इत्यर्थः॥ अत एवास्मिन्प्रातरनुवाके ऽर्थात् सूक्तखंडनमभूत्। एवमादीनां लघुमांसा
ध्युक्तिसंसवे च प्रयोगो भवतीति तत्र त्वरायाश्विकीर्षितत्वादिति। नान्यैराग्नेयं गायत्रमत्यावपेद्ब्राह्मणस्य। आ
ग्नेयं छंदोभिराग्नेयं गायत्रं छंदोनात्यावपेत्। अन्यैरिति बहुवचनस्य त्रित्वे वचरितार्थत्वात् त्रिभिरत्यावापो
न कर्तव्यः। त्रिभिरधिकैरत्यावापेन दोषः। एषनियमो ब्राह्मणस्य। न त्रैष्टुभं राजन्यस्य। न जागतं वैश्यस्य

१२९

सू०वृ०
१२७

स्या। आग्नेयमित्यनुवर्तते। अन्त्यावपेरितिचा अभ्यासवदेकपदद्विपदाः। उपसमस्यप्रणुयादित्यर्थः। उपसमासो।
नाम पूर्वस्या ऋचोंते प्रणवमकृत्वा ऋगन्तरवशेनैकपदद्विपदाः संधायतासामंते प्रणवं कुर्यात्। अत्र तासां बहुत्वा
संभवाद्बहुवचनोपदेशस्तामर्थादन्यस्याप्ययं विधिर्भवति। ग्रावस्तोत्रे। अयमुपसमासएकपातिन्या एव द्विपदाया
ः। अनेकद्विपदासंहतो पस्थ एव वक्तव्याः। पच्छो द्विपदां त्रिरनुवचनेपि तथा दर्शनात्। यथास्थानं ध्रुवाणि मांगला
न्यगन्म महातारिष्मे ळे द्यावापृथिवी इतिन्यथास्थानमिति यस्मिन्क्रमए ता निविहितानि तस्मिन्नेव क्रमेनु
वक्तव्यानीत्यर्थः। ध्रुवाणीति वचनाद्धतकल्पेष्वेषां स्वंडनं मा भूदिति गम्यते। मांगलानीति चैषां संज्ञा भवति।
विध्यंतरविहितत्वात्स्यछंदसोधिकान्येतानीति गम्यते। संज्ञा एव द्विरितिचयः प्रेष्यट्लत्स्वर्गकामः। यः पुनः
र्यजमानो मरिष्यद्वस्थोप्रवर्ततेसयद्येवं कामयेत यदिमरिष्यामि स्वर्गमाप्नुयामिति तस्यैतदपि मांगल्यंभ
वतीत्यर्थः। ईळे द्यावीय मावर्तयेद्यतमसोपषातात्। यदाईळे द्यावीयपर्यंते सूक्तेतमसो न जायते। तदात
देवसूक्तमावर्तयेत्। याव तमोपगच्छेत्। कालउत्तमयोत्सृष्यासनान्मध्यमस्थाने नप्रति प्रियतममित्युपसं

राम०
१२७

तनुयात्। कालेतमस्यपहतेइत्यर्थः। ईळेद्यावीयस्योत्तमयर्चा प्रतिप्रियतममिति सूक्तमुपसंतनुयात्। पूर्वास
नादुत्सृप्यैतत्कर्तव्यं। एतदुक्तं भवति। प्रातरनुवाकस्यादितआरभ्य ईळेद्यावीयपर्यंतेनमंद्रस्वरः आरोहणसर्वैः प्र
योक्तव्यः। ईळेद्यावीयस्योत्तमर्गेतेनमंद्रस्योत्तमेनयमेनप्रति प्रियतममित्येतद्द्विषयं मध्यमस्य प्रथमं यममारभेत
। अस्मिन्सूत्रे उत्तमायाः प्रागेवारोहक्रमेणैव मध्यमस्वरं सर्वं प्रयुंजीत। ततो मध्यमस्योत्तमेन यमेन उत्तमा।
र्गेतमुत्तमस्य प्रथमं यममादद्रीते आद्यायारोहितक्रमेणैवोत्तमं स्वरं तस्यामेव चिसर्वं प्रयुंजीत। एवं स्वरक्रमेण
अनभ्याहृतं भवति। उत्सर्पणं चापूर्वं चोत्तमायाः सतमाप्तिक्षणेउत्तरत्रोपोत्तमायाः समाप्तिक्षण इत्यर्थः। पुनरुत्स
प्योत्तमयोत्तमस्थाने नपरिदध्यादंतरेणह्यर्थस्थणे अनभ्याहृतमाश्रीवयं निवाश्रावयं निवा उत्सर्पणस्वरू
पमत्रैवं भवति। वद्धासन एव पूर्वस्थानात्स्थानांतरे उत्पतनं युगपद्युगवंतरेणोप विष्टः सन् प्रथममुत्सृप्य पूर्वास
नात्सुरतः सन् प्रति प्रियतममित्यच्छावन्वाह। ततः पुनरुत्सर्पणे ह्यर्थस्थणे अंतरेण सन्नुत्तमया परिदध्यात्। आ
श्रावणस्यसिद्धवदुपदेशात्तस्य सिद्धवदुपदेशात्स्यैवं स्वरो भवतीति निश्चीयते। एतदुक्तं भवतीति। मंद्रादी

128

नामधेयस्मिन्नाश्रावणंप्रयुज्यतेतस्यस्वरस्यसर्वेयमाआश्रावणेप्रयोक्तव्याः। प्रत्याश्रावणेप्येवंप्रयोगसिध्य
र्थमाश्रावणंदृष्टांतःकृतः। इदमनुवचनंप्रधानकर्मशंसतिवत्। ननुसर्वोल्पानुवचनान्यग्निमंथनादीनिसंस्का
रकर्माणीतिप्रसिद्धं। सत्यंसिद्धं। नत्रसंस्कार्यस्यसमन्वयोस्त्यग्न्यादेः। नचैवंत्रापिप्रातर्याणामग्न्युषोश्विनां
समन्वयोदृश्यतेसंप्रेषतोमंत्रलिंगाच्चेति। सत्यंसमन्वयोस्ति। तस्यसंस्कार्यत्वेप्रमाणंनास्ति। स्तौतिशंसत्या
दावपिअभिधेयतयासमन्वयस्यदृष्टत्वात्। यत्तुसंप्रेषइतितच्चप्रातर्यावदेवतासंबंधिगुणसंकीर्तनार्थम
नुब्रूहीत्येवमपिभविष्यति। एषांकार्यांतरार्थीनामत्राभिधानमित्यनवगमात्। उषःसंबंधितुकर्मज्योतिष्टो
मेक्वचिदपिनदृश्यते। अग्न्यश्विसंबंधित्वस्येवतथापितत्कर्मसंबंधितारूपमात्रेविकीर्षितमित्यनवगमा
त्। प्रधानकर्मैवेतदितिनिश्चिनुमः। यदिपुनःकर्मांतरसंबंधिद्रव्यसंबंधिमात्रादेवसंस्कारत्वमभ्युपगतंस्या
त्। तत्रसर्वेषांस्तोतिशंसतीनांसंस्कारकर्मत्वमेवस्यात्। अत्रचअनुवचनेवेधर्म्येलिंगमस्ति। मनसातेवाचं
प्रतिगृणामीतिप्रातरनुवाकमनुवाकमनुब्रुवंतंहोतारमध्वर्युराहेति। अत्रप्रतिगरःसंस्तुतिलिंगात्तथाचा

स्यसंनिधौविश्वरूपानामस्तुतिर्वाग्देवत्यायांऋचिक्रियते। तस्याश्चप्रधानकर्मत्वमवगतं। तस्मादेतयोश्चप्रधा
नकर्मेतिसिद्धं। विनाप्रयोजनेनावसरेतदक्रियायामासोमप्रयोगसमाप्तेर्विपर्यासप्रायश्चित्तंहन्त्वापुनस्त्वद
पिकर्तव्यमेवप्रधानकर्मत्वे। संस्कारकर्मत्वेऽसतिसंस्कार्येप्रायश्चित्तमेवनपुनःप्रयोगइति॥ १५॥ इत्याश्व
लायनसूत्रवृत्तौनारायणीयायांचतुर्थोध्यायः॥ ॥७॥ ॐ परिहितेऽपइष्यहोनरिसुक्तोनभिहिंकृत्वा
पोनप्त्रीयाअन्वाहेषष्ठैनैस्तरौपरिधानीयायाः। परिधानविधुनरकालमेवास्यानुवचनस्यविधानात्परिहित
इत्यस्मिन्नर्थेसिद्धेयत्परिहितवचनंतत्परिधानीयापोनप्त्रीययोःसंबंधकरणार्थं। तेनानयोःकर्तृस्थानोप
देशनानामेकंसाधितंभवति। अधिवेत्तंवशानैर्भावस्यपरिधानीयायाएवेतिसाधितंभवति। संप्रेषपाठेनुव
चनादिकालपरिज्ञानसाधनयोःसंप्रैषस्वशास्त्रयोर्विप्रतिपत्तौतयोरन्यतरेणापितदनुवचनादिसिध्यतीत्यय
मर्थः। ईषदल्पमित्यर्थः। शनैस्तरांनीचैस्तरामित्यर्थः। परिहितवचनादेवपरिधानीयाया अवधित्वेसिद्धे
पुनःपरिधानीयावचनंपरियायाअंत्यावस्थापरिग्रहार्थः। परिधानीयाया आवधित्वेसिद्धेपरिधानीया

धानी१

(127)

सू॰वृ॰
१३॰

यादित्येवमर्थः। तत्र परिधानीयाया मुत्तमस्य रोयमाणे हृक्रमेण कृत्स्नः प्रयुक्तः। तत्रांत्याद्य माछंनैस्तरां भवती
त्यर्थः। तत्रानंतरे कांतरयोर्यमयोरुच्चनीचत्वोपलंभनाशक्तेप्यंतरादिषु यमेषु छद्रे नद्यांतरयमएव नियमोस्ती
ति नियम्यते। नातेनोत्तमस्य चतुर्थे न यमेनानुवक्तव्यमिति सिद्धं। तासां निगदादिषु नैस्तरां ताभ्यश्चाप्रसर्पणात्।
प्रसर्पणशब्देनेहोत्तमयानुप्रपद्येतेत्युत्तरपदं नेगत्स्यते। एतच्च तासामित्यस्य प्रसर्पणाविशेषणत्वादुलभ्यते।
ताभ्य इति निगदात्प्राग्भाविन्य ऋचो गत्स्यंते। एतदुक्तं भवति। अपोनप्त्रीयायां यत्प्रसर्पणं आ तस्मान्निगदा
दिष्टानैस्तरां भवतीति। अत्र षष्ठ्यो भावात्स्मंतरादियेयमाले गृह्यंते। तेनात्र मध्यमुस्वरो वेदितव्यः। परं
मंद्रेण। प्रपदनाद्यस्वरं अपोनप्त्रीयाणां तन्मंद्रेण प्रयोक्तव्यं। एतदपोनप्त्रीयाधिकाराल्लभ्यते। प्रातःसवनं
च मंद्रस्वरेण प्रयोक्तव्यमिति। तत्रोपांशुत्वेनाहादि अछावाकस्यपर्यंतं तत्र सर्वत्र मंद्रस्वरो भवतीत्यर्थः। अध्व
र्युकारं प्रथमामृगावानमुत्तराः। अध्वर्युधकारस्य उत्तरयासंतानाविरोधादृगावानतायाः पूर्वयासंता
नाविरोधादत्र द्वितीयादानेपंचार्धर्चो अनुद्रुत्य संतानवक्तव्याः। इष्टिकामस्य प्रकृत्यावा। उत्तरादृसनुवर्तते सा

१३॰

यिधेनीन्यायेनेत्यर्थः। प्रकृतिभावे पूर्वेष्वासामर्धर्चेषु लिंगानि कांक्षेत। प्रकृत्यावेत्यस्मिन्पक्षे लिंगाकांक्षा एवं
भवति। यस्या ऋचोयदपेक्षणीयं लिंगं तस्या ऋचोर्धर्चे स्थितानतल्लिंगमाकांक्षेत। प्ररेवत्राब्रह्मणेगातुरेत्विति
नवहिनोतानोअध्वरं देवयज्येतिरशामी। दशामीग्रहणं ब्राह्मणानुवादः। आवर्ष्टनातीरधनुद्दिपारा इत्या
हुतास्वेकधनासु। अत्र द्विविधा आपः वसतीवर्य एकधनाश्च। तत्र पूर्वेद्युरेव वसतीवर्यो गृहीताः। एकधनाइ
दानीं गृह्यंते तेनागृहीतानां ग्रहणदेशादेव यजनदेशं प्रति यदावर्तंते तदेव मृगस्तुवक्तव्या प्रतियदापो अदृश्यमा
यतीरिति प्रतिदृश्यमानासु। अत्रैवासोनीस्य दृष्टिपथमागतासु। आधेनवः पयसा तूर्ण्यर्था इत्युपायती
ष्विति ब्राह्मणोक्तशेषः। समीपमागतास्वित्यर्थः। समन्यायं त्युपयं त्यन्या इति। समायतीष्वित्यत्रापि शे
षः। वसतीवरीभिः समागतास्वित्यर्थः। इति ब्राह्मणोक्तकार्यसूचनार्थः। तीर्थदेशे होतृचमसे पांदू
र्यमाणे आपो नरेवीरुपयंति होत्रियमिति समाप्याप्रणवेनोपरमेत। प्रकृतिभावपक्षेपि अत्रोपरमो
नित्यो धानसामर्थ्यात्। आगतमध्वर्युमविरपो ध्वर्यो उ उइति इष्टस्थितिः। उत मनंनमुरिति प्रत्युक्तो निगदं ब्रु

(129)

सू.९.
१३१

वत्प्रतिनिष्क्रामेत्। प्रतिवचनपाठः। प्रतिवचनार्थः प्रतिपादने अविस्पष्टार्थत्वाद्यमसौ निगद इत्थं वक्ष्य^
व्यः स्वाहा। त्वा स्वध्वर्यो इन्द्राय सोमं सोता मधुमन्तं वृष्टिवनिं तीव्रान्तं बहुरमध्यं वसुमते रुद्रवत आदित्यवत ऋभु
मते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावते इत्यतमनवानमुक्तोद्गाता सोपथो वतिष्ठेत्। इत्थं तद्वच
नाध्वर्यो इत्यादिरप्यस्यैव निगदस्यैकदेश इति गम्यते। आसामेकधनानामागच्छन्तीनां मुखतो गत्वा
ता अपरेणातीत्य उत्तरतस्तिष्ठेदित्यर्थः। उपातीतास्वन्वावर्तेत। तास्वदूरेणात्मनोऽतीतास्वन्वावर्तेत। यस्यै
द्रः पीत्वा वृत्राणि जंघनत् स प्रसजन्यानि तारिषोदिति मंत्रं यो यस्पध्वभिरितिस्त्र। अन्वाहृत्य ततो यस्यैन्द्र इत्यादि
ब्रुवन्नुत्सृजेत्। ऋगावानपक्षे चानेन प्रणवेन संतानः कर्तव्यः पाठसामर्थ्यात्। उत्तमयानुप पद्येनति
सृणामुत्तमयेत्यर्थः। एमा अग्मन्नेवी जीवधन्या इति हेसन्ना सूत्तरया परिधायोत्तरां द्वार्यां मासा राजान
मभिमुख उपविशेत् निरस्य तृणं। सं नास्व एकधना स्वित्यर्थः। तासामेवाधिकाराच्च। आगम्मत्या प इत्सन या
परिधायतानि क्रम्य पुनः पूर्वद्या द्वाराह विधानं प्रविश्य तस्यामेव द्वारि यायोत्तरास्ठणा तस्याः पार्श्वसमीपे

राम०
१३१

राजानमभिमुख उपविशेदक्तो तैव निरसनं। निरसनेऽमंत्रं उपवेशनमत्रमनक्तैव ॥९॥ उपांशुं हूयमा
नं प्राणं यच्छ स्वाहा त्वा सुहव सूर्याय प्राणप्राणं मे यच्छेत्यनुमंत्र्य इत्यनुप्राण्यात्। उपांशुर्नाम ग्रहः। तं हूयमा
नमभिमुखो भूत्वानेन मंत्रेणानुमंत्र्यानुलोम्येन प्राणनं कुर्यात्। अंतःशरीरं वायुं नासिकाद्वारेण बहिर्नि
र्गमयेदित्यर्थः। अंतर्याममपानं यच्छ स्वाहा त्वा सुहव सूर्यायापानापानं मे यच्छेत्यनुमंत्र्य ॐ इति वाभ्यपान्या
त्। आभिमुख्येनांतःशरीरं बहिष्ठं वायुं नासिकया प्रवेशयेत्। प्राणापानयोः स्वरूपनिदर्शनं पदार्थसंज्ञ
यनिहृत्यर्थं। चकारो ब्राह्मणोक्तविध्यनुकर्षणार्थः सोऽयं विधिः। प्राणं यच्छ स्वाहा त्वा सुहव सूर्यायेत्यु
पांशुमनुमंत्र्य नमेवाभिप्राणेदुत्तरेण भागेन। एवमंतर्याममुत्तरस्य मंत्रस्य पूर्वेण भागेनानुमंत्र्यो
त्तरेण भागेनाभ्यपानेदिति। एवं वा प्रयोक्तव्यमिति वशाहः। उपांशुसवनं ग्रावाणं व्यानाय त्वेत्यभिमृश्य
वाचं विसृजेत। उपांशुग्रहार्थः सोमः उपांशुरित्युच्यते। सोऽभिषूयते येन ग्राव्णा स उपांशुसवनस्तं व्याना
य त्वेत्यभिमृश्याप्योनप्रीयारंभस्थानउपविश्य भूर्भुवः स्वरिति वाचं विसृजेत्। प्रातरनुवाकामंत्रणकाल

129

सू०वृ०
१३२

एवं नियताबाक् तत्संबंधात्स्वपोनस्त्रौ याः स्वरिषितरवस्थैवां वस्थिता तासु तानुब्रुवदनुव्रजनमस्ती तितदं ते
विसृज्याभवेत्सैवात्रानाहुतयोरुपांश्वंतयोरिति उक्तं ष्टा विसृज्य तइत्यवगंतव्यं तेनात्र विचारणीयम
न्यदस्ति । पवमानायसर्पणे न कुर्छंदोगा मैत्रावरुणो ब्रह्मा च नित्यो । पवमानायेति वचनं पवमानार्थं
सुब्रह्मान्ताद्यायतन आरभ्य प्रसर्पतिततएवारभ्य एतावपि प्रसर्पेतां न विप्रुड्ढोमकालोत्तरकालमित्यर्थं
। अनवकृष्टतइत्यर्थः । नित्यवचनं शतातिरात्रौ दोमुख्यकर्म द्वितीयः कुर्यात् द्वितीयः कुर्याद्द्वतीयः कुर्या
दित्यत्रापि सर्पणे तयोर्नित्ययोरेव प्रापणार्थं न न तत्कार्यं कुर्वतो स्तद्ग्रंथपुरुषयोः प्राप्तिरित्येवमर्थं । ता
वंतरेणेतरे दीक्षिताश्चेत्ताविति ब्रह्ममैत्रावरुणाविसर्थः । इतर इतिताभ्यामन्ये होत्रकस्सवर्ग्याः पु
रुषा इत्यर्थः । दीक्षिताश्चेदिति वचनाददीक्षितानामेतेषां सर्पणं नास्तीति गम्यते । दीक्षितानां यज
मानत्वादेव सर्पणे सिद्धे पुनर्वचनमेतेषामस्मिंस्तोत्रे उक्तविधिप्रापणार्थं । अंतरेणेति मध्यत इत्यर्थ
: इत्यस्कंदेति द्वाभ्यां विप्रुड्ढोमो हुत्वाध्वर्युमुखाः समन्वारब्धाः सर्पेयाती र्थदेशात् । विप्रुड्ढोम इतिमा

१३२

मा हुत्वा सर्पतीति वचनात्सर्पणांगो होम इति गम्यते तेन येपि प्रसर्पंति ते ते जुह्वतीति गम्यते । अध्वर्यु
मुखा अध्वर्यूक्तकारिणः समन्वारब्धाः अविच्छेदेन परस्परस्पृशं तइत्यर्थः । आतीर्थदेशादिति
वचनात्तावदेवाध्वर्युप्रधानत्वं तीर्थदेशं प्राप्य उपवेशनादिस्वाधीना एवेत्येवमर्थं । तत्तो त्रायोप
विशं सुब्रह्मानारमभिमुखाः । तस्य बहिष्पवमानस्य स्तोत्रं स्तुतिरित्यर्थः । बहिष्पवमानस्तुत्यर्थं सुब्रह्म
नारमभिमुखा उपविशेयुः । दक्षिणतो ब्रह्मोदङ्मुखः पश्चान्मैत्रावरुणः प्राङ्मुखः । बहुवचनं
सत्रापेक्षं । ताम्होतानुमंत्रयते त्रैवासीनो यो देवानामिह सोमपीथो यज्ञे बर्हिषि वेद्यां तस्यापि भ
क्षयामसि मुखमसि मुखं भूयासमिति । तां बहिष्पवमानार्थमुपविष्टानित्यर्थः । अत्रैवासीन इ
ति यत्रैवोपविश्य वाग्विसर्गं करोति तत्रैवेत्यर्थः । होतृग्रहणं होतैवात्रासीनोनुमंत्रयते न यजमान
इत्येवमर्थं । यदि यजमान एव होत्रं करोति तदा यजमानेन यासर्पणं कृत्वा तत्र स्थ एवानुमंत्रणमपि कु
र्यात् । तथा च वचनमस्ति । यद्युवै स्वयं यजमानो होता स्यात्सर्पेदेवेति । दीक्षितश्चेद्धूजेस्तोत्रोपस्था

130

तयाप्परिहोतारीक्षित स्तोत्रानुमंत्रणं कृत्वा पुनस्तत्र गच्छेद्याजमानकर्तुं पूर्वसूत्रे होतृगहणं यजमान
स्य होतृत्वे गत्वानुमंत्रणमुक्तं। अत्र तु होतुर्यजमानत्वेनुमंत्रणं कृत्वा पश्चाद्याजमानंकर्तुं व्रजेदित्युक्तं।
तेनेदमुक्तं भवति। एकाहाहीनेषु यजमानस्य होतृत्वे सत्रेषु गृहपतेर्होतृत्वे च गत्वानुमंत्रभवति। सत्रेषु
होतैवानुमंत्रणं कृत्वा गच्छेद्याजमानकरणाय। अन्यत्रानुमंत्रणं कृत्वापि न गंतव्यमित्यर्थः। सर्पेद्यौत
रयोः सवनयोः। परिहोतारीक्षित स्तदोत्तरयोः सवनयोः सर्पणमपि कुर्यात्। बहिष्पवमाने त्रैवासी
नोनुमंत्र्य पुर्गेनर्गच्छेत्। उत्तरयोः सर्पणादिसर्वं याजमानं कुर्यादित्यर्थः। ब्रह्मन्त्स्तोष्यामः प्रशास्त रि
ति स्तोत्रायाति सर्जितावसिसृजन्तः। ब्रह्ममैत्रावरुणयोरयं विधिः। तयोरेवात्र प्रत्यत्तिसर्जनविधिद
र्शनादतिसर्जनवाक्यपाठे तिसर्जनवाक्ये परस्मैपदप्रयोगे सत्यपि प्रतिसर्जनवाक्ये आत्मनेपदप्र
योगार्थं। भूरिंद्रवंतः सवितृप्रसूता इति जपित्वा स्तुध्वमिति ब्रह्मा प्रातः सवने। प्रातः सवनग्रहणं माध्यं
दिनादिस्तोत्र विनिवृत्त्यर्थः। भुव इति माध्यंदिनेस्व रिति तृतीयसवने। भूर्भुवः स्वरिंद्रवंतः सवितृप्रसू

ता इत्यूर्ध्वमाग्निमारुतात्। इंद्रवंतइत्यादौ पूर्ववदधिकारोसिद्धे पिपुनर्वचनं प्रातः इति त्रयविशिष्टस्य तुर्थी
यमंत्रऊर्ध्वमाग्निमारुताद्भवति न पूर्वे त्रयो मंत्राः संहृस भवंतीत्येवमर्थं। उक्थ्यादिष्विति वक्तव्ये ऊर्ध्वमाग्नि
मारुतादिति वचनं मानस्य सात्यग्निष्टोमंत्रमं ग्रहार्थं। स्तुत देवेन सवित्रा प्रसूता ऋतं च सत्यं च वदत। आ
युष्मत्स ऋचो मा गात तनूपात् साम्न ओमिति जपित्वा मैत्रावरुणस्तुध्वमित्युच्चैः। जपित्वोच्चैरित्युभय
वमेवं भवतीत्येवमर्थं। तेन ब्रह्मणो अपि ऊर्ध्वं वा प्रणवादित्ययमपि विधिर्भवतीति गम्यते॥२॥ अथ स
वनीयेन पशुनाचरंति। सवनेषु भवः सवनीयः। वपयाप्रातः सवने चरंति पुरोडाशेन माध्यंदिने गे स्तृती
यसवने इत्येवं प्रत्यद्रसर्थः। पश्चिमयणायुक्तमित्येवमादिभिर्लिंगैः पशुत्वे सिद्धेपि पशुमेतिवचनं
पुरोडाशानामपि सवनीयसंज्ञाप्रापणार्थं। यद्देवतो भवति तस्य पशोर्या या देवता शास्त्रांतरेष्वपि विहिता
तद्देवत्योपि पशुः कर्तव्यः। एतदुक्तं भवति। सवनीये पशौ देवतांतरमाम्नावप्य समाम्नातत्वं नास्तीत्यर्थः॥ आ
ग्नेयो ग्निष्टोम ऐंद्राग्न उक्थ्ये द्वितीय ऐंद्रो वृष्णिः षोडशिनि तृतीयः सारस्वती मेष्यतिरात्रे चतुर्थः। अत्र च शाकृप

ना०वृ०
१३४

योगादेवसमुच्चयेसंपाद्ये सूत्रत्वपिप्रद्विनीयादिभिः शब्दैः समुच्चयं विदधातितं ज्ञापयति। आपिकोयं समुच्चय
इति। इह लिंमे प्रजातौ पुमावाऽ इति क्रतुपशवः। एते चत्वारः क्रतुपशुसंज्ञा भवंति। परिव्ययणाद्युक्तमग्नीषो
मीयेणाचत्वालमार्जनादूर्ध्वप्रदानवर्जं परिव्ययणादि पश्चात्त्वालमार्जनपर्यंतमग्नीषोमीये पशौ विहितं
तदत्रापि भवति। अयमेवार्थो त्रविधानुमितः। एवं व्याख्यायमाने उभयत्र चात्वालमार्जनस्यनेदमो
दिषु मार्जनमिति प्रतिषिद्धस्य प्रतिप्रसवः कृतो भवति। अग्नीषोमीयसंबंधितया सिद्धवदुपविन्यस्य
तस्य तस्य सवनीयसंबंधितया पुनर्विधानात्तदवध्यंतर्भावादूर्ध्वप्रदानमत्र प्रतिषिध्यते। तेनात्रत्तमि
वामंत्रकमादाय पूर्ववद्धोतारं परिहृत्य तस्याग्नेतो गमनादि पूर्ववत्कुर्यात्। उपविश्याभिहिंकृत्य
परिव्ययणीयांत्रिः। उपविश्येति वचनेउपविश्य परिव्ययणीयामेव ब्रूयात्। न पूर्वस्याऽनरार्धर्चमर्थ
। आवह देवां सुन्वते यजमानायेत्यावाहनादिसुन्वद्धोग्नेयजमानशब्दादैष्टिकेषु। आवाहनादिषु सु
न्वद्धोग्नेयजमानशब्दादित्येवं लक्षणस्य सिद्धस्य सुन्वद्वत्स्य सुन्वते यजमानायेति पाठो यजमान।

राम०
१३४

शब्दादेवाग्ने सुन्वद्वद्धः कर्तव्यः। न तत्पर्यायाद्यज्ञपतिशब्दादेरित्येवमर्थो। यजमानशब्दसमान विभक्तिप्राप
णायचेति। आवाहनादिग्रहणमस्मिन्नहनि यदाय दैष्टिकं तंत्रं प्रवर्तते तेन दानदानस्य विधेः प्रापणार्थं। ऐ
ष्टिकग्रहणमनैष्टिकनिवृत्त्यर्थं। नात्साद्धोरियोजना दूर्ध्वं। अहर्गेत्सु मनं संचास्तीति विशेषणं एकाहेष्वेक
त्वादहःस्तदेवाद्यं न इदं भवति। अंत्येहनि यद्धाऽयोजनं तस्मादूर्ध्वमयं विधिर्न भवतीत्यर्थः। न प्राविंत्रंसा धुते य
जमानदेवता ओ मन्वतीतेस्मिन्यज्ञे यजमानेतिवा। अनयोरपि विषययोरयं विधिर्न भवति प्रागाज्यये
भ्यः सवनदेवता आवाहयेदिंद्रं वसुमंतमावहेंद्रं रुद्रवंतमावहेंद्रमादित्यवंतमृभुमंतं विभुमंतं वाजवंतं
बृहस्पतिवंतं विश्वदेव्यावंतमावहेति। सवनदेवता अनिर्दिष्टदेवतानां सोमानां सवने सवने देवतास्ते
च सवमुनमुखे सवनमुखहेतुर्वषट्कारे हूयंतइत्यर्थः। अपूर्वत्वात्सोमस्यावाहनप्रकारपाठेयमप्राप्त
त्वात्कृतः। नाः सूक्तवाकरवानुवर्तयेत्। अयमप्यप्राप्तविधिः। अपूर्वत्वादेव। एवकारो विस्पष्टार्थः। प्रहृ
ताहुतीर्जुहुतिवषट्कर्तारोन्ये छावाकात्। येऽस्मिन्नहनि वषट्कारसंबंधिनस्ते स्मिन्काले प्रहृताहुती।

ना०वृ०
१३५

जेद्धृति। अछावाकं वर्जयित्वा अस्मादेवाछावाकप्रसितिनिषेधादवगम्यते प्रवृत्ताहुतयो नवरणनिमित्ताइति। अ
छावाकस्य वरणाभावात्। तेनाग्नीषोमीये हविर्वरणे कृतेपि होतुरन्ये तस्मिन्नहनि नजुह्वतीति होतुस्तु पाशुको
वैकल्पिकः सिद्ध एव। चात्वाले मार्जयित्वाध्वर्युपथ उपयन्त उपतिष्ठन्त आदित्यप्रभृतीन् धिष्ण्यान्। चात्वालमार्ज
नांतं पाशुकं कर्मोपदिष्टं। तत्र चात्वालमार्जने कृते सौमिकमुपस्थानादि कर्म कुर्युरित्यर्थः। तेन पाशुककर्ता
र एव मार्जनं कुर्युः। अध्वर्युपथात् अध्वर्युपथेतिष्ठंत इत्यर्थः। आदित्यप्रभृतीन्धिष्ण्यान्वक्ष्यमाणानुपतिष्ठं
ते। आदित्यप्रभृतिवचनमादित्यस्यापि धिष्ण्यत्वप्रतिपादनार्थं। तेनोपस्थितीनां श्रेयसाद्यावादित्यमन्येध्वनाम
ध्वपते श्रेष्ठः स्वस्त्यस्याध्वनः पारमशीयेति। उपतिष्ठंत इति वर्तते। अग्रवचनमादित्यप्रभृतीन् धिष्ण्यानुपति
ष्ठंत इति वचनात् तत्सुपस्थानेमादित्यप्रभृति तेषामितन्निवृत्यर्थः। तेन सकृदेवाग्न्युपस्थानं यथावदुपस्थान
मिति। यूपादित्याहवनीयनिर्मथ्यानग्नयः सगराः सगरा अग्नयः सगरा अग्नयः सगरास्थ सगरेण नाम्ना प्रा
तमाग्नयः पिपृत माग्नयो नमो वो अस्तु मा मा हिंसिष्टेति। अत्राप्यादित्योपस्थितो यूपादिभिः सह तस्यापि नि

रामः०
१३५

र्देशात्। निर्मथ्यो नाम यत्राग्निर्मथ्यते स हि देशः। सम्यावृत्तः शामित्रो वध्यगोह चात्वालोत्करास्ता वा नेवमेव। शामित्रः
पशुश्रपणार्थोग्निः। ऊवध्यगोहः आंत्रप्रच्छादनस्थानं। आस्तावो यत्र बहिष्पवमानस्तूयते स देशः। एवमेव दक्षिणा
वृत आग्नीध्रीयमछावाकस्य वादं दक्षिणं मार्जालीयं सरमिति। एवमेवे सुभयत्रापि संबध्यते। तेनाग्नयः सगरा
इत्ययमेवोभयत्र भवति। आग्नीध्रीयोग्निविशेषो यउत्तरतो निहितः। अछावाकस्य वा हृदः यस्मिन्देशे आसी
नोछावाकः अछावाकवदस्वेसुक्तो वदति स देशः। दक्षिणं मार्जालीयमिति मार्जालीय एवोच्यते। तेनोत्तरेपि
मार्जालीयोस्तीति गम्यते। खरो नाम यस्मिन्देशे ग्रहचमसाः साद्यंते स देशः। विशेषणविशेष्यभ्रांतिनिवृत्यर्थं।
असमासकरणं नोपस्थानभेदासिध्यर्थं। तैनैतांश्चतुरः सकृदेवोपतिष्ठेरन्। उत्तरेणाग्नीध्रीयं परिव्रज्य प्रा
प्यसदोभिमृशंसुर्वेतरिक्षं वीहीति। आग्नीध्रीयमुत्तरेण परिव्रज्य सदसो द्वारदेशं प्राप्य प्यासदोभिमृशंति
मंत्रेण। प्राप्येति वचनं प्राक्प्रवेशनान्निवृत्यर्थं। प्राप्याभिमृशंतिनान्येलंपारनी यमित्यर्थः। द्वार्ये संमृत्रैपेवमपरानु
पतिष्ठंते। द्वार्ये इति पूर्वस्य द्वारः स्थूणे इत्यर्थः। प्राप्य सद इति प्रकृतत्वादाहवनीयप्रदेशादागच्छंतां सदः प्राप्तिः पू

का०वृ०
१३६

र्वभाग इति गम्यते। तत्र च प्राग्वंशेऽनन्तरं द्वार्यामिमर्शनविधानात्प्राग्वंश्याद्दक्षिणद्वारप्रदेशस्यैवेति गम्यते। अभिमृशन्तीति वर्तमाने संमृश्येति वचनं वैलक्षण्यज्ञापनार्थं। तच्च वैलक्षण्यमसंनिहितेन मंत्रेण द्वे वा द्वारौ वित्यनेनाभिमर्शनं। एवमित्यन्यः सगरा इत्यनेनेत्यर्थः। अपराणि तिसदः पूर्वद्वारप्राप्तानां विधानात्सदसो पराञ्छालामुखीयादीनित्यर्थः। शालामुखीयादीनित्युक्त्वा ऽपराणीति वचनात्तत्र स्थाएवोपतिष्ठेरन्। उपस्थितांश्चाप्यपश्यन्तोऽन्वीक्षमाणाः। उपतिष्ठन्त इति वर्तते। उपस्थिता आदित्यादयः। अनुपस्थिताः सदस्या होत्रीयादयः। च शब्द एवं शब्दानुकर्षणार्थः। अप्यपश्यन्त इति वचनात्सर्वत्र शक्तिविषये ऽभिमुख एव कुर्यादित्यवगम्यते। न ईक्षमाणाः। विविधमनीक्षमाणाः। व्यनीक्षमाणाः। नव्यनीक्षमाणाः। अव्यनीक्षमाणाः। द्विः प्रतिषेधात्प्रकृत्यर्थप्राप्तिः। विविधमीक्षमाणा इत्यर्थः। एतदुक्तं भवति। उपस्थितानुपस्थितांश्च सर्वानपश्यन्तोऽपि इतस्ततः ईक्षमाणा अन्यः सगरा इत्येतेन मंत्रेण सहदेवसदसः पूर्वद्वारप्रदेशस्थाएवोपतिष्ठेरन्। होता मैत्रावरुणो ब्राह्मणाच्छंसी पोता नेष्टेति पूर्वया द्वारा सदः प्रसर्पत्युक्तं तो

राम०
१३६

लोकमनुनेषि विद्वानिति जपन्तः। पूर्वद्वारदेशागतत्वात्तथैव प्रसर्पणे सिद्धे यत्पूर्वग्रहणं करोति तज्ज्ञापयति। सदः प्रवेशान्यद्वारा निर्देशोऽसति पूर्वमेव सर्वेषां भवतीति। उरुं नो लोकमित्येतां मृचं सह जपन्तः। पूर्वया द्वारा प्रसर्पयेयुरित्यर्थः। उत्तरेण सर्वान्धिष्ण्यान्तस्तान्तस्तान्परेण यथासंधिष्ण्यानां पश्चादुपविश्य जपन्ति यो अद्य सौम्यो वधो घायूनामुदीरति। विषूकुहमिव धन्वनाव्यस्याः परिपंथिनं सदसस्पतेयेन मह इति। सूत्रोक्तक्रमेण होतृप्रथमाः प्रविश्य ततो नेष्टृपोतृब्राह्मणाच्छंसि होतृमैत्रावरुणा इत्यनेन क्रमेणोत्तरेण सर्वान्धिष्ण्यानात्वासंनां तस्त्वांन परेण गत्वा यो यो यस्य स्वो धिष्ण्यास्तस्य पश्चादुपविशेयुः। उपविश्य यो अद्येति जपेयुः। नेष्टुः संनाउपविष्टान्नापरेण गमनेनास्ति असंभवात्। एवमपरस्या ब्रह्मा प्रसृप्य दक्षिण पुरस्तान्मैत्रावरुणस्योपविशेत्। एवमित्युपस्थानादिजपान्नमति दिश्यते। तमन्वंच ऋत्विजः प्रसर्पकाः। ऋत्विक्ग्रहणं प्रसर्पकविशेषणं। ये प्रसर्पका ऋत्विजश्च ते ब्रह्माणं प्रसर्पन्तमनु तेनैव द्वारेण प्रपद्येयुः। येद्वाशायेयेवक्ष्यन्ते तत एवेत्यर्थः। तेनार्थितया रिह क्षयाच्चप्रस

(137)

प्तानामत्र प्रसंगो नास्तीति तेषामयं नियमो न भवति। पूर्वेणोदुंबरीमपरेण धिष्ण्यान्पृथगंतरमनूपविशंति
। इदमपि तेषां स्थानविधानं यथांतरं यथा संनिकृष्टमित्यर्थः। योयस्य चमसभक्षसंबंधितया संनिकृष्टः
स तस्य समीपे उपविशतीत्यर्थः। एतस्याग्नीध्र आग्नीध्रीयमप्याकांशं। आग्नीध्रोप्यनेन प्रकारेणोप
स्थानादिजं पांतं कुर्यात्। आग्नीध्रीयं तु प्रविशेत्। संरछादितमसंछादितमपीत्येवमर्थमप्याकांशमि
ति वचनं। दक्षिणार्धस्याये धिष्ण्या उदकसंस्थाः प्रसर्पिणां। स्वस्य धिष्ण्यस्य पश्चादुपवेशनमुक्तं तत्र को
धिष्ण्यः कस्येत्येतन्निर्णयार्थमिदमुच्यते। प्रसर्पिणो होत्रादयस्तेषां धिष्ण्ये पुनरधिकारार्थं पुनः प्रसर्पि
ग्रहणं। अनधिकृतस्यापि प्रसर्पिणो छावाकस्य ग्रहणार्थं। दक्षिणादर्ध इत्येतावतैवोदकसंस्थत्वं
सिद्धे यत् उदकसंस्थत्वे सिद्धे यत् उदकसंस्थवचनं तज्ज्ञापयति यद्दक्षिणोत्तररूपेणावस्थितेषूदकसं
स्थे वक्रियाकर्तव्या नान्यथेत्येवमर्थं। आद्यौ तु विपरीतौ मैत्रावरुणस्य दक्षिणतस्तस्योत्तरतो होतुरिति
। तेषां संवृत्तिनसंचरो यथासंधिष्ण्यानुत्तरेणातेषां धिष्ण्यावतां स्वस्य धिष्ण्यस्योत्तरतो यो देशः स विसं
२ १

स्थितसंचरो नामवेदितव्यः। विसंस्थिते ऽसमाप्ते सवने संचर्यते नेनेति विसंस्थितसंचरः। दक्षिणमधिष्ण्यानां। अ
धिष्ण्यानामृत्विजां दक्षिणधिष्ण्यमुत्तरेण विसंस्थितसंचरो भवतीत्यर्थः॥ ३॥ अथैंद्रैः पुरोळाशैरनुसवनं चरंति
। याज्यानुवाक्यालिंगादेवैंद्रत्वे सिद्धे सत्यैंद्रैरिति वचनं धानादीनां निर्वापकाले पादेवतासंबध्यं तेतासामप
नयनार्थं। पुनः पुरोळाशैर्नसोमैरित्यर्थः। किंच धानादीनां पुरोडाशशब्दैनैव संव्यवहारार्थं। अनुसवनं सव
न इत्यर्थः। पुरोळाशाश्चुक्तमिति सतिदेशादेवानुसवनत्वे सिद्धे यदनुसवनवचनं तज्ज्ञापयति। अनुसवं चं नेच
रंत्येवनान्येदावाहनाद्यपीति धानावंतं करंभिणमिति प्रातःसवनेनुवाक्या। प्रातःसवनवचनं मध्याह्नस
मये प्राप्तेप्यस्मिन्सवन इयमेवानुवाक्यास्यात्। नान्याकल्प्येत्येवमर्थं। माध्यंदिनस्य सवनस्य धाना इति मा
ध्यंदिने। तृतीये धानाः सवने पुरुष्टुतेति तृतीयसवने। होत्राय क्षरिंद्रं हरिवां इंद्रो धाना अत्विति प्रैषो लिंगैर
नुसवनं प्रैष इत्येकवचनं जात्यभिप्रायं। चपाणां पाणसिद्धत्वात्। उद्धृत्यादेशपदे शपदते नैवेज्या अत्रापि क
वचने पूर्ववत्। देवनादेशस्वरूपत्वादिंद्रमिति शब्द आदेशपदमित्युच्यते। तदेंद्रत्वनैरेव प्रैषैर्येष्टव्यमि

135

स्वर्थः॥ होता यक्षदसोयजयोस्स्थान आगूर्ववषट्कारौ यत्र क्वच प्रैषेण यजेत्। यत्र क्वचेति वचनात्सार्वत्रि
कोयं विधिः। यत्र क्वचित्कर्मणि प्रैषेण नैककर्तृत्वे एतावद्दुद्दस्तयोस्स्थाने नौक्तात्ताय यष्टव्यमित्यर्थ
॥ अथ स्विष्टकृतोग्ने जुषस्व नो हविर्माध्यंदिने सवने जातवेदोग्नेतृतीये सवने हि का निषद्सुनुस
वनमनुवाक्या। अनुसवनाधिकारे पुनरनुसवनवचनं माध्यंदिने सवने पश्रुपुरोळाशेन सह क्रि
यमाणे तस्य मुख्यत्वे सत्यपि एता एव याज्यानुवाक्या भवेत्येवमर्थं। होता यक्षदग्निं पुरोळाशानामिति
प्रैषो हविरग्ने वीहीति याज्या। एतास्वनुवाक्यासु पुरोळाशशब्दं बहुवदेके। एतास्वनुवाक्यासु ये पुरोळाश
शब्दास्ते बहुवचनांताः कार्याः इत्येके आचार्या मन्यंत इत्यर्थः। तत्समानाधिकरण्यादेव चरुत्र्यद्वयो
पीति पुरोळाशशब्दस्याच्छिन्न्यायेन धानादिलक्षणार्थत्वाद्बहुत्वसंबंधः॥ पूयति वा एनदृचोक्ष
रं यदेनदूहति तस्मादृचं नोहेत। पूयति स्रवतीत्यर्थः। स्ववर्णं तो वक्तुं दोषत्वं गादत्कनाशः। तन्नाशेकं वाय
यष्टव्यमिति साधनात्तन्नाशः॥ अनूहे पुनरनष्टसाधनत्वे कस्यचित्सदस्य लक्षणयागो एया चाभिधानं

संभवतीति नानीव दोषः। तस्मादिमौ विधिप्रतिषेधौ ब्राह्मणसंकीर्तितावपि न्यायमूलावेवेति मंतव्यौ। नेना
यमृक्षदूहप्रतिषेधः सार्वत्रिक इति मत्वा सर्वेषु यजुर्निगदेष्वित्ति यजुषे वो रूमुक्तवान्भगवानाश्वलायनआचा
र्यः॥ ७॥ द्विदेवत्ये श्चरंति। वक्ष्यमाणग्रहा द्विदेवत्यसंज्ञा भवंति। ते नवाग्निंद्रवायुदेवात्यो पि द्विदेवत्यसंज्ञो
भवतीति श्चरंति। तेषां याज्या प्रैषानुवाक्यावुक्षं नरइति संबंधः। वा पवइंद्रवायु भ्यां वायाहि दर्शतेंद्रवायू इ
मे सुता इत्यनुवाक्ये अनवानं प्रथक् प्रणवे। एते द्वे ऋचौ द्वे अनुवाक्ये भवतः। ते च सहानवानेन वक्तव्ये प्रथ
क् प्रणवे च। प्रथक् प्रणववचनामनुवाक्याद्वित्वादेव प्रणवद्वित्वे सिद्धे पि न्यायामृद्वित्वेपि अनुवाक्या
द्वित्वाभावात्प्रणवद्वित्वं नास्तीत्येवमर्थं। होता यक्षद्वायुमग्रेगां होता यक्षदिंद्रवायू अर्हंते पिति प्रैषावनं
वानं। तत्राप्यनवानवचनं पदैरस्परसंतानार्थं। अयं पिबा मधूनामिति याज्ये अनवानं मेकागुरेस्त्थयवषु
ट्कारे। अस्मिन्प्रतीके द्वे ऋचौ द्वे याज्ये भवतः। ते च सहानवानं भवतः। तत्र याज्याद्वित्वात् गुरोद्वित्वे प्राप्ते ए
कागुरे एवेति नियम्यते। प्रथग्वषट्कारवचनं घर्माग्निन याज्यासु ऋक् द्वित्वेपि याज्याद्वित्वाभावात्साधनद्व

रेणैकं वषट्कारं तावत्कुं। यत्र पुनर्ह्योम्यामृग्भ्यामेव याज्याकार्यं चासाध्यते तत्र पूर्वस्यां अंते प्रणवो नतु कर्तव्यो
वषट्कारश्च। कार्यभेदनिमित्त एवेति मंतव्यः॥ इदमाद्यन्तवाने प्रातःसवनस्तुत्यानुवाक्ये। अयं विधिः प्रातः
सवने प्रयुज्यमानायामपि भवति न्योऽस्त्यानामेव। तेन वाजिनामनुवाक्याप्यनवानं वक्तव्या। प्रैषो चोत्तरयो
रित्यस्मादेव शब्दादुत्तरयोरपि ग्रहयोरनुवाक्यायोरप्यनवाने सिद्धे अस्यानुवाक्योत्यत्वाऽत्र नास्तीति
कृत्वा प्रयुज्यमानविषयत्वमस्यैकैसूत्रस्यावगम्यते। प्रैषो चोत्तरयोर्ग्रहयोः॥ प्रैषौ च याज्यानुवाक्या॥
श्चोत्तरयोर्ग्रहयोरनवानं भवतीत्यर्थः॥ हुत्वेतद्ग्रहपात्रमाहरत्यध्वर्युः॥ एतदिति प्रकृतं वाय्विंद्रवायुसंबं
धियत्वात्तं तदित्यर्थः॥ गृह्यत इति ग्रहः सोमः तस्य पात्रं॥ एतद्ग्रहमपि भवति। यदेतद्वाय्विंद्रवायुसंबंधि ग्र
हपात्रं हुत्वा तदेवाहरत्यध्वर्युरेवेति। तेनान्योप्यत्र ग्रहो हूयते पात्रमन्यदस्तीति ज्ञायते अध्वर्युराहर
तीति वचनात्प्रतिप्रस्थाताप्यत्र जुहोतीति गम्यते। तेनास्मिन्नेस्यमाणे प्रतिप्रस्थातर्युपहवपाचनं कर्तव्य
मित्यवगंतव्यं। तद्धीहुहो पाददेतु वसुः पुरूवसुरिति। तदितिवचनमात्तं ते गृहीयान्नादिक्रियमाणमित्येवमर्थं।

प्रतिगृह्य दक्षिणमूरुमपोछाद्य तस्मिं सादयित्वाकाशवतीभिरंगुलीभिरपिदध्यात्॥ प्रतिगृह्येति वचनं ग्रह
स्य हस्तांतरसंक्रमणविवृत्यर्थं। दक्षिणवचनमशैंपोछादने सव्यस्याप्राप्रणार्थं। तेन सव्येनापोछादनं भ
वति। तस्मिन्निति वचनमूरोरपोछादितप्रदेशे साधानार्थं। आकाशवतीभिरंगुलीभिरित्यंभूतेन पाणिना
पिदध्यात्। अंगुलीभिरेवाकाशवतीभिरपिधातुमशक्यत्वात्॥ एवमुत्तरे। एवमुत्तरे अपि पात्रे प्रतिगृह्य
सादनापिधाने कुर्यादित्यर्थः॥ सव्येन त्वपिधायतयोः प्रतिग्रहो भक्षणं च। प्रतिग्रहभक्षणकाले तु सव्ये
नापिधानं भवतीत्यर्थः॥ मैत्रावरुणस्यायं वां मित्रावरुणा होता यक्षन्मित्रावरुणा गरणा नाजमदग्निनेति
॥ ऐतु वसुर्विदद्वसुरिति प्रतिगृह्य दक्षिणेनैंद्रवायवं हत्वाभ्यालं सादनं। आश्विनस्य प्रातर्युजाविबोधयहो
ता यक्षद्क्षिनानासत्या वा दृष्टानाशुभस्यतीद्वस्यैतु वसुः संयद्वसुरिति प्रतिगृह्यैवमेव हस्तोत्तरेण शिरः
परिहृत्याभ्यालं तरं सादनं। एवमेवेति। यथा मैत्रावरुणः पूर्वमासादितमैंद्रवायवं दक्षिणेन हत्वाल्पमासा
सादितः॥ एवमाश्विनः पूर्वसादितावैंद्रवायवमैत्रावरुणो दक्षिणेन हर्तव्य इत्यर्थः॥ तत्र समुत्तरेण शिरःप

सू०२०
१४०

पश्चाग्नीत्पुनर्दक्षिणेन शिरः पुरस्तान्नीत्वा मैत्रावरुणाय दद्यात्तस्मात्तरं सादयेत । अनुसवनं प्रैषयाज्यासु
नित्यो ध्वर्युतः संप्रैषः । अनुवचनादिष्वध्वर्युसंप्रैषः आकांक्षणीयः । अध्वर्युग्रहणमध्वर्युपुरुषाणामपि प्र
दर्शनार्थं । अत एवाध्वर्युतः स्रुक्पात्राध्वर्योरिति । नित्यवमवनं नित्य एव प्रैष आकांक्षणीयो नानित्य इत्यै
वमर्थं । तेन पृष्ठसूक्तवाकप्रैषादौ न नियमेन प्रैष आकांक्षणीयः । उन्नीयमानेभ्यो न्वाहाला वह्ने तत्सावि
द्वमिष्टापयातेत्यनुसवनं । उन्नीयमानेभ्य इति वचनं चमसेभ्य उन्नीयमानेभ्यः सोमेभ्य इत्यर्थः । अनुसवनं
सवने सवने एतेषामेकैकं सूक्तमनुब्रूयादित्यर्थः । होता यक्षदिंद्रं प्रातः प्रातःसावस्य होता यक्षदिंद्र
माध्यंदिनस्य सवनस्य होता यक्षदिंद्रं तृतीयस्य सवनस्येति प्रेषितः प्रेषितो होतानुसवनं प्रस्थितयाज्या
भिर्यजति । एतैस्त्रिभिः प्रैषैर्यथालिंगमेव प्रेषितो होतानुसवनं ताभिः प्रस्थितयाज्याभिर्यजति । होतृग्र
हणं होतुरेव प्रैषेण प्रेषणं नान्येषामित्येवमर्थं । अनुसवनं सवने सवने प्रैषेण प्रेषितो होतैनिवय यजेदित्य
र्थः । नामादेशमितरे । इतरे प्रशास्त्रादयो नामादेशं प्रेषितयजेयुः न होता । तेन यद्यप्यध्वर्यवो होतर्यजेति प्रेष्यंति

राम०
१४१

। तथाप्यत्र प्रशास्त्रेव प्रेषितो यजेत् । नामादेशमिति नामादिश्य यादिर्देयेत्यर्थः । इतरेषां क्रमस्वरूपमाह । प्रशास्ता
ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रः अच्छावाकश्च । सूत्रभेदस्य करणं तस्यैवोत्तरसूत्रे विशेषविध्यर्थं । उत्तरयोः
सवनयोः पुरोगनीधात् । इदं ते सोम्यं मधु मित्रं वयं हवामहे इंद्र त्वा वृषभं वयं मरुतो यस्य हि क्षये ग्ने पत्नीरि
हावह होत्रान्नाय वशात् त्वायेति प्रातःसवनिक्यः प्रस्थितयाज्याः । पुनः प्रस्थितयाज्यावचनं प्रशास्त्रादिसंब
धीनामपि तत्संज्ञाप्रापणार्थं । अच्छावाकस्यात्र नोच्यते प्रातर्यावभिरागतं मित्रयजतीति स्वावसरे वक्ष्यते । पि
बा सोममभि यमुग्र तर्द इति तिस्रो वीडि. हि सोमकामं त्वा दुस्तवायं सोमस्त्वमेत्य वीडि. इत्यसो मा: प्रदिवो विदा
ना आपूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः । इंद्र ऋभुभिर्वाजवद्भिः समुक्षितमिंद्रावरुणा सुतपाविमं सु
तमिंद्रश्च सोमं पिबतं बृहस्पत आ वो वहंतु सप्तयो रघुष्यदो मेवनः सुहवा आहि गंतनेंद्राविष्णू पिबतं मध्वो अ
स्य मं स्तोममर्हते जातवेदस इति तार्तीयसवनिक्यः । सोमस्याग्ने वीहीत्यनुवषट्कारः । अयमनुवषट्कारः
कर्तव्यः । अनुवषट्कारस्य प्रवृत्तिविषयमाह । प्रस्थितयाज्यासु शास्त्रयाज्यासु मरुत्वतीयेहारियोजने महि

सू०८० स्त्रि। आश्विने चनैरोऽग्नौ। सूक्तमेर ग्रहणं वैषम्यख्यापनार्थं वैषम्यं च शास्त्रोक्ते क्रियमाणेऽपि शस्त्रयाज्यान्
१४१ भवतीत्येवमर्थं। तेनायाज्यमाश्विनमित्स्वगतं भवति। तदेषाभि यज्ञगाथा गीयते। ऋतुयाजान्हि देवत्यायस्त्र
पालीवतो ग्रहः। आदित्यग्रहसावित्रौ तान्त्स्म मानुवषट्कुर्यादिति। एतद्यज्ञगाथा इति। एतद्यज्ञगाथात्मको वेदो
पचारं शास्त्रि। गाथा शब्दे न ब्राह्मणगतानुच्यते। यज्ञार्था गाथा यज्ञगाथा सैषा नानुवषट्कारविधानप्रस्तुम
तदित्यर्थः। को हि द्यपसंकीर्तनं सानुवषट्कारा अनुवषट्कारा श्चैतावंत एवेति ज्ञापनार्थं। प्रतिवषट्कारं भक्ष
णं। प्रतिवषट्कारं भक्षणे प्रयत्नं कुर्यान्नात्र भक्षो विधीयते। अन्यत्र विहितत्वात्। तेन नच नांतरेणो विहिते भ
क्षितस्याप्यावृत्तिमात्रमत्र गुणो विधीयते। यत्र द्विर्वषट्कारोऽस्ति तत्र भक्षोऽपि द्विरावर्तते। यत्र तु सकृदेव वषट् क
रोति तत्र तु सकृदेवेति सिद्धं। तूष्णीमुत्तरं। उत्तरं प्रावोऽन्तं तूष्णीमेव कर्तव्यं। वषट्कारप्रसंगादत्रैवेदमुक्तं। ए
त्यध्वर्युः। आहवनीयप्रदेशात्सद आगच्छतीत्यर्थः। अयाळग्नीदिति पृच्छति। आगच्छंतमध्वर्युं होता पृच्छतीत्यर्थः
। अयाळिति प्रत्याह। प्रत्याहाध्वर्युरित्यर्थः। समद्भूमकर्यानः सोमस्य पाययिष्यतीति होताजपति। होतृग्रहणमध्व १४१

र्योधिकाराधि॥५॥ ऐन्द्रवायवमुन्नेरेर्धे गृहीत्वाध्वर्यवे प्रणामयेदेषवसुः पुरूवसुर्मेऽयिवसुः पुरूवसुर्वाक्पा वाचं
मे पाहि उपहूतावाक्सह प्राणेनोपमां वाक्सह प्राणेन ह्वयतामुपहूता उपक्रषयो दैव्यासस्तनूपावानस्तन्वस्तपो
जा उपमामृषयो दैव्यासो ह्वयंतां तनूपावानस्तन्वस्तपोजा इति। इतरे पात्रेस्य नापिधायैन्द्रवायवं दक्षिणेन हो
स्ते नोत्तरभागे गृहीत्वाऽध्वर्योरपिग्रहणाय प्रणामयेत्। एष वसुरिति मंत्रेण। अध्वर्यउपह्वयस्वेत्युक्त्वावघ्रायना
सिकाभ्यां वाग्देवी सोमस्य तृप्यत्विति भक्षयेत्सर्वत्र। अत्रोपहवविधानं क्रमार्थं। उत्तरत्र विहितत्वात्। नासिकाभ्यामि
ति वचनं नासिकाद्वयेनावघ्राणं नियमेन कर्तव्यं। तेनान्यत्रेन्द्रियकार्यमनियमेन कर्तव्यं। एके तु द्वाभ्यां चेति सिद्धं। सर्व
त्रेति वचनस्याप्ययमेव सोमभक्षणमंत्रस्यादित्येवमर्थं। प्रतिभक्षितं होतृचमसे किंचिदवनीयानाचम्यो
पह्वानादि पुनः संभक्षयितान्सोमेनो च्छिष्टा भवंतीत्युदाहरंति त्रोषं होतृचमस आनीयोत्सृजेत्। होत्राभक्षित
मध्वर्युणा च भक्षितं होतृचमसे किंचिदासिच्यानाचम्यैवोपह्वानादि पुनः सह भक्षयित्वा शेषं होतृचमस आनी
य तत्सात्रमुत्सृजेत्। नाप्रागुत्सृजेदित्यर्थः। पुनर्भक्षे प्रतिप्रस्थातुरुपहवयाचनं कर्तव्यं। अस्य सूत्रस्य मध्येभ

(139)

सू०वृ०
१४२

सणनिमित्ताशुचित्व०निर्हरणाय प्रसक्तमाचमनमकृत्वोपहवादिकर्तव्यमित्युक्तं।अनाचम्योपहूतानादि
ति।सोयमाचमनप्रतिषेधः सोमभक्षणेऽशुचित्वाभावादुक्तदृतिनद्रुपपारनार्थो।नसूत्रमध्य एवनसोमेनो
च्छिष्टाभवंतीसुराहरंती।निवचनादिदमपिस्मृतिवचनमितिदर्शयति।सोमेनेतिसोमभक्षणेनेत्यर्थः।तेनान्यद्रव्य
भक्षणेनाशुचित्वमेवेतिगम्यते।सोमाधिकारे पुनःसोमग्रहणंसर्वभक्षणेप्रापणार्थं।एवमुत्तरे।एवमुत्तरेऽभ
क्षणेनाशुचित्वमेवेतिगम्यते।सोमाधिकारे पुनःसोमग्रहणं
पिग्रहणाचेभक्षयेत्।तत्रविशेषमाह।नत्वेनयोःपुनर्भक्षः।अनयोरपिप्रतिप्रस्थातृयुपहवयाचनमस्ति
।नकंचनहिदेवत्यानमनवतीनमवसृजेत्।दिदेवत्यानांमध्येकंचनग्रहंहोतृचमसेअनवनीतेनोत्सृजेदित्य
र्थः।मैत्रावरुणमेषवसुविदहसुरिहवसुविंदहसुर्मेयिवसुविंदहसुश्चक्षुर्मेपाह्युपहूतं।चक्षुःसहमनसो
पमीचक्षुःसहमनसाह्वयतामपहूताऋषयोदैव्यासस्तनूपावानस्तन्वस्तपोजाउपमामृषयोदैव्यासोह्व
यंतांतनूपावानस्तन्वस्तपोजाइति।अध्वर्युर्वैप्रणामयेदितिशेषः।अक्षीभ्यांविहावेक्षणंदक्षिणेनाग्नेप
श्चात्तस्येनेत्यर्थः।सव्येनपाणिनाहोतृचमसमादधीतेतुवसून्नांपतिर्विश्वेषांदेवानामेनोमित्रिदिति।मैत्रा

राम०
१४२

वरुणपात्रोत्सर्गोतेकर्मकृत्वादक्षिणेनाश्विनमपिधायसव्येनपाणिनाहोतृचमसमादधीतमंत्रेण।
पाणिग्रहणमपिधानमपिपाणिनेवाकाशावसंगुलियुक्तेनकुर्यात्।नांगुलीभिरित्येवमर्थं।तस्मादलिना
तास्योरोवेसनामपोछायनस्मिन्सादयित्वाकाशावतीभिरंगुलीभिरपिदध्यात्।तस्येतिसव्यस्येत्यर्थः।
ऊरोरितिवचनमूरोरेकदेशस्ययास्ययोजनमपोछादनंनसर्वस्येत्येवमर्थं।अपिधानमपिसव्येनाधि
कृतत्वादन्यस्यान्यत्रभाष्टनत्वात्।आश्विनंयथाहृतंपरित्यज्यपुनःसादयित्वाध्वर्युर्वैप्रणामयेदेषव
सुःसंयदहसुरिहवसुःसंयदहसुर्मेयिवसुःसंपदहसुःश्रोत्रपाःश्रोत्रंमेपाह्युपहूतं०श्रोत्रंसहात्मनोपमांश्रो
त्रंसहात्मनाह्वयतामुपहूताऋषयोदैव्यासस्तनूपावानस्तन्वस्तपोजाउपमामृषयोदैव्यासोह्वयंतांत
नूपावानस्तन्वस्तपोजाइतिहोतृचमसंसव्येनापिधायपत्तोदक्षिणेनाश्विनंगृहीत्वाशिरसोदक्षिणतःपश्चा
न्नीत्वातस्मैवोत्तरतःपुरस्तादानीयस्वस्थानएवोरौसादयित्वाततःप्रणामादिकुर्यात्।कर्णाभ्यांविहो
पोयछेद्दक्षिणापाग्नेनिधायहोतृचमसंस्पृष्ट्वोदकमिळामुपह्वयते।आश्विनमुत्सृज्यततोदक्षिणेनैवपा

(१६)

सू० ह०५ णिनाहोतृचमसमुपनिधाय स्पृष्टोदकमिळामुपह्वयते। तउपोद्यछंति चमसान्। इळोपह्वानकाले चमसिनः स्वंस्वं
१४३
चमसमिळासमीपेउद्यछंति चमसाध्वर्यवो वा। अवांतरेडां प्राश्याचम्य होतृचमसं भक्षयेदध्वर्यउपह्वयस्वे
त्युक्त्वा। अवांतरेडाप्राशनविधानमत्र क्रमार्थं। आचमनविधानं नियमार्थं। इळोपह्वानानंतरमवांतरेडाप्रा
शनमेव कृत्वा चम्य चमसमेव भक्षयेदिति। तेनइदानीमिळाभक्षणं नास्तीति ज्ञायते। इदमप्यनेन ज्ञायते कृ
त्वा चावांतरेडाप्राशनमिळाप्राशनं च कृत्वा पश्चाच्छौचार्थमाचमनं भवति न तयोर्मध्ये पीति। अध्वर्यउप
ह्वयस्वेत्युक्त्वा भक्षयेदित्यनेन वचनेन चत्वारोर्थाः सूचिता भगवता सूत्रकारेण। तत्राद्यमेकोर्थः। नानुपहूते
न सोमः पातव्यः। न वै सोमपीथेन ह वा धुको भवतीति श्रुतिवचनाद्दुपहूतेनैव सोमो भक्षयितव्य इति। अय
ते
मपरोर्थः। उपहवयाचनं कर्मनामधेयेन संबध्यते नोपह्वयस्वेत्येवमेतेन वाक्येनेति। आयमप्यपरोर्थः
। यत्रक्व च सोमे वषट्कारेण वः तमाख्यया वा भक्ष्यमाणे होमाभिषवनिमित्तेन भक्षणेनैकस्मिन्पात्रे प्रतिभ
क्षितया सह प्रश्नो नास्ति तत्राध्वर्यावेवोपहवयाचनमिति। अयं वा परो भक्षणमपि कर्तव्यमिति। एतदुक्तं
१५२

भवति। अवांतरेडां प्राश्य इडाभक्षणमकृत्वा चम्य होता स्वचमसं भक्षयेदध्वर्यो उपहवमिष्ट्वा वाग्देवी सोमस्ये
त्यनेन मंत्रेणेति। दीक्षिता उपह्वयध्वं। दीक्षितश्चेद्धोता नत्रादीक्षिता उपह्वयध्वमित्युक्त्वा स्वं चमसं भक्षयेत्। य
जमाना इति वा। दीक्षित इत्यनुवर्तते। यजमाना उपह्वयध्वमित्युक्त्वा वा भक्षयेत्। मुख्यान्वा पृथग्घोत्रका
उपह्वयध्वमिति। तेषां एवं चोपहवयाचनं दीक्षितस्य मुख्यानध्वर्य्वादीनध्वर्यउपह्वयस्व ब्रह्मन्नुपह्वय
स्व उद्गातरुपह्वयस्वेति पृथगुक्त्वा अमुख्यांस्सर्वांत्सकृद्देव होत्रका उपह्वयध्वमित्येवमर्थः। एवमितरे। अ
दीक्षितश्चाद्धोता यथोक्तमुपहवयाचनं कृत्वा स्वं चमसं भक्षयेदित्युक्तं। एवं दीक्षिता अदीक्षिताश्च मैत्रा
वरुणादयस्स्वं स्वं चमसं भक्षयेयुः। तेनैवोपहवयाचनप्रकारेणादीक्षिता नानयमेवोपहवयाचनप्रकार
ः। सर्वत्र प्रतिभक्षिणि सत्यसति वा। अदीक्षितानां कश्चिद्विशेषोस्ति स्याहा यथा समभक्षं त्वदीक्षिताः। यो
यस्य समभक्षः स यथा समभक्षः। समभक्षो नाम समानभक्षः। एतदुक्तं भवति। एकस्मिन्काले एकस्मिन्पात्रे
ययोर्भक्षस्तयस्युतेनयोरन्यतरोन्यतरं प्रति समभक्ष इत्युच्यते। स एव होमाभिषववत्त्वोवषट्कर्तारं प्रति

15

सू० वृ० ५
१४४

समभक्षइत्यर्थः तत्रैवं भक्षमिति। तत्र न मैत्रावरुणस्य भक्षयेन्नाध्वर्युमिति। अदीक्षितानामेवायमपवादः। दीक्षि
तानां तु ग्रहेषु चमसेषु च दीक्षिता उपह्वयध्वमित्यादयस्त्वय एव प्रकाराः। नान्यः क्वचिदपीति। मुख्यच
मसादचमसाः। होत्रास्वचमसं भक्षयेदित्युक्ताएव मित्र रइत्युक्तं। तेन होतुरन्येषां सर्वेषां भक्षणं विहि
तमिति मन्यमाना अचमसिनश्चमसोन्यो भक्षयंति। अचमसाः पुनः प्रत्यासत्त्या स्ववर्ग्यस्य मुख्यस्य।
द्वितीयस्य तृतीयस्य वात्मनोऽनंतरतमस्य चमसवतश्चमसान्भक्षयेयुः। यस्य पुनर्होमाभिषवनिमित्तं
भक्षणमस्ति तदेव तस्य भवति। इतरेषां मुख्यस्य चमसादिति येऽमंति षाम्भ्रोमितिमपतु तुस्तुर
पिपूर्वपक्षेष्वनुष्ठाननिर्वाहं वर्णितेवानाचार्यः। एवं प्रकारेष्वेवं न्यायोनुसर्तव्य इति प्रदर्शयितुं से
मुख्यशब्दोत्रापेक्षिको गृह्यते। प्रत्यासत्त्यानुगुण्यादेनं पक्षं दूषयंति। द्रोणकलशाद्वा। वा शब्दः पक्षं
व्यावर्तयति। नात्राचमसानां सोमभक्षणमस्ति विधानाभावात्। सोमभक्षस्य हि निमित्तं वषट्कारो हो
माभिषवो चमसिनां वा। अचमसानां तु तेषां निमित्तानामन्यतमदपि नास्ति। अनस्तेषामत्र भक्षो नास्ति॥

राम०
१४४

निसिद्धं। द्रोणकलशात्तु भक्षणमस्ति वचनाद्यथा चमसमन्याश्चमसांश्चमसिनो भक्षयंति वा। अथैतस्य
हारियोजनस्य सर्व एव लिप्संत इति श्रुतिवचनं। तेन सर्वचनेन द्रोणकलशो हारियोजनशेषस्य चमसिभि
रचमसैश्च भक्षणं विहितं। तदनेन प्राप्तभक्षणमयं सूत्रकारो वघ्राणस्वरूपेण विधास्यति। तदेवं रूपमे
वानेनोक्तं तेन भक्षांतरमित्यवगंतव्यं। उक्तः सोमभक्षजपः सर्पत्र। यदुक्तः सोमभक्षणमंत्रो वाग्देवीति
सर्वत्र सोमभक्षे भवति नद्रोणांतरभक्षे। पूर्वं सर्वत्र ग्रहणं हि देवत्वे शेषत्वरिनार्थमिति। पुनस्त द्विधीयते
। चमसानां भक्षणमुक्तां तत्संगेन सर्वत्र सोमभक्षस्य निमित्त तुह्राग्रादि चमसभक्षयितव्यविचार
श्वाजेनदर्शयितु माचार्योनरमतान्युपन्यास्यतिस्म। होतुर्वषट्कारे चमसाद्भूयं तत्र ह्रातुर्ब्रह्मणा यज
मानस्य तेषां होनाग्नेभक्षयेदिति गौतमो भक्षस्य वषट्कारान्वयत्वात्। सोमभक्षणे त्रीणि निमित्ता
निश्रुतौ निर्दिष्टानि निर्दिष्टो वषट्कर्तुः प्रथमभक्ष इति प्राथम्यविशिष्टं भक्षणं वषट्कारनिमित्तं विदध
धाति। अभिषुत्य हुत्वा भक्षयंतीति होमाभिषवनिमित्तं विदधाति। होतुश्चमसमित्यादि समाख्याबल।

सू०टू०५
१४५

स्तापि समाख्याभक्षणे निमित्तमिति गम्यते। तत्र होमाभिषवावस्मदीये तु न स्त इति तन्निमित्तभक्षस्यात्र वि-
चारो न कृतः। न च वषट्कारनिमित्तं समाख्यो निमित्तं च भक्षणं विहितमेवास्तीति मन्यमानो गौतमस्तेषां
होताग्ने भक्षयेदित्युक्तवान्। अग्नवच्च न सामर्थ्यादुद्गात्रादयोऽपि पश्चाद्भक्षयेयुरिति। अस्याभिप्रायो गम्य
नरावा। होतृग्रहणं ग्राह्मणां चतुर्णामपि प्रदर्शनार्थं। उद्गात्रादि च मसग्रहणं च सर्वचमसानां प्रदर्शनार्थं
। तथा हि सर्वे चमसाः शस्त्रिणां वषट्कारेषु हूयमाना दृश्यन्ते किं तेषां त्रयाणां विशेषोऽस्ति सर्वदा परवषट्
कारेषु हूयन्त इति। अभक्षस्य वषट्कारान्वयत्वादिति वषट्कारनिमित्तत्वादित्यर्थः। एवं गौतमेनोक्ते समा
ख्यया भक्षो न विधातुं शक्यत इति मन्यमानस्तौल्वलिराह। अभक्षणमितरेषामिति। तौल्वलिः कृ
तार्थत्वात्। वषट्कर्तृभक्षणेनैव शेषस्य प्रतिपत्तेरितरान्वेषणे नैरपेक्ष्यं भवतीति कृतार्थत्वादित्युक्तं।
यदि परं समाख्यापि भक्षस्य विधायिका स्यात्तदा तस्मिन्कृतेऽप्यकृतार्थमेवावतिष्ठेत। सा च न विधायिका
नामधेयतया विनियोगानामेव पदानां समन्वयदर्शनादिति एवमुक्ते गाणगारि गौतमपक्षमेव समर्थयि

रा म०
१४५

तुमाहा। भक्षयेयुरिति गाणगारिरनः संस्कारत्वात्काचनत्वचमसतास्यान्नचान्यः संबंधः। उद्गात्रादयोऽपि भ
क्षयेयुः। वषट्कारनिमित्तभक्षणेन संस्कृतानामपि शेषाणामस्मात्समाख्याभक्षणादपि संस्कारत्वात्। वच
ने सति संस्कृतानामपि शेषाणामस्मात्समाख्याभक्षणादपि संस्कारत्वात्। वचने सति संस्कृतानामपि
संस्कृतानामपि संस्कारसंभवोऽस्तीत्यर्थः। येऽनसंस्कारत्वादिति पठन्ति तेषामयमर्थः। योऽयं समाख्याभक्षा
संस्कारः स वषट्कारभक्षसंस्कारेण न भवति नतोऽन्यत्वादित्यर्थः। अन्यत्वेऽप्यविरोधाच्च समुच्चय एवेत्यर्थ
ः। ननु समाख्याभक्षणं न विदधातीत्युक्तं। सत्यं स्वरूपेण न विदधाति कार्यं तस्तु विदधाति। तेन कथं ज्यो
तिष्टोमाधिकारनियोगः स्वप्रकरणाधीनसकलपदोद्बोधितपदार्थावच्छिन्नः प्रतीयमानः कार्या
त्मकत्वादात्मनः स्वावच्छेदकभूतानपि कार्यतयावगमयन् होतृचमसपदाद्यभिहितां संबंधा-
विशेषान् कार्यतयावगमयतीत्येवं। संबंधविशेषो होतास्मिंश्चमस इति होतृचमस इत्येत
न मुख्यान्यः स्वस्वाम्यादिलक्षणोऽत्र न संभवति। एवमप्यर्थं सूत्रकारः सूचितवान्। काचनत्वचमसता

सू०वृ०
१५६

स्यात्त्वचान्यः संबंध इति वदन्। यदा च मसिनां च मसेषु वषट्कार निमित्तं समाख्या निमित्तं च भक्षद्वयमाग
च्छति तदा पूर्वं वषट्कारात् भक्षयित्वा होमाभिषव भक्षणं च कुर्वन्ते न ततः समाख्यातो भक्षयेत्। यत्र पुनः प्रति
भक्षिता नास्ति तत्र तंत्रेणोभौ भक्षौ तंत्रेण सिध्यतः समाख्या निमित्तो वषट्कार निमित्त भक्षसा तु वषट्का
रेषु सर्वत्र द्विरावृत्तिरस्त्येवाभक्षयित्वा पात्रमसौ मममृता अभूम शंनो भवत्त्वद आपीतइंदविति मुखहृ
दये अभिमृशेरन्। भक्षणानंतरमेताभ्यामृग्भ्यां मुखहृदये अभिमृशेरन्। अभिमृशेरन्नत्र द्वित्वं यथा
संख्येन। अनयोराप्यायने दर्शयिष्यन्निप्रतिप्रदाय द्रोणकलशमात्मानमाप्याय्येति। आप्यायनं त्व
द्भिः संमर्शनं भवत्येवेति। आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजा इति चमसानाद्यो पाद्यारपू
र्वयोः सवनयोः स्वं स्वं चमसं हाभ्यामृग्भ्यां हि मरभिमृशेरन्पूर्वयोः सवनयोराद्यो द्वितीयांश्चमस्योंसा
न्। आद्यांस्तृतीयसवने। तृतीयसवने आद्यानेव चमसानभिमृशेरन्। एतदाप्यायनं च मसमाप्यायस्व
भिरूपाभ्यामिति फलं च समसे श्रुतौ दर्शनात्। सर्वं चात्मानमन्यत्रैकपात्रेभ्यः। एकपात्रा ऊर्ध्वपात्रा

राम०
१५६

णितानि वर्जयित्वा सर्वत्रात्मानमाप्याययेयुः आत्मशब्देनात्र मुखहृदये उच्यते। आप्यायितांश्चमसांस्ता
दयंति। ते नाराशंसा भवंति। नाराशंस संज्ञा भवतीत्यर्थः। अन्वर्थसंज्ञेयं नाराशंसानां। त्रयः पितृगणा
ःऊमा ओर्वा काव्याश्चेति। ते चानुसवनं यथासंख्येनाप्यायितानां चमसानां देवता भवंतीति नारा
शंसाश्चमसा भवंतीति॥६॥ एतस्मिन्काले प्रपद्याच्छावाक उत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वेण सदआ
त्मनो धिष्ण्यदेश उपविशेत्। अच्छावाकस्य कर्मकालत्वादस्मिन्कर्मकाले प्रपदने सिद्धे का कालोपदे
शोऽच्छावाकः। कर्मकाल एव प्रपद्येतेत्येवमर्थो। तेनान्यकर्मकालात्प्रागेव प्रातरनुवाककाले प्रपद्येरन्नि
न्निति सिद्धं भवति। प्र॰ पद्येति वचनं यजमानस्य तथा वा प्रपन्नोऽच्छावाकीयत्वा यास्मिन्काले नियमे
न प्रपद्येते त्येवमर्थो। स स्वधिष्ण्यस्य पुरस्तादपूहूरे सदसो बहिरुपविशेत्। पुरोळाशा दृगध्वं प्रतिमिवा
ळामिवोद्यम्याच्छावाक वदस्वेत्युक्तोऽच्छावो अग्निमवस इति तृचमन्वाह। दृगध्वशकालमित्यर्थः। प्रत
मध्वर्युणाद्च्छामिवोद्यम्यात्स्यहंमित्तं प्राण संमितं वेत्यर्थः। संप्रेषपाहः स्वाध्यायस्त्रैवा दनयासं प्रेषस्या सं

(१५५)

सू०२०
१५७

वादे सत्यप्यनुवचनसिध्यर्थं। अंत्येन प्रणवेनोपसंतनुयाद्यजमानहोतरध्वर्योऽग्नीद्ब्रह्मन्पोतर्नेष्टरुन्नेतरुप
वक्तरिषेषयध्वमूर्जोऽजेयध्वं निवो जामयो जिहतान्यजामयो निःसपत्ना यामनि बाधितासो जयताभीत्व
रीजयताभीत्वर्याः ग्रावदृदृदः ग्रणवृद्धो अग्निः प्रस्थोयंद्राग्निभ्यां सोमं वोचतोपो अस्मान्ब्राह्मणाद्ध
पध्वमिति। अंत्येन प्रणवेनेति एतावतैव प्रणवेन निगदस्य संताने सिद्धे उपसंतनुयादिति वचनं ब्रह्म
ण्यस्य निगदस्यानवानत्वसिध्यर्थं। समाप्ते स्मिं निगदे ध्वर्युर्होतरुपहावं कांक्षते। एतदध्वर्यो रुप
हवयाचनमच्छावाकार्थं। समाप्त इति वचनमुपहवयाचनकालविधानार्थं। अस्मिन्निति वचनमुन्न
रोपि निगद एव नब्रह्मण्य उपहवमंत्र इत्येतद्दर्शयितुं। तेन प्रत्येतव्यो ह्युपहूता इत्यंतो निगद एव उ
पहूत इत्येवानेनवृत उपहवमंत्र इति वेदितव्यः। प्रत्येता सुन्वन्यजमानः ब्रह्मवामाग्नभीत्। उत प्रति
ष्ठितोपवक्तरुन्नेतो गाव उपहूता उपहूताउप इत्युपह्वयनेत् उपहूता इत्युक्त्वा उपहूत इत्युपह्वयत इ
ति मध्ये व्याहारः कर्तव्यः। उपहूत इत्येष प्रत्युपहवमंत्रः। सर्वत्रायमेव प्रत्युपहवमंत्रः। अयं पक्षिन

रा०म०
१५७

त्वादन्यस्य चानाम्नानात्। उपहूतः प्रत्यस्मादित्युन्नीयमानायानूच्य प्रातर्यावभिरागतमिति यज
ति। उपहूत इति वचनमच्छावाकस्य ग्रहणार्थं। ततोन्नीयमानाय नमस्याऽसाय प्रत्यस्मा इत्येतत्सूक्तम
च्छावाक एवानुब्रूयात्। ततः प्रातर्यावभिरित्यनया यजति। एषास्य प्रस्थितयाज्या। निधाय पुरोळा
शमळं स्पृष्ट्वोदकं चमसं भक्षयेत्। निधायेति वचनादेतावंतं कालं हस्तगतमुदधस्येवासीत्। नास्पृष्ट्वोद
कः सोमेनेतराणि हवींष्यालभेरन्। सोमेनेति सोमेन संपृक्ता इत्यर्थः। तेन सोमं स्पृष्ट्वेतः उदकोप
स्पर्शनमकृत्वेतराणि पुरोळाशादीनि हवींषि नालभेरन्। पुरोळाशं स्पृष्ट्वेतः सोमस्पर्शे नेउदको
पस्पर्शनं विधाय तद्व्यपावस्थापवक्ष्ये सति विपरीतमुक्तं। तस्यायमभिप्रायः। यथा स्पृष्टसोमस्य
हविरंतरालंभने उदकोपस्पर्शनं तथा स्पृष्टपुरोळाशादिकस्य च सोमस्पर्शने इत्युभयथापि भवती
ति। न केवलमिदं तत्स्पर्शन एव तद्व्यासाच्च स्पर्शनेपि भवति। निधाय होतृचमसं स्पृष्ट्वोदकमिति चमस
स्पर्शनेपि विधानात्। आरोपितराद्दिषप्रभृतीन्पिच्छानुपस्थाय परयाद्वारा सदः प्रसर्प्यात्प्रश्ना।

145

सू०वृ०
१७८

स्वस्य धिष्ण्यस्योपविश्य प्राश्नीयात्। एतद्द्रुगवमादाय तद्द्रुस्त एव धिष्ण्यापस्थानादि यो अद्येस्येवमंतं कृ
त्वा तत्रस्थ एव तत्प्राश्नीयात्। उपविश्य प्राश्नीयादिति उपविश्य जपित्वा प्राश्नीयादित्यर्थः॥
॥अपरया द्वारा प्रसर्पणविधानात्। द्वार्याभिमर्शनं च तस्यामेव। सदर्दः प्रसर्पणे कृते स्वस्यैव धिष्ण्य
स्य पश्चादुपवेशने सिद्धे यत्स्यश्चात्स्वस्वधिष्ण्यस्योपवेशनं विदधाति। तत्तत्रैव द्रुगवं प्राशनार्थं। त
त्रैवोपविश्य द्रुगवं प्राश्नीयात्। न बहिर्निष्क्रम्येति। इममेवार्थं शाखांतरे चोद्योतरभंग्याश्रुतिरेव
साधयति। तद्ध्यर्यद्न्य ऋत्विजोंऽतःसदसि सोमं प्राश्नंति। अथ कस्मादच्छावाको बहिःसदसि प्राश्ना
तीति। यदेवैतदंतःसदसि पुरोडाशद्रुगवं प्राश्नाति। तेनास्यांतःसदसि सोमः प्राशितो भवतीति।
उपविष्टे वक्त्याग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः। प्रागेव तरेण ता भवेति। यदाच्छावाक उप
विष्टस्तदा त्रक्षातीर्थेन निष्क्रम्य बहिर्वेद्याग्नीध्रीयं प्राप्नोति। आच्छावाकश्च द्रुगवं प्राश्य तीर्थेन
निष्क्रम्यान्यं तं देशं प्राप्नुयात्। इतरे होत्रादयोऽप्युपविष्ट एवाच्छावाकेन तं देशं प्रापिता भवेयुः। एते सर्वे

रा०म०
१४८

संहतास्तस्मिन्देशे हविःशेषं प्राश्नीयुः। सर्वेग्रहणं पौर्णमासिककर्तृनिवृत्त्यर्थं। आग्नीध्रीयं प्राप्येति व
चनं प्राशनस्य बहिर्वेदिदेशत्वे सिद्धे आग्नीध्रीयमंडपस्य बहिर्वेदिदेशप्रापणार्थं। तच्चार्धमंतर्वेद्यर्धं ब
हिर्वेदि भवति। हविरुच्छिष्टशब्देन चात्र धानादीनां शेषमिडापात्रस्थमन्यदप्युच्यते। प्राशनप्रतिप्रसृ
प्य॥७॥ ऋतुयाजैश्चरंति। प्राशने कृते प्राशनवचनमन्यदप्यस्मिन्नेव काले क्षुन्निवृत्त्यर्थं भोजनं दि
कुर्यात्। न प्रागित्येवमर्थं। प्रतिप्रसृप्यवचनं सर्वेषु प्रतिप्रसृप्तेषु ऋतुयाजचरणार्थं। तेषामृतुयाज
संज्ञानां यागानां प्रैषा अपि भवंति। पंचमं प्रैषसूक्तं। प्रैषसमाम्नाये यत्पंचमं प्रैषसूक्तं तदेषां भवंति
। तेन तेनैव प्रेषितः प्रेषितः स स यथाप्रैषं यजति। प्रैषास्तावत्सर्वे मैत्रावरुणेन मंतव्याः। अस्मिं
सूत्रे ऋतुयाज्यानां याज्या यष्टारश्च विधीयंते। येन येन प्रैषेण यथाप्रैषं यो यः प्रेषितस्तेन तेनैव प्रैषे
ण स स एव यजति। नान्यः। तेनैतत्साधितं भवति। मैत्रावरुणयष्टृत्वमिति। होताध्वर्युगृहपतिभ्यां
होतरेतद्यजेत्युक्तः। यजेदितिशेषः। होतरेतद्यजेत्येतेन्ताभ्यामुक्तो होता यजेत्। स्वयं प्रप्रेषस्याहमि।

मृ॰ वृ॰
१४९

पार्ष्टिके षष्टे हनि स्वयमेवाध्वर्युर्गृहपतीयजतः। पश्चादुत्तरवेरुपविश्याध्वर्युः पश्चाद्गार्हपत्यस्य गृह
पतिः। अध्वर्युयजमानश्च निरसनं कृत्वा मंत्रवदेतयोः पश्चादुपविश्य यजतः। पश्चादिति मध्छेनेपु
नः पश्चादिति वचनमन्येषामुपवेशनकालात्पश्चाद्यागकाल एव। उपवेशनं गृहपतेरित्येवमर्थं। अ
ध्वर्यू यजतमिति द्विवत्वयुक्तेपि संप्रैषमुख्य एवाध्वर्युर्यजतिनान्यः। अथैतदृतुपात्रमानंतर्येण वषट्क
र्तारो भक्षयंति। अथेति सर्वेषां वेष्टेषु नंतरमित्यर्थः। अत्र होता चतुर्वषट्कारः। पोतृनेष्टारौ द्विवषट्का
रौ। एकवषट्कारा अन्ये। तत्र सर्वेष्विष्टेषु भक्ष्यमाणे अनेकवषट्कारेण मृषिशेषा विभागात्कर्मेको
लेकाच्चसदृद्वे वभक्षणं प्राप्नोतीति तेनिवृत्त्यर्थमानंतर्येणेत्युक्तं। पृथगध्वर्युः प्रतिभक्षयेत्। अन्ये अध्व
र्युग्रहणं प्रतिप्रस्थातुरपि प्रदर्शनार्थं। अत्रापि तंत्रशंकानिवृत्यर्थं। पृथक्त्वमेव तत्र विधीयते।
इतरत्तनूचते। तस्मिंश्चैवोपहवः। तस्मिन्नेव प्रतिभक्षयितर्युपहवश्च भवति। अवधारणं दीक्षिता
अप्यत्र प्रतिभक्षयितारमेवोपहवं याचेरन्। न दीक्षिता अप्यत्र प्रतिभक्षयितो न्त्सर्वानिति। अ

राम॰
१४९

न्यत्र दीक्षिता दीक्षितान्सर्वानेव॥ ८॥ पराङ्ध्वर्यावावृत्ते सुमत्पदृग्दे पितामानरिश्वाच्छिद्रापदाधाच्छिद्रो
क्थाकवयः शंसन्। सोमो विश्वविन्नीथानिनेषद्बृहस्पतिरुक्थामदानि शंसिषद्वागायुर्विश्वायुर्विश्व
मायुः क इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वानभिहिंकृत्य शोंसावोमित्युच्चैराहूय तूष्णीं शंसं
शंसेदुपांशु सप्रणवमसनन्वन्। पराङिति समन्वर्थे प्रथमाप्रयुक्तो अच्छावाकसूत्राणि भवंतीति १ ऋतुपा
त्रभक्षणानंतरमध्वर्युर्मुखत आसीनः पराङावर्तते। एवं एतः करोतीत्यर्थः। तस्मिन्पराङ्मुखावृत्ते होता
सुमदित्यादिजपित्वाभिहिंकारमकृत्वा शोंसावोमित्युच्चैराहूय तूष्णीं शंसं शंसेदुपांशु सप्रणवम
संतन्वन्। अध्वर्यावावृत्ते इति शस्त्रकालोपदेशार्थं। शस्त्रागमपंजपः। जपित्वेति शस्त्रेण संबंधप्रदर्शना
त्। अनभिहिंकृत्येति प्राप्तोनिषिध्यते। शोंसावेति शंसावेत्यर्थः। स एव प्रणवांतः शोंसावोमिति प
ठ्यते। तेन शब्देनाध्वर्युमाहूय आभिमुखीकृत्येत्यर्थः। अनेनाहूयेति वचनादस्य शस्त्रस्याहावत्वमिति सं
ज्ञा भवति। उच्चैर्वचनं मंद्रस्वरबाधस्यार्थं। शस्त्रांगत्वादाहावस्य शस्त्रस्य च मंद्रस्वरत्वादाहावानंतरवर्तिन। श

147

सू०वृ०
१५०

स्विकरे शस्यो पांशुत्वात्मुख्यानुग्रह न्याये नोपांशुत्वाशंकायां भूयसामनुग्रहात्राप्यपि तु युक्त इति मंद्र॰
स्वरसिध्यर्थमुच्चैरित्युक्तवानाश्वलायनः । पुनराहावः शस्त्वावपवभूतस्य स्तोत्रियादेरेवांगस्य तस्यैव स्वरं भ
जते तेन निषेकवत्त्वेनुवाद्यं स्वरपक्षे आहावस्य स्वरस्यापि विशेषस्वरः सिद्धो भवति । तूष्णींशंस इति
नामधेयं । समप्रणवं समानप्रणवं तूष्णींशंसे ये प्रणवास्ते पठिता अपि संतानार्थिकैर्लक्षणिकैः स
मानास्तिमाभ्रारित्यर्थः । असंततत्वन्निसय्यमप्राप्तप्रतिषेधः । अनुगतत्वात्स्वरस्य चानुक्तानेनन्याय
ते पठितो विप्रणवः संतानार्थी इति । तेन शस्त्रादिना आहावेनोत्तरः संततोवक्तव्यः । अत्र तूष्णीं
शंसस्याहावस्य च स्वरस्थानभेदात्प्राणसंततं भवति । एष आहावः प्रातःसवनशस्त्रादिषु पर्याय
प्रभृतीनां च । सर्वत्र यांतः शस्त्रा एषु स्थानेषु वचनांतरेणक्तायेने विहितेशोंसावोमित्यनेनैष
शब्देनाह्वानं कुर्यात् । नान्येतेति नियम्यते । सूत्रत्रयेण । शस्त्रादिषु प्राप्तिरेव माहूयेति वचनात्सुरोरु
क्तास्तोत्रियत्वात्प्रतिपदाश्विने अंतः शस्त्रे पिस्तोत्रियानुरूपानुचरप्रगाथधाय्यातदनंतरवर्ति

राम०
१५०

सू०वृ०
१५२

शंसः । यद्युवै षट्पदः पूर्वं ज्योतिः शंसेदग्नेवस्येत त्रिपदः षट्पदो वायं शंसतव्यः । त्रिपदपक्षे यथापठितमेव
। षट्पदपक्षे त्रीणि वाक्यानि द्विधाकृत्वा शंसेत्तच्च द्विधाकरणे अवसानस्थानं पूर्वं ज्योतिः शंसेदग्नेवस्ये
दिति । उच्चैर्निविदं यथानिशांतमग्निरेवेद इति । उच्चैर्वचनमुपांश्वधिकारनिवृत्त्यर्थं । निविदिति निविदां
नामधेयं । यथानिशांतं यथा पठितं पदेवसायेत्यर्थः । ऐकश्रुत्यं तु शस्त्रत्वादेव प्राप्तं । नास्या आह्वानं च नि
विदामिसत्त्वपदसमाम्नायनिवृत्त्यर्थं निवित्ग्रहणं कृतं । उत्तराधिकारश्च तत्रास्ति । तच्च निवित्ग्रहणं प
दसमाम्नायनिवृत्त्यर्थं क्षिपमाणमुत्तराधिकारं च निवर्तयितुं शक्नोतीति प्राप्तस्यापमपवादः । निवो
पसंतानः ॥ २ ॥ अस्या निविदस्तूष्णींशंसेन सहोपसंतानानाश्चनकर्तव्यः । तेनासंततत्वन्निति प्रतिषेधस्तू
ष्णींशंसेषु परस्परमेव न पूर्वापरयोरिति । अत आहावेन तूष्णींशंसस्य संतानः सिद्धो भवति रोधात्त्वा
णसंतानः ॥ ३ ॥ सूक्तं । तेउमेन पदेन प्रवो देवायेत्याज्यमुपसंतनुयात् । निविदंत्तमेन पदेन सूक्तमुपसं
तनुयात् । अन्त्यत्वादिदं विधीयते । आज्यमिति सूक्तः कस्यैतत्स्थानापन्नस्य नामक्रियते । एतेन निवि

राम०
१५२

सू०वृ०
१५१

वर्तिन्याहावेऽयं नियम्यते। तेन शस्त्रमध्येऽपि मेव स्यात्। शस्त्रादावयं वा स्यात् ब्राह्मणोक्तः। शंसामोदै
वोमिति वा। स्तुतादिः प्रणवेऽस्तुतादिरवसाने। अवहितस्य लोपो विशेषविधौ। अनंतरस्य प्रणवावसान
रूपेण विषयभेदासंभवात्। प्रणवे प्रणवे आहावोत्तरः। स्तुतादेरयमपवादः। आहावोत्तरे प्रणवे प्रणव
एव प्रतिगरो भवति। अवसाने च। प्रणवः प्रतिगरो भवतीति शेषः। शस्त्रादौ शस्त्रमध्ये चावसानेऽप्ययं वि
धिर्भवति। प्रणवान्तो वा। विषयद्वयेऽयं विकल्पः। यत्र यत्र चान्तः शस्त्रं प्रणवेनावस्यति प्रणवान्त एव तत्र
प्रतिगरः। शस्त्रान्ते तु प्रणवः। पूर्वोक्तस्य प्रतिगरद्वयस्य विषयमवस्थापनमात्रमत्र क्रियते। ननु यद्य
यमर्थो विवक्षितः स्यात् तदैवं प्रणेतव्यं स्यात्। अवसाने चेत्यादि सर्वमकृत्वा शस्त्रान्ते चान्तःशस्त्रे प्रणवा
न्त इति प्रणेतुं युक्तं। सत्यमेव प्रणेतुं युक्तं। तथाप्येवं प्रणीतवानाचार्यः। किं कुर्मः। एवं सति प्रणीतम
नुसरामः। तत्र यदि पूर्वसूत्रे अवसानशब्दं समाप्तिवचनं अभ्युपगम्य द्वाभ्यां सूत्राभ्यां शस्त्रान्ते विक
ल्प उक्तः। उत्तरेणान्तःशस्त्रे प्रणवान्तविधिः कल्प्येत तदा शस्त्रान्ते तु प्रणव इत्यतिरिच्यते। अथ स तु प

रा म०
१५१

त्रेत्यादिसूत्रे वस्यतिशब्दसंबंधात्कर्मचोदनायां होतारमिति होतृविषयमिदं सूत्रं पारिशेष्यात् पूर्वोक्तविहो
त्रकविषय इति। तदपि नोपपद्यते अवस्यतीत्यत्र विधानाभावात्कर्मविशेषोऽस्तीति सा परिभाषा न कर्मानुवाद
इति। अतः पूर्वोक्त एवार्थः। यत्र यत्रेत्यादि प्रपंचोक्तिश्चैवमेवेति सूचयति। अत्र संक्षेपविस्ताररूपेण प्रपंचो
क्तिरेवाभिन्ना सूत्रकारेणेति। प्रतिगरस्य शस्त्रसमकालत्वादाहावस्य च द्विवचनयुक्तत्वात् प्रतिगरशब्दवा
च्यत्वाच्च कर्त्रंतरमस्यान्वेषणीयं। तत्राध्वर्युरेव भवति। पाराङ्ध्वर्यावि सेवाधिकारात्सर्वत्र चाध्वर्युरेवेशो
भवति। शंसामोदैवोमित्यध्वर्युः प्रतिगृणातीति दर्शनात्। शंसावाध्वर्यो प्रतिमे गृणीहीति च दर्शनात्
सवनान्तरे च अध्वर्यो शोंसावोमित्याहावादिदर्शनात्। अत्राध्वर्युशब्दः प्रतिप्रस्थातुरपि प्रदर्शना
र्थः। गृहीम एतत्। किमित्याध्वर्युरेवमत्र विधीयते। शस्त्राङ्गत्वात् शस्त्रस्य च ऋग्वेदविहितत्वात् तस्याप्या
र्ग्वेदिकत्वमेवेति। अध्वर्युकर्तृकत्वं तु वचनानन्यमाख्यानमिति सिद्धं। प्रतिगरस्वरूपमुक्त्वा शस्त्रमेवानुस
रति। भूरग्निर्ज्योतिरग्निः। इंद्रो ज्योतिर्भुवो ज्योतिरिंद्रः। सूर्यो ज्योतिर्ज्योतिः स्वः सूर्य इति त्रिपदस्तूष्णीं

सू०वृ०
१५२

शसः। यद्युवै षट्पदः पूर्वे ज्योतिःशस्त्रे रग्नेवस्येत त्रिपदः षट्पदो वायं शंस्तव्यः। त्रिपदपक्षे यथपठितमेव
। षट्पदपक्षे त्रीणि वाक्यानि द्विधाकृत्वा शंसेत न च द्विधाकरणे अवसानस्थानं पूर्वे ज्योतिःशस्त्रे रग्नेवस्ये
दिति। उक्थे निविदं यथानिशांतमग्निर्देवेद्धइति। उक्थे वचनमुपांभ्वधिकारनिवृत्त्यर्थं। निविदिति निविदां
नामधेयं। यथानिशांतं यथा पठितं पदे वसाये त्यर्थः। एते कृष्णस्यं तु शस्त्रस्तादेवमायं। नास्या आह्वानं च नि
विदामि सत्रपदसमाम्नायनिवृत्त्यर्थं निवित्ग्रहणं कृतं। उत्तराधिकारश्चत्रास्ति। तच्च निवित्ग्रहणं प
दसमाम्नायनिवृत्त्यर्थं क्रियमाणमुत्तराधिकारं च निवर्तयितुं शक्नोतीति प्राप्तस्यापमपवादः। निवो
पसंतानः ॥२ अस्यां निविदः सूक्तशंसेन सहोपसंतानान्यनकर्तव्यः। तेनासंतत्वन्निति प्रति षेध सू
क्तीशंसेषु परस्परमेव न पूर्वापरयोरिति। अत आहा वेन तू सूक्तीशंसस्य संतानः सिद्धो भवति रोधास्या
णसंतानं नइ त्सुक्तं। तेउ मे न पदेन मवो देवा ये त्याज्यमुपसंतनुयात्। निविदन्तमे न पदे न सूक्तमुपसं
तनुयात्। अनूक्ता दिदं विधीयते। भाज्यमिति सूक्तस्यैतत्स्थानापन्नस्य नामक्रियते। एतेन निवि

राम०
१५२

दः संतीति ज्ञापनार्थं। तेन देवेद्धो मुनिर्निवृद्धइत्यादीनां चतुर्दशानां पदानां निवित्वं सिद्धं भवति। सर्वे च द
समाम्नायाः। अन्ये चैन शपलापोरमोयेपदशआम्नातामंत्रास्तेनि विद् देव शंस्तव्याः। निविदामपि पद
शआम्नाने सत्यपि निविदर्थक ग्रहणं निविसुक्तं चिसदसमासोस्तीति ज्ञापनार्थं। इंप्रे इंद्र इप्रेदं
क्षत्रमित्यादौ। उपसंतानस्त्वन्यत्र। अस्यां निविदोन्यासु निवित्सु पदसमाम्नाये षु च पूर्वेणोपसंतानश्च
कर्तव्यः। आह्वानं च निवित्ग्रहणं पदसमाम्नायनिवृत्त्यर्थं। आह्वानं चान्यासु निवित्सु भवति। आज्यायां त्रि
ःशंसेदर्धर्चशो विग्राहं दंत्रिर्वचनं शस्त्रादौ मा तं सूक्तादौ नियम्यते। आज्यग्रहणं सूक्तायां निवृत्त्य
र्थं। तेन पत्रहे सूक्ते त्रीणि वा आज्य कार्ये विहितानि तत्रान्यस्यैवाद्यां त्रिःशंसेन्नोत्तरस्यां स्येवमर्थं। अर्ध
र्चेत्राइत्यृगावान पक्षे त्वर्धर्च संतानं निवृत्त्यर्थं। विग्राहं विगृह्येत्यर्थः। क्व विग्राहः कथं वा विग्राह इत्येवं।
निदर्शनेन दर्शयितुमाह। तन्निदर्शयिष्यामः। प्रेवो देवायाग्नये। बर्हिष्ठमर्चास्मै। गमद्देवेभिरासन्नोयजिष्ठो
बर्हिरासदो३मिति। विग्रहे प्राणसंतानः कार्यः। पूर्व स्मिन्ने वा र्धर्चैस विग्रहो भवति। ऋगावानं वै वमेव।

सू०प्र० एतेनाद्याः प्रतिपदामनृगाणानां। प्रतिपदां या आद्या ऋचस्ता एतेन प्रकारेण शंस्तव्या। प्रतिप
१५३ द्वित्वे प्रतिपदामिति बहुवचनं ज्योतिष्टोमाभ्याससूचनार्थं। तथा प्रथमयज्ञे नैकेषमित्यत्र प्र
थमशावरुलवीमेवार्थं सूचयति। तथा शाखांतरेस्पष्टं वचनमस्ति। वसंते वसंते ज्योतिष्टोमेन यजे
तेति तत्र वीप्सया भ्यासोवगतः। तदाश्रयोयं बहुवचनप्रयोगः। अन्यत्र ऋगाणानवर्जनमि
ति। प्रतिपच्छब्दोयं प्रतिपत्संज्ञितं तृचमेव गृह्णाति न यौगिकं। तेनाश्विनप्रत्ययं धर्मो न भवति
। अनु ब्राह्मणं वानुपूर्व्यं। ब्राह्मणोक्तस्य क्रमस्य ऋक्त्वर्थत्वात्समाम्नाय सिद्धस्या ऋक्त्वर्थत्वात्समा
म्नायसिद्धस्य प्रयोगो न प्राप्नोतीति तस्यापि विकल्पेन प्रयोगसिद्ध्यर्थमिदं सूत्रं। आहूयो
न मया परिदधाति॥ उत्तमाया ऽपरिधानीयात्वे सिद्धे सत्युत्तमावचनं याज्यांतानि शस्त्राणी
त्यस्यार्थस्य पुच्यमानयाज्यायाउत्तमत्वभ्रांतिं जनयतीति तद्भ्रांतिनिवृत्त्यर्थं। सर्वशस्त्रपरिधा
नीयासेवं। सर्वासु शस्त्रपरिधानीयासु आहूय परिदध्यात्। परिधानीयास्विति बहुवचनेने रा०म० १५३

वसर्वत्वे सिद्धे सर्वग्रहोत्रकपरिग्रहार्थं। उक्थं वा विघोषायते ति शस्त्वा जपेत्। अग्नइंद्रश्च दाशु
षोदुरोणे इति याज्या उक्थपात्रमग्नेभक्षयेत्। उक्थशस्त्रं शस्त्रसंबंधि तयाकश्चिद्ग्रहो गृह्यते॥
शस्त्रयाज्याया हूयते च। तच्छेषवत्त्वात्तत्तदुक्थपात्रमित्युच्यते। तस्य भक्षणं वषट्कारनि
मित्तत्वात्तद्विधेयं। तदत्र क्रमार्थं विधीयते॥ इति। ततश्चमसांश्चमसिनः सर्वशस्त्रेयाज्यांतेषु
। ततश्चमसांश्चमसिनो भक्षयेयुः। सर्वेषु शस्त्रयाज्यांतेषु। भक्षणं चक्रमश्चात्र विधीयते भक्षणे
नमत्कृतैं नैवसामाख्यायाः प्रवृत्तिनिमित्तसंभवाद्वचनादृते भ्यासो नास्तीति भक्षविधानं। सर्वश
स्त्रयाज्यास्विति वक्तव्ये सति अंतवचनमाश्विनस्य शस्त्रस्यायाज्याभावात्तदंते चमसभक्षणं न प्रा
प्नोतीति तत्संग्रहार्थं। तेनायमर्थः। सर्वे शस्त्रयाज्यासु भक्षयेयुः। सर्वशस्त्राणामंते चेति। सर्वश
स्त्राणां याज्यानां चांता। सर्वशस्त्रयाज्यांता इति विग्रहः। नन्वप्तोर्यामे आश्विनशस्त्रमंते न भवति।
सत्यं। नांत। तथाप्यतिराचस्त्विहेसतिराचातिदेशात्तत्रचमसंभक्षणंभवत्येव। सर्वग्रहणं होत्र

(151)

सू०वृ०
१५४

कशास्त्रपरिग्रहार्थं।एवं सर्वत्र चमसभक्षणविधानाद्यत्रौ वैश्वे पात्रपश्मि तत्र तद्भक्षयित्वा चमसानां
भक्षणं।अन्यत्र चमसानामेवेति गम्यते।वषट्कर्तैकपात्राण्यादित्यग्रहसावित्रवर्जं।आदित्य
ग्रहसावित्रग्रहयोर्वषट्कर्तुर्भक्षो नास्तीत्येतावदत्र विधीयते।अन्यदनूद्यते प्राप्तत्वात्प्रासंगिकं
चेदं सूत्रं॥९॥स्तोत्रमग्ने शस्त्राद्भवतीति शेषः।शस्त्रकालपरिज्ञानमनेन क्रियते।उद्गाता तु हिंकारं
प्रातःसवन आह्वयीरन्।एषेति श्लोके प्रस्तोत्राय उद्गाता तु हिंकारस्तस्मिन्काले प्रातःसवने शस्त्रा
याह्वयीरन्।बहुवचनं होत्रकशास्त्रसंग्रहार्थं।प्रातःसवनग्रहार्थं प्रातःसवनग्रहणं होत्रकपरि
ग्रहार्थं।प्रतिहार उत्तरयोः सवनयोः।एषेति श्लोकेयं प्रतिहारस्तस्मिंनुत्तरयोः सवनयोराह्वयीरन्।
वायुरग्रेगा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्यास्त्वस्या उपरिष्टात्तृचं तृचं शंसेत्।एताः सप्त पुरोरुचा
नामर्चस्तासामेकैकस्या उपरिष्टादेकैकं तृचं शंसेत्।सप्तवचनं पष्ठ्याः सप्त पदत्वसिध्यर्थं।वायवाया
हि दर्शतेति सप्त तृचाः।सप्तवचनं सप्तानां तृचानां ग्रहणार्थं इतरथा पादग्रहणादेकैव ऋग्यथास

रा०म०
१५४

प्त तृचा भवेयुः।तथाभ्यासितव्यास्युस्तस्मात्सप्तवचनं द्वितीयां प्रउगे त्रिः।प्रउगमिति शास्त्रसंज्ञा।अस्मिंश्च।
स्त्रे प्रकृतिभागं यदाद्यायास्त्रिर्वचनं न द्वितीयायां नियम्यते न त्रिर्वचनानन्तरमपूर्वविधीयते।पुरोरुग्भ्य
आह्वयीत षष्ठ्यां त्रिरवस्येदर्धर्चौ विश्वान्देवानित्येषा षष्ठी सा सप्तभिः पादैरेकोनतैः सप्तभिः पादैर्द्वे अनु
ष्टुप्गायत्र्याविति सप्तानां पुरोरुचामित्यत्र सप्तग्रहणे नोक्तं।आतोऽर्धर्चमित्यनेनार्धर्चशंसनमित्युक्तं।
।अर्धर्चाश्च द्विप्रकाराः।समाम्नायसिद्धा लाक्षणिकाश्च।समाम्नायसिद्धाः प्रतिद्धाः।ऋचोऽर्धर्चमर्धर्चमि
ति लाक्षणिकाः।तत्र कथमर्धर्चशः शंसनमिति शंसयेत निर्णयार्थं षष्ठ्यां त्रिरवस्येदर्धर्चे अर्धर्चे इत्युक्तं
।तेनास्यामृच्यवसानत्रयविधानात्समाम्नायसिद्धा एवार्धर्चाः सूत्रकारेणार्धर्चशंसने परिगृहीता इ
ति ज्ञायते।एतत्सर्वासां विषमपदावसानानां प्रदर्शनार्थमुक्तं।उत्तमां न शंसेच्छंसेत्केवलं तृचं आह्वानमश
सने।उत्तमायाः पुरोरुच अशंसने।उत्तमे तृच आह्वानं कर्तव्यं।माधुच्छंदसं प्रउगमित्येतदाचक्षते।अत्रा
यं प्रउगशब्दः कृत्स्ना वा स्यपि तृचापेक्षया प्रयुक्तः।एवमन्यत्रापि यत्र ऋषिच्छंदोऽन्यां प्रउगं विशिष्यते तत्र
तृचापेक्षमेव न पुरोरुग्भिः तृतसर्थमिति द्रष्टव्यं।उक्तं वा-विश्वोकायन्तेति शास्त्राजपद्धिर्भिः सोम्यमध्वि

(152)

सू०श्रौ०
१५५

तियाज्या मन्त्रास्ताश्च समाणं छंदस्य छावाकइति शस्त्रिणो होत्रकाः। होत्रकाणाम ध्येएते शस्त्रवंतः। एतेषां
शस्त्राणि भवंतीत्यर्थः। एते शस्त्रिणइत्युक्तं कृतेषां शस्त्राणि भवंति किंरूपाणि च तेषां शस्त्राणीत्येतदुभ
यं वक्तुमाह। तेषां चतुराहावानि शस्त्राणि प्रातःसवने तृतीयसवने पर्यायेष्वतिरिक्तेषु चाराणुस्थाने ष्वितेषां
शस्त्राणि भवंतीति। तानि चतुराहावानीत्येतदुभयं विधीयते। पर्यायातिरिक्तानां तृतीयसवने सत्स्वपि पृथ
ग्ग्रहणमुक्थशास्त्रेभ्योन्यानितेष्वपि शस्त्राणि भवेयुरित्येवमर्थं। अतिरिक्तेष्विति बहु वचननिर्देशोत्ता
र्यामातिरिक्तेष्वेव भवंति। न वाजपेयातिरिक्ते। तत्रैकत्वाद् वाजपेयातिरिक्तस्येति। पंचाहावानि माध्यंदिने। अ
त्रापि पूर्ववदुभयं विधीयते। आहावपरिमाणवचनं निमित्ताधिक्येपि एतेषामेतावत्त्वसिध्यर्थं। इदा
नीमाहावस्य निमित्तानि प्रसंगादुच्यंते। स्तोत्रियानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्य
इति परिभाषितं। एतेभ्यः सर्वेभ्य आहावः कर्तव्यः। एतेषां बहूनां संनिपाते पृथक्पृथक्कर्तव्यः। इत्येत
दुभयमत्र विधीयते। सर्वत्र यदर्थं तेषा आहावो विधीयते तस्यादौ स कर्तव्यः। होतुरपि। होत्रकाणाम
धिकारद्धोतुर्ग्रहणं। होतुरपि एतेभ्य आहावः कर्तव्यः। तेभ्यश्चान्यदनंतरं। होतुरपीत्यत्राप्यनुवर्तते

रा म०
१५५

७३

। स्तोत्रियादिभ्योऽनंतरं यत्पत्नीकं तथापि होतुर्होतुर्होत्रकाणां चाहावः कर्तव्यः। आदौ निविद्धानीयानां सूक्ता
नां अनेकं चेत्प्रथमेष्वाहावः। निविद्धानीयसूक्तस्य चादौ भवति। तस्यानेकत्वे प्रथमएवाहावः। निविद्धानीय
कार्यमाहावस्य निमित्तं न सूक्तस्य स्वरूपं। आपो देवतमदेवमित्यर्थः। स च आग्निमारुतन्त्रापोहिष्टेति तृ
च उच्यते। न चाचाहावः कर्तव्यः। तेषां तृचाः स्तोत्रियानुरूपा शस्त्रादिषु सर्वत्र। तेषामधिकारेपुनस्तेषा
मितिवचनमस्मिंत्सूत्रे सर्वार्थोपि कश्चिद्विधिरस्तीति प्रदर्शनार्थं। तेन तृचाः स्तोत्रियानुरूपाः सर्वत्रैसे
कोर्थः सर्वार्थः। अपरश्च तेषां शस्त्रादिषु ये आदेशास्ते स्तोत्रियानुरूपास्तेष्वाहावः कर्तव्यइति व्यवहित
योजनया भवतीत्यर्थः। माध्यंदिने प्रगाथास्तृतीयाः। माध्यंदिने तेषामेव शस्त्रेषु ये तृतीया आदेशा
स्ते प्रगाथा वेदितव्याः। यथाग्रहणमन्यत्। अतोन्यत्सर्वं यथाग्रहणमेव वेदितव्यं। प्रगाथइत्युक्ते प्रगाथ
ः प्रगाथस्तोत्रियइत्युक्ते स्तोत्रियो भवति नान्यथेति। याज्यांतानि शस्त्राणि। यत्र बहूनां शस्त्राणामृचा
आम्नायं तेयाज्याश्च विधीयंते तत्र क्रियदेकं शस्त्रमिसेन्नत्तं शमनिरूढसर्थमेतदुच्यते। अन्यदपि प्रयोज
नमस्ति यच्छस्त्रार्थं वाग्यमनं विहितं तद्याज्यापर्यंतमनुवर्ततइति। उक्थवाचातेषां शस्त्राजपः प्रातःस

153

सू०वृ०
१५६

वने।प्रातःसवने।वचनं विस्पष्टार्थं।ऊर्ध्वं च षोळशिनः सर्वेषां। षोळशिनऊर्ध्वं यानि शास्त्राणि तेषु पमेव शस्त्राजपः।सर्वेषां भवति।सर्वं च नं होतुरपि प्रापणार्थं।उक्थं वाचीत्यायेति माध्यंदिने उक्थं वाचीत्यायदेवेभ्यइत्युक्थेषु सषोळशिकेषु।उक्थ्येषु षोळशिनि चायं भवतीत्यर्थः।उक्थ्यानीति तृतीयसवने होत्रकशस्त्राण्युच्यंते।अनंतरस्य पूर्वेण।यत्रानेकपदार्थाः क्रमवर्तिनः स्युरेकरूपास्तत्र यदि तेषां कस्यचिद्धर्माकांक्षा स्यात्तदा तेषामेवानंतरेण पूर्वेण धर्मविधिर्वेदितव्यः।किमुदाहरणं।तृतीयसवने पुरोरुक्शस्त्रायुक्तमित्युक्तं।तत्र माध्यंदिनविधिर्भवति।तथा सोमातिरेकशास्त्रेऽनंतरस्य यः शस्त्राजपः सभवतीत्येवमादि द्रष्टव्यं।स्तोत्रियेणानुरूपस्य छंदः प्रमाणलिंगदेवता नि।छंदो गायत्र्यादि प्रमाणमेकस्मिन्नपि छंदस्यूनाधिकाक्षरता लिंगं आवती प्रवती त्येवमादि दैवतं प्रसिद्धं स्तोत्रियस्य यान्येतानि तान्येवानुरूपस्येत्यर्थः॥आर्षं वैके।एक आचार्या आर्षं च तदेवेच्छंति।आ नो मित्रावरुणा नो गंतं रिशादसा प्र वा मित्राय प्र मित्रयोर्वरुणयोरिति न वायातं मित्रावरुणेति याज्या या हि तद् इति षट् स्तोत्रियानुरूपा वनंतराः सत्वं इत्ता वृषभमुद्दे दभोतीति तिस्र इंद्र क्रतुविदं सुतमिति याज्यैंद्राग्नी आ गतं सुतमिंद्राग्नी अ

राम०
१५६

पसस्परि।तो शाक्रत्रहणाद्ववइनिति तिस्र इहेंद्राग्नी उपेयं वामस्य मन्मन इति न वेंद्राग्नी आ गतं सुतमिति याज्या। अत्र मध्ये आ याहि सुषुमा हित इति षट् स्तोत्रियानुरूपा इत्यत्र षट्ग्रहणा।मा सां क्रत्वां या सुका सुविद्य दिछंदोगाः स्तुवीरन् तदानंतिस्रभिरेव स्तोत्रियं कृत्वा शिष्टाभिरनुरूपः कर्तव्य इत्येवमर्थं॥१०॥ संस्थितेषु सवनेषु षोळशिनि चातिरात्रे प्रशास्तः प्रसुहीत्युक्तः सर्पतेति प्रशास्ता तिसृजेद्धोता दक्षिणेनौदुंबरीमंजसेनरे परयाद्वारोत्तरां वेदिश्रोणीमभि।निःसर्पति।सवनेषु संस्थितेषु मध्ये चातिरात्रे षोळशिनि समाप्ते अतिरात्रविशेषणमतिरात्रेयः षोडशी तस्मिन्नेव समाप्ते न वाजपेय षोडशिनीत्येवमर्थं।एतेषु चतुर्षु कालेषु होता दक्षिणेनौदुंबरीं गत्वा इतरे च स्वस्य धिष्ण्यास्यांजसा आर्जवेन गत्वा सर्वेऽपरया द्वारा निष्क्रम्य उत्तरां वेदिश्रोणीमभि निःसर्पंति।तया श्रोण्या बहिर्वेदि प्राप्नुयुरित्यर्थः॥तत्र यस्मिन्काले यद्य ध्वर्युः प्रशास्तः प्रसुहीति ब्रूयात्तदा प्रशास्ता सर्पतेति ब्रूयात्ततो निःसर्पणं कुर्युरेषे व काले ष्वप

१५५

ना०ह०
१५७

यद्यस्मिन्काले ब्रूयात्तदा प्रसृति सर्जनमेव न निःसर्पणमस्मदीयानामिति। यद्यध्वर्युर्न ब्रूयात्
प्रशास्तापि नातिसृजेत् तेष्वपि कालेषु न तैर्न निसृष्टा एव निःसर्पेयुः। सर्वथा तावदेतेषु काले
ष्वतिसृष्टा अनतिसृष्टा वा अस्मदीया निःसर्पेयुरेव नान्यस्मिन्काल इति स्थितं। तृतीयसवन
समाप्तिरभिशस्त्रसमाप्तावेवास्माकं न हारियोजनान्ते पत्नीसंयाजान्त इति स्थितं। पुनःसद
सः प्रवेशप्रयोजनाभावात्सवनसंस्थासु निःसर्पणस्य सदः प्रवेशपर्यन्तत्वादिति। मृगतीर्थ
मित्येतदावश्यते। सव्यवहाराभावेपि संज्ञायां नित्यत्वात्परिज्ञानार्थमुपदेशः। एतेन निष्क्रम्यप
यथार्थेन त्वेवान्यन्मूत्रेभ्यः। अतीर्थेन निष्क्रान्तानां बहिःस्थानमपि प्राक्चेष्टादयो नियथासं
भवमनुवर्तत इत्युक्तं। प्राकदने न निष्क्रान्तानां नास्तीत्येवमर्थं यथार्थवचनं। यथार्थवचनात्स्वे
रकर्माण्यपि प्रसज्येरन्निति तन्निवृत्त्यर्थं न त्वेवान्यन्मूत्रेभ्य इत्युक्तं। तेन यदावश्यकं तावन्मात्र
मेव भवति। अतो नान्यदिति। आवश्यकमपि यत्तत्तीर्थ्यप्राप्तो साधूर्ध्वं कर्तुं शक्यते न तदनेन निष्क्रम्य

रा०म०१
१५७

स्यपर्यन्तं संवेमर्धवेशास्यं भवतीत्यर्थः। सर्वेवचनात् प्रकृतौ च विकृतौ च निष्ठुवादीनि पंक्ति
वोतिच्छन्दो नकर्तव्यानि। तीर्थेनैव निष्क्रम्य तादृशं कुर्यात्। अनेन निष्क्रम्यशाम्यात्प्रासात् परस्तान्न
गच्छेयुरिति वचनात्। एतेन निष्क्रम्य कृत्वोदकार्थं वेषां समस्तानुपस्थाय अपरयाद्वारा नित्यया
वृत्ता सदो द्वार्ये चाभिमृश्य तूष्णीं प्रतिप्रसर्पन्ति। एत इति निष्क्रान्ताः निर्दिश्यन्ते। एते निष्क्र
मणानन्तरं यत्किंचिदुदककार्यमस्ति चेन्न कृत्वा नास्ति चेदकृत्वा वेदिं प्रविश्य वेद्यां यधि।
ष्ण्यास्तेषां समस्तोपस्थानं कृत्वा उपस्थितांश्चानुपस्थितांश्चेत्येतत्कृत्वेत्यर्थः। अपरयाद्वा
रानित्यया वृत्ता सदो द्वार्यं चाभिमृश्य तूष्णीं प्रसर्पन्ति। कृत्वोदकार्थमित्यत्र न विधीयन्ते यथा
प्राप्तमनूद्यते। एषा हस्तसर्पन्तेति वचनो। सर्पन्तेति वचन इत्यनेन पूर्वोक्ताश्चत्वारः कालाउ
च्यन्ते। तेषु तस्य वचनस्य संभवात्। अतस्तेषु सर्वेषु य एष उक्तः प्रयोगो निःसर्पणादिः प्रति
प्रसर्पणान्तः स कर्तव्यः। न केवलं प्रातःसवनं न एवेति। पूर्वे यैव गृहपतिः। यजमानस्तु पूर्वये

155

ना०टी०
१५८

वह्वारा प्रतिप्रसर्पणं कुर्यादेकाहाहीनेषु गृहसत्रेषु गृहपति॥ ११॥ एतस्मिन्काले ग्रावस्तुत्प्रपद्य
ते। अस्याप्यस्मिन्नेव काले प्रपदनं प्रातरनुवाककालइत्यछावाकेनतुल्यं। तस्योक्तमुपस्थानं।
अस्यापि पूर्वोक्तामुपस्थानं प्रसर्पणं च भवति तत्र विशेषमाह। पूर्वया द्वारा हविर्धाने प्रपद्याद
क्षिणस्य तु हविर्धानस्य प्रागुदग्गुतस्य पक्षशिरस तृणं निरस्य राजानमभिमुखो वतिष्टते। प्रसर्प
णमेवात्र प्रपदनमित्युच्यते। असौ तु हविर्धानं पूर्वया द्वारा प्रपद्यते पूर्ववदेवा। हविर्धानेइ
ति द्विवचनं शालायामेवोपचारात्। शकटद्वयसंबंधादुपचारः। हविर्धानशब्दः शालायामपि मु
ख्य एव योगस्याविशिष्टत्वादुभयोस्तत्प्रपद्य दक्षिणस्य शकटस्य यदुत्तरमेक्षशिस्तस्य प्रागुद
ग्योदेशस्तस्मिन्मंत्रेण निरसनं कृत्वा तत्र राजानमभिमुखस्तिष्टेत्। दक्षिणामुखः प्रत्यग्दक्षि
णामुखो वा। नात्रोपवेदेशने। निरसनोपवेशनयोः सहचर्यप्रदर्शनार्थं।ॐ प्राग्ने तत्रएवोपवे
शनमंत्रः प्रतिषिध्यते। यो अद्य सौम्य इति तु। उपविष्टस्य विहितत्वात्तिष्टतो न प्राप्नोतीति विधीय

रा०म०
१५८

ते। अथास्मा अध्वर्युरुष्णीषं प्रयच्छति। उष्णीषं शिरसो वेष्टनं वासः। तदंजलिना प्रतिगृह्य त्रिः प्र
दक्षिणं शिरः समुखं वेष्टयित्वा यदासौ मा भून्न भिषवाय व्यपोहं त्यथग्राव्णोभिष्टुयात्। यदा सो
मलता अभिषवार्थं अध्वर्यवो व्यपोहंति विक्षिपंति नदा ग्राव्णामभिष्टवनं कुर्यात्। मध्यमस्व
रेणेदं सवनं। इदमादीदं माध्यंदिनं सवनं मध्यमस्वरेण प्रयोक्तव्यं। इदं ग्रावस्तोत्रमारभ्य मा
ध्यंदिनं सवनं संवर्तते। तत्र स्वरग्रहणं बाधकबाधनार्थं। बार्हस्पत्ये हि सोमामिका इति प्रधाना
पांशुत्वं प्राप्तं तस्य बाधनार्थं। तेन तस्यामिष्टौ प्रधानमपि मध्यमस्वरेण भवति। अभित्वादे
वसवितः। युंजते मन उत युंजते धिय आ तू न इंद्र क्षुमंतं पांचिदन्य द्विशंसनं प्रेते वदंत्वित्यर्बुदं
। एतत्सूक्तमर्बुदनामधेयं भवति। प्रागुत्तमाया। आवर्कृं जसे प्रवो यावाण इति। सूक्ते आवपतेति
शेषः। अर्बुदस्य प्रागुत्तमाया इत्युर्थः। सूक्तयोरंतरोपरिष्टात्पुरस्ताद्वा यावमानीरोप्य यथार्थमा
वाग्रहणं ग्रहणाच्छिष्टया परिधाय वेष्टां यजमानस्योष्णीषं। सूक्तयोरुपरिष्टात्पुरस्ताद्वेति संबं

ना०वृ०
१५९

धः॥ सृक्ते द्वे त्येध्यात्तस्य अंतरशब्देन संबंधः॥ त्रयाणामन्यतमस्मिंस्तृचे पावमानी रावयेत यथार्थं
यावत्प्रयोजनमित्यर्थः॥ यावदभिषवमिति तदारभे आरंभविधानात्तत्रैव ग्नावणां व्यापारस
भावात्॥ अस्य च ग्नावस्तोत्रत्वादिति॥ आग्नहग्नहणाद्ग्नावस्तोत्रांतर्भावे पि पावमानीनां पूय
मानसोमाभिधानात्। सं पूयमानः सोमस्तावंतं कालमनुवर्ततइति द्रष्टव्यमुच्यते॥ शिष्टयार्बुदे
स्योत्तमया परिधाय वेदं यजमानस्योष्णीषं यजमानाय दातव्यमित्यर्थः॥ आदाय यथार्थं मंत्रे
षु हः स्नु॥ यजमानाय दत्तेन तस्यार्थं प्राप्तमुच्यते नाप्राप्तं विधीयते॥ अनेन सूत्रेदानमप्युत्तरहस्ता
द्धस्तांतरसंक्रमणमात्रं यजमानस्यैव तत्त्वमिति॥ प्रतिप्रयच्छेदितरेषु॥ अनंतरेषु ग्रहः सु येनेदं
दत्तं तस्मा एव पुनः प्रयच्छेदिति प्रतिशब्दसंबंधादवगम्यते॥ अथापरमभिरूपं कुर्यादिति गा
णनारिः॥ आपरमिति अपरमिदं ग्नावस्तोत्रं न पूर्वमित्यर्थः॥ प्रकृताविदं न प्रवर्ततइति
भिन्नविषयत्वादपरशब्दप्रयोगो युक्तः॥ कार्यविशेषे तल्लिंगस्य विधानादेवाभिरूपते सिद्धे अ

राम०
१५९

भिरूपवचनं कार्यव्यत्यासेत्व सर्वस्यासमसिध्यर्थं॥ गाणगारिवचनं पूजार्थं॥ आप्यायस्व मे
तु न इति तिस्रो मृजंति त्वा दश क्षिपः एतमु त्यं दश क्षिपो मृज्यमानः सुहस्त्यादशभिर्विवस्वतो दु
हंति सप्तैकाम धुक्षत्प्रियं पुषीं मिषमा कलशेषु धावति पवित्रे परिषिच्यतइत्येका कलशेषु धा
वति श्येनो वर्म विगाहत इति द्वे॥ एतासामर्बुदस्य चतुर्थ्या उद्धृत्य तृचानेषु तृचानेषवदध्यात्॥
एता द्वादश ऋचो नु क्रांतास्ताश्चत्वारस्तृचा भवंति अर्बुदस्य चतुर्थ्या उद्धृत्तव्या उत्तमा परिधा
नीया शिष्टा द्वादश ता अपि चत्वारस्तृचा भवंति॥ एतासां पावमानीनां तृचानेषु अर्बुदस्य तृ
चानवदध्याद्विपरीतं वा॥ अत्र विशेषो न शक्यते वक्तुं दुरवगमत्वात्॥ आप्यायमाने प्रथमं॥ आ
प्यायनमुदकसेकः॥ मृज्यमाने द्वितीयं॥ मार्जनं चूर्णमादाय हस्ताभ्यां पेषणं॥ दुह्यमाने तृती
यं॥ दोहनं प्रसिद्धं॥ आसिच्यमाने चतुर्थं॥ आसेचनमभिषववद्वी कृतस्याधवनीये संभरणं॥ द्व
द्वहछद्वे द्वह छद्वे चतुर्थं॥ निमित्तावृत्त्यर्थं वीप्सावचनं॥ माचिदन्यद्विशंसतेति यदि ग्नावाणः

६२

ना०वृ०
१६०

संक्रंदिरन्। संक्रंदनशब्देन। अत्रापि निमित्तावावृत्तिरस्ति। अस्या ऋचो निमित्ताभावेपि प्र
योगः स्वस्थाने चतुर्थ्या वचनादिदमवगम्यते। समानमन्यत्। अर्बुदपावमानीभ्यो न्यत्सर्वं
समानं भवतीत्यर्थः। अर्बुदपावमानीभ्यो न्यत्सर्वं समानं भवतीत्यर्थः। अर्बुदमेवेत्येके। अ
वधारणादिदमेव सूक्तं नान्यत्किंचित्। प्रयोगना वा ण इत्येके। अत्राप्यवधारणं इष्टव्यं। उक्तंस
र्पणं प्रसर्पणमत्र कर्तव्यमित्यर्थः। स्तुते माध्यंदिने पवमाने विहृत्यांगारान्॥ १२॥ दधिघ
र्मेण चरंति प्रवर्ग्यवांश्चेत्। अंगारविहरणवचनेन तत्कालपरिज्ञाने तद्व्यवायपरिहारे च
लकरणार्थे। दधिघर्मो नाम कर्मविशेषः। तेन चरंति प्रवर्ग्यवांश्चेद्यं क्रतुः। न चेन्न कर्तव्यो द
धिघर्मः। तस्योक्तं मृगावां न घर्मेण। तस्येति वचनं योगविभागार्थं। योगविभागप्रयोजनमप्र
वर्ग्येपि दधिघर्मस्य विधेः प्रापणमिति। घर्मेणेति। वचनं मृगावानादन्यस्य धर्मेण संवद्धस्यै
कश्रुत्यस्यापि प्रापणार्थं। तेनोत्तिष्ठतावपश्यतेत्यस्याः शंसत्या हि चोदना वैभापिऐकश्रुत्यं

रामं०
१६०

भवति। इत्या भक्षिणश्च। इत्या च घर्मेण व्याख्याता भक्षिणश्च घर्मेणैव व्याख्याताः। भक्षिशब्दो
न कर्त्रुपलक्षणार्थं प्रयुज्यते कथं न हि स्वात्मनोपि विधेयत्वात्। तेन क्षस्य भक्षकर्तृणां च घर्म
वता विधीयते। होतर्वदस्वेत्युक्त उत्तिष्ठतावपश्यतेत्याह। अस्या लिंगजनितमेव कार्यं। आहे
ति वचनमस्या अनुवाक्या त्वमाभूदित्येवमर्थं। तेनोत्तरैवावाक्या भवति। अनयाध्वर्युः प्रेषरू
पमभिधानं क्रियते। श्रोतं हविरित्युक्तः। श्रातं हविरित्यन्वाह। इयमनुवाक्या। श्रातं मन्य ऊध
नि श्रातमग्ना वितियजति। अग्ने वीहीत्यनुवषट्कारो दधिघर्मस्याग्ने वीहीति वा। मयि त्यदिं
द्रियं बृहन्मयि दक्षो मयि क्रतुः। त्रिशुक् घर्मो विभातुम आकूत्या मनसा सह विराज्योतिषा स
ह। तस्य दोहमशीय तेतस्य सुम्नं इषी। तस्य त्रिष्टुप् छंदस उपहूतस्योपहूतो भक्षयामीति
भक्षजपः। यं धिष्ण्यवंतां प्राचमंगारैरभिविहरेयुः पश्चात्तस्य धिष्ण्यस्योपविश्योपहाव
मिष्ट्वा परित्यागेन पुरं वयमितिजपेत्। धिष्ण्यवतां मध्ये यं कंचित् धिष्ण्यवंतं धिष्ण्यवैतंभ्यः

158

नाoवृo
१६१

प्रांचं संतंयथं गारेरभिविहरेयुस्तस्यनैमितिकपरं पश्चात्तस्यधिष्ण्यस्योपविश्योपहवं
यजमानादिच्छापरित्याग्नेपुरंवयमितिजपेत्। अनिष्टादीक्षितःदीक्षितस्योपहवयाचनप्र
तिषेधाददीक्षितस्योपहवयाचनंयजमानादितिगम्यते। अस्यैवनैमितिकस्यनिमित्तापतिका
लादन्यत्राम्नानंतृतीयसवनेप्यस्यनैमितिकस्यप्रापणार्थं। सवनीयानांपुरस्तादुपरिष्टात्प
शुपुरोळाशेनचरंति। प्रकृतिप्राप्तस्यपशुपुरोळाशस्यकालविधिरयं। अक्रियामेकेन्य
त्रतदर्थवादवदनात्। तस्यपुरोडाशस्याक्रियामेकेआचार्यामन्यंतेहेतुबळात्सोयंहेतुः
। अन्यत्रतदर्थवादवदनादिति। तत्स्ययोजनोवादस्वर्थेवारः तस्यवदनंतदर्थवादवदनं
तदर्थवादेतत्स्ययोजनवादस्यान्यत्रवदस्यान्यत्रवदनादित्यर्थः। अन्यत्रेतिसूक्तवाक
प्रैषउच्यते। तत्राव्रीहयतपुरोळाशैरित्याम्नानं। पुरोळाशैरितिबहुवचनदर्शनात्सवनी
यैर्देवतात्राभिधीयतेनपशुपुरोडाशदेवतेतिगम्यते। नेनात्रप्रकृतिप्राप्तमभिधानमप

रामo
१६१

ठ्यंतोऽकरणनिमित्तमेवेदमभिधानमितिमन्यमाना अक्रियामुक्तवंतः। क्रियामाश्मर
थ्योन्विनाप्रतिषेधात्। अतिदेशप्राप्तस्यप्रतिषेधाभावादाश्मरथ्यःपशुपुरोडाशस्य
क्रियामेवमन्यते आश्मरथ्यस्यग्रहणंतस्यपूजनार्थं। नविकल्पार्थी। तस्मात्पशुपुरोडा
शःकर्तव्यएवायसुनरिदमन्यत्रतदर्थवादवदर्थनादित्यनभिधानाकरणमुक्तं। तदयु
क्तं। प्राप्तस्यप्रतिषेधाभावात्करणमेवेति। अनभिधानंपुनर्यत्सूक्तवाकप्रैषउक्तंतदहेतुरे
वाप्रत्यक्षपठितेमंत्रेभिधानशक्तिर्नास्तिचेदनभिधानमस्तुकिंकुर्मः। यथाकथंचिदभि
धानंवाकल्पनीयं। पुरोळाशाद्युक्तमानाराशंससादनात्। नत्विहहिदेवत्याः। एतस्मिन्का
लेदक्षिणानीयंतेहीनैकाहेषु। अधिकृतेकालेपुनःकालविधानंयत्रानुसवनंदक्षिणा
नयनंविहितंतत्रत्रिषपिसवनेषुनाराशंससादनोत्तरा। कालमेवदक्षिणानयनमित्यर्थे
। अहीनैकाग्रहणंसत्रेष्वात्मदक्षिणापिनास्तीतिसूचनार्थं। कृष्णाजिनानिधून्वंतःस

159

यमेवेदक्षिणापथं यंतिदीक्षिताःसत्रेष्विदमहंमांकल्याणैयेकीर्त्यैतेजसेयशसेयशसेमृतत्वा
यात्मानंदक्षिणान्नयानीतिजपंतःदीक्षितवचनंपत्नीनिवृत्त्यर्थं।सत्रवचनमसत्रेष्वस्य
समुच्चयनिवृत्त्यर्थं।आत्मानंदक्षिणांनयानीतिमंत्रवादःसत्राणामदक्षिणत्वस्तुतिपरत्वा
न्नात्मदक्षिणत्वंविधातुंशक्नोति।उल्लेष्यमाणाग्नीध्रीयआहुतीर्जुहुति।उल्लेष्यमाणा
सुदक्षिणाद्रव्येष्वित्यर्थः।केनचिन्मानविशेषेण दक्षिणाद्रव्याणिदक्षिणाकालेनेतव्यानितस्क्ष
णात्पूर्वक्षणेसर्वेऋत्विजआहुतीर्जुहुति।दक्षानीत्यग्निर्वेदतिवायुराहतथेतितन्महंनेतिचं
द्रमाःसत्यमादित्यःसत्यमोमापस्तत्सत्यमाभर।नृदिशोपदस्यदक्षिणादक्षिणीनांनिषो
भूयासंस्वाहा।प्राचित्येधिप्राचिजुषाणाप्राचित्येधिप्राचिजुषाणाप्राच्याज्यस्यवेतुस्वाहे
तिद्वितीयांद्वितीयाग्रहणंमंत्रभेदप्रदर्शनार्थं।नद्ययोरादुत्योरादुत्योरेतावानेकोमंत्रआ
वर्तयितव्यइतिः कइदंकस्मा अदात्कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामंस

मुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्रतिगृह्णात्वित्य
तीतास्वनुमंत्रयेतप्राणि।विहारदेशमतीत्यनीतेषुदक्षिणाद्रव्येषुतन्मध्येयान्प्राणिद्रव्य
तदेतेनानुमंत्रयते।अभिमृशेदप्राणि।तन्मध्येयःप्राणितदभिमृशेत्।कन्यां वा अभिमृ
शेषः।दैवेनविवाहप्रकारेणतदायदिकन्यादीकंयतेतामप्यभिमृशेत्।अनेनमंत्रेण।नब्रा
ह्मादिष्विदमभिमर्शनमिस्ति।ऋतुसंबंधाभावात्।सर्वत्रवैतानिकेइष्टिपश्वादावेवंप्रति
गृहीयात्।नात्विहैवेतिनर्वेदिप्रसंगाभावात्प्रतिगृह्य।[illegible]।ध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्रा
श्नीयुःप्राश्यप्रतिप्रसृप्य॥१३॥मरुत्वतीयेनग्रहेणचरंति।मरुत्वतीयेनग्रहेणचरंति
।मरुत्वद्वेवस्यैग्नेहोमरुत्वतीमःगनार्थमूत्रद्वयं।इंद्रमरुत्वइहपाहिसोमंहोतायक्षदिंद्रं
मरुत्वंतंसजोषाइंद्रसगणोमरुद्भिरितिभक्षयित्वेतत्पात्रंमरुत्वतीयेशस्त्रंशंसेत्।भक्षयि
त्वेतिवचनंशस्त्रकालोपदेशार्थं।मरुत्वतीयमितिशस्त्रनाम।अध्वर्योशोंसावोमितिमाध्यं

(१६०)

ना०वृ०
१६३

दिने शस्त्रादि षाहावः। माध्यंदिने सवने सवतो या निशस्त्राणि होतुर्होत्रकाणां चैतेषामेव रूपआ
हावो भिधियते। वक्तुवचनं होत्रकशस्त्रपरिग्रहार्थं। आत्तारथं यथो न यद्ददं वसो सुतमं धइतिम
रुत्वतीयस्य प्रतिपदनुचरौ। पुनर्मरुत्वतीयवचनं सर्वशस्त्राधिकारात्। प्रतिपदनुचरा विति सं
ज्ञे यथासंख्ये नद्वयोस्तृचयोः। इद्वंनेदीयरादिहीतौद्रनिहवः प्रगाथः। इदमपि संज्ञा। प्रनूनं ब्रह्म
णस्पतिरिति ब्राह्मणस्पत्यः प्रगाथ इति शेषः। इयमपि संज्ञैवातृचाः प्रतिपदनुचरा द्वृचाः प्र
गाथाः। आतोर्धर्चे सर्वशस्त्राणामादिभूतमाज्यमारभ्यमारभ्य आस्मात्ब्राह्मणस्पत्यात्
सर्वमर्धर्चं भवति। आज्यमारभ्य ब्राह्मणस्पत्यपर्यंतं सर्वमर्धर्चशस्यं भवतीत्यर्थः। सर्ववचनात्
प्रवृत्तौ चत्रिष्टुवादीनिपंक्तिर्वोतिछंदो वा अस्मिन्नवधौ यद्यागच्छति तत्सर्वमर्धर्च मितिगम्यते।
स्तोत्रियानुरूपाः प्रतिपदनुचराः प्रगाथाः सर्वत्र। एते च सर्वत्रार्धर्चशः शस्याः। प्रगाथस्या
र्धर्चशो शंसनविधानेहहतीकारपक्षे चतुर्थषष्ठयोः पादयोः पुनर्द्विरभ्यासयोरवसानवि

रा०म०
१६३

ध्याभावात्समाम्नायप्रसिद्धार्धर्चावसानं न प्राप्नोतीति तत्रावसानप्राप्त्यर्थो सर्वत्रवचनं छंदो
गप्रत्ययप्राप्तस्यापि प्रगाथस्यास्मिंछास्यमानस्य एनदवसानं भवतीत्येवमर्थं। प्राक्चत्छं
दांसित्रैष्टुभात्। गायत्र्यादीनि पंक्त्यंतानि अर्धर्चशः शस्यानीत्यर्थः। सर्वाश्चेवाचतुष्पदाः
। गायत्र्यादीनां च सप्तानामक्षरपरिमाणमेव प्रवृत्तिनिमित्तं न पादविन्यासः। तत्र बृहत्यं
तानां पादविन्यासानपेक्षया सर्वप्रकाराणामर्धर्चशंसनमुक्तं। पंक्त्या अप्यपंचपदाया अ
र्धर्चशंसनमेवं पंचपदायास्तु वक्ष्यति। तत्र पंक्त्या उत्तरे त्रिष्टुप्छंदः सुया अचतुष्पदास्ता
सामर्धर्चशंसनमनेन मनेन नविधीयते। अयं विधिः पंचपदास्वेव पंक्तिषु द्वयोर्द्वयोः पादयो
रवस्योदित्यस्य विधेः पंचपदास्वेव संभवात्। सर्वग्रहणं तु पाकप्यतिदिष्टेषु वयामरुत्यर्धर्च
शंसनमेवेत्यर्थः। पंक्तिषु द्विरवस्यो द्वयोः पादयोः। अर्धर्चशो वाश्विने। आश्विने शस्त्रेयाः पं
क्त्यस्तासामर्धर्चशंसनं पंक्तिशंसनं वा भवतीति विकल्पोयं विधीयते। तत्रार्धर्चशस्यांतर्ग।

तानामर्धर्चशंसनं त्रयाणां पंक्तिशंसनमेवेति विनिवेशो युक्तः। पच्छःशस्यगतां तु पच्छःशंसने क्रियमाणेयं विशेषः। सर्वत्र विषये पच्छःशस्य सूक्तगतायाएकस्याः पंक्तेः पच्छःशंसनैवात्र सूक्तमुखीया उदाहरणं। अर्वाग्रथमिति चैवमादि। नमोवाक इत्यर्धर्चेशः शस्या साहाकृतस्येत्यस्याः पंक्तिशंसनं। समाससुत्तमे पदे। पंक्त्याः पच्छःशंसने क्रियमाणे यदुत्तमे पदे अतिरिच्येते तयोः समासं कृत्वा शंसेत् उत्तमे पदे समस्य शंसेदिति वा योजना। पच्छोन्यत्। उक्तादन्यत्पच्छःशंसेत्। यदिदमर्धर्चशंसनविधानं सामिधेन्यतिदेशप्राप्तमप्युपदिष्टं तेन। तत्पच्छःशस्य विषयनियमार्थं न स्वरूपविधानपरं। पादैरवसायार्धर्चशोनैः संतान इदं पच्छःशस्य प्रकारप्रदर्शनार्थं। अर्धर्चान्तेष्वसंतानं इत्यर्धर्चान्तेष्वप्रणवं कृत्वा तैः संतानः कर्तव्यः। अग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति नाम। प्रवइंद्राय बृहत इति। मरुत्वतीयः प्रगाथेः। इदमपि नाम। जनिष्ठा उग्र इति। इंद्रं सूक्तं एकभूयसीः शस्त्वा मरुत्वतीयां निविदं द

ध्यात्सर्वत्र। एतस्य सूक्तस्यार्धाएकाधिकाः शस्त्वानरंतराले इंद्रो मरुत्वानित्येतां निविदं दध्यात्। अर्धादिति ब्राह्मणात्लभ्यते। तस्यार्धाः शस्त्वार्धाः परिशिष्यमध्ये निविदं दधातीति। सर्वत्र ग्रहणं सूक्तमुखीयायांस स्थामपि तां मुक्त्वा सूक्तस्यैवैकभूयसीः ऋचः शस्त्वा निविद्धेयेत्येवमर्थं। एवमयुजासु माध्यंदिने। सवनवचनं विस्पष्टार्थं। एकांतत्वे। आपो युग्मासु। शस्त्वेत्यनुवर्तते। एकांशिष्टात्तृतीयसवनने। निविदं दध्यादित्यनुवर्तते। अक्षिणी मृजानः परिदध्यात्। ध्यात्। ध्याते थ्येनेन आत्मन उभयं कुर्वन्परिदध्यात्। एतत्त्रिष्वपि वचनेषु कर्तव्यं। एनः पोवेः। आत्मन इति वचनात् यजमानस्येति गम्यते। अन्यत्राप्येतया परिदध्यात्। अनिर्देशमामा यां क्वचनाहनेपि भवति। इदं तु वचनं जनिष्ठा उग्र ओजसे इति माध्यंदिन इति माध्यंदिने उपदेशप्राप्ताया प्राप्तणार्थं। उक्तं वाचीं द्रा यत्पृण्वते त्वेति शस्त्वा जपेत्। ये त्वाहिहत्ये मघवन्नवर्धन्निति याज्या। ॥१४॥ निष्केवल्यस्य। अधिकारोयं निष्केवल्य इति शास्त्रनामे। अभि त्वा शूर नोनु

ना०वृ०
१६५

मोभिस्त्वा पूर्वपीतय इति प्रगाथो स्तोत्रियानुरूपौ यदि रथंतरथरपृष्ठं तर्थं रंतेमिति साम विशेषः
।एषृमित्यस्मिंस्त्वाने ज्योतिष्टोमांगभूतं सामाभिव्यक्तऋगक्षरसंपाद्यस्तुतिजन्यं शास्त्रैक
समधिगम्यं कार्यमुच्यते यदि रथंतरं पृष्ठं पृष्ठमित्ययमर्थः। यदि पृष्ठं कार्यं रथंतरं साम
कुर्युश्छंदोगा इति। एवं बृहत्पृष्ठं वैरूपं पृष्ठमित्येवमादिष्वपि द्रष्टव्यं। सामानाधिकरण्यं त्वौ
पचारिकमिति मंतव्यं प्रगाथवचनं बृहद्ग्रहणार्थं स्तोत्रियानुरूपवचनं तृचत्वादिसिध्य
र्थं। यद्युवैष्टं हवामिहे त्वं ह्येहि चेरवे इति। प्रगाथौ स्तोत्रियानुरूपावित्यनुवर्तते। प्र
गाथा एते भवंति। सिद्धे सत्यारंभो नियमार्थः। यद्येते पृष्ठे वृष्ठं छंदोगा द्विपदौ तृचाकारतृचं कृ
त्वा स्तुवीतिन तथाप्यस्माभिर्द्वावेव कृत्वा शंस्तव्याः। न यथास्तुतं तृचाकारं शंस्तव्याविस्यर्थः। तौ
द्वौ तिस्रस्कारं शंसेत्। अन्यभ्यासेन तृचाकारस्तवने द्वावेव तृचाः कर्तव्याविसुक्तं। इदानीं अ
भ्यासेन तृचाकारस्तवने तान्प्रगाथान्द्वेऋचौ सत्यो अभ्यासेन तिस्र ऋचः कृत्वा शंसेत् इति सूत्रा

रामं०
१६५

र्थः। तदेवं प्रकारमित्याह। चतुर्थषष्ठौ पादौ बार्हते प्रगाथे पुनरभ्यसित्वोत्तरयोरवस्येत्। बृहती सतोबृह
हत्यपोर्ह्युचः स बार्हतः प्रगाथ इत्युच्यते। ककुप्सतोबृहत्योः काकुभ इति। बार्हताधिकारे पुनर्बार्हते
वचनमनधिकृतानामप्यस्य विधेः प्रापणार्थं तस्मिंश्चतुर्थषष्ठौ पादौ पुनरभ्यस्य सप्तमपंचमा
योः पादयोरवस्येत्। अत्रावसानाभ्यासो विधीयते। एवं कृते पूर्वोर्हृहत्युत्तरे ककुभौ भवतः। बृहती
कारं चैतानेव द्विः। बृहती कृत्वा शसनं बृहतीकारमित्यर्थः। यदि तिस्रो बृहत्य एव चीकीर्ष्येनेत्तदा
तावेव पादौ पुनर्द्विरभ्यस्यन्तत्रैवावस्येत्। तत्रैवावसानलाभार्थं प्रगाथस्यार्धर्चेशंसनविधानमित्यु
क्तं। तृतीयपंचमौ तु काकुभेषु। एतेष्वेताव भ्यस्योत्तरयोरवस्येत्। उत्तरयोरवस्येदित्यत्रानुवर्ततेत
दनुवर्तमाने मपि प्रगाथस्यार्धर्चशंसनविधिवत्पूर्ववन्निः प्रयोजनमेवावतिष्ठते। अत्र तु प्रयो
जनमस्तीत्युक्तं। प्रस्तारादाना युत्तरा ऋग्भवतीति विशेषः। एवमेतत्पष्टेस्वेहः स्विदिन्द्र निहवब्राह्मणस्या
स्त्वानु। एन तृष्टेष्विति समासतिर्देशादेतदेवेत्यवधार्यते। एतच्छंदेन प्रकृतत्वाद्बृहद्रथंतरे उच्येते।

13

ना०ष०
१६६

एतदुक्तं भवति। येषु हः सु बृहद्रथंतरं वा नयोः संहतियोष्टकार्ये भवति। तत्र यथा बृहद्रथंतरस्तो
त्रियानुरूपयोः शंसनं भवति। तद्धरिं द्रुनिह ब्राह्मणस्य तोष्टे सेता। तयोस्तु शंसनं यथास्तुतमिति व
क्ष्यति। ह्रहतीकारमितरेषु पृष्ठेषु। बृहद्रथंतराभ्यामितरेषु पृष्ठेषु स्तुतान्हतीकारं शंसेत्। इति रेव
स समासनिर्देशात् इतस्तामा च्चेपि ह्रहतीकारमेव भवति। नेनात्योर्यामे रथंतरेणाग्नेतनो वैराजेने
त्यत्रापि बृहद्रथंतरे पृष्ठे तथापि वैराजसंबंधात् हहतीकारमेव भवति। बृहद्रथंतरयोश्चानुवस्ख
योः यदा बृहद्रथंतरे गायत्रीषु वान्यासु वाऽन्यभ्यास्तास्तुति स पृक्तः स्तुवते स्वयोनिषु वा द्विपदो
तराकारं त पदापी इति ह ब्राह्मणस्यस्यान्हतीकारं शंसेत्। होत्रकाश्च येषां प्रणे गाथास्तोत्रि
यानुरूपाः। येषां होत्रकाणां प्रकौ गाथास्तोत्रियानुरूपा भवंति ते पी इति ह ब्रा। ह्मणस्य स्यवतां छं
सेयुः। सर्वे मन्यद्यथास्तुतं। ऽकारस्य सर्वे यथास्तुतं शंसेत्। सर्वग्रहं बृहद्र्योः स्तोत्रियानुरूपसंग्र
हार्थं। परिमितशास्त्र एकाहः। परिमितः सर्वतो मितं शास्त्रं यस्याङ्गः स परिमितशास्त्रः। एतदुक्तं भव

राम०
१६६

ति। यः स्वकीयैर्धर्मैर्जातैः स्वप्रदेशात एव परिपूर्णता इति। स चैकेनाह्ना समाप्यत इत्येकाहः। अनेन
प्रकारेण परिमितशास्त्रशब्देन प्रकृतिभूतोऽग्निष्टोम उच्यते। यमभिधित्स न एकाहः स सर्वत औप
देशिकशास्त्र इत्यर्थः। एवं चेत्तस्य विशेषणं किमर्थमन्यदपि धर्मजातं तस्योपदेशादवगम्यते। अ
त्रोच्यते सत्यमेवं किं तत्र विशेषोऽस्ति सोमद्रव्यसंबंधिनो ये धर्मा उत्पत्तिविध्यनुप्रवेशिनस्ते चतुःसं
स्थस्य ज्योतिष्टोमस्य साधारणाः। ये पुनरधिकारविध्यनुप्रवेशिनो दीक्षणीयादयस्तु तशास्त्रादयश्च
त उपदेशतोऽग्निष्टोमस्यैव अतिदेशात एवोक्थ्यादीनामपि संस्थानामित्येतेन विशेषणं शास्त्रवि
शेषणं कृतवानाचार्यः। तस्य चैकाहत्वं प्रसिद्धमेवोच्यते। तेन शब्देनास्य संव्यवहारार्थं। स यद्युभय
सामायस्य वमाने तस्य योनिरनुरूपः। स प्रकृत एकाहो यद्युभयसामास्यात् बृहद्रथंतरसामास्या
दित्यर्थः। उभयसामत्वं नामैवं भवति बृहद्रथंतरं वा पृष्ठस्थाने भवतीतरस्त्ववमान इति। तत्र यस्य व
माने भवति तस्य योनिं निःक्षिपेत् वल्पस्यानुरूपं कुर्यात्। क्षत्रियस्यायमर्थः प्रसक्षाम्नात एवेदं तु सूत्रव

165

ना०ए० चनं सर्ववीर्थ त्वायो च्येतोयोनिस्थान एवैनामन्यत्र शंसेत्। अन्यत्रेसुत्यकप्यादीन्यपि गूर्त्संतेअग्निष्टो
१६७ मात् सोयः कश्चिदुभयसामैकाहः संस्थावाह इत्थं तरसामास्या इत्यर्थः। तत्रयसत्वमानेक्तंत
स्ययोनिस्थानेएव शंसेत्। योनिस्थानमाह। ऊर्ध्वेधाय्यायायोनिस्थानं। निष्केवल्येधाय्याया ऊर्ध्वं
यत्स्थानं तद्योनीनां स्थानं शंसत्रीस्थानमित्यर्थः। अनेकानंतर्यसकृत्पृथग्वाद्वानां। अनेकयासांसाम
योनीनां सहशंसनेप्राप्त आराद्वेवसर्वासामाहावः सकृत्कर्त्तव्यः प्रतियोनिवेतिविकल्पः। तेभ्यश्च्या
न्यदंतं तरमित्यसनेनादौ सकृदाहावः प्राप्त एवोत्तरविकल्पेनविधीयते। एवमूर्ध्वमिंद्रनिहवात्प्र
गाथानां। ब्राह्मणस्यत्यमरुत्वतीयसामप्रगाथान् यदाऽनेकेसहसगकें छेयुस्तदातेष्वपिसकृ
त्पृथग्वाहावः कर्तव्यः। अत्र सर्वत्राहावप्राप्तेअनेनाद्येषु विकल्पोविधीयते। यद्वावानेतिधाय्या
पिबासुतस्यरसिनइतिसामप्रगाधेः संज्ञाशब्दावेतौ। इंद्रस्यनुवीर्याणीत्येतत् सिंनेंद्रीं निविदं द
ध्यात्। इंद्रो देवतायस्याइत्यैंद्री निवित्। अत्रब्राह्मणं वा स्वरः। उक्थं वाचीन्द्रायेत्युपशृण्वतेतेतिशस्त्वा एम० १६७

जपेत्। पिबासोममिंद्रमंदतुत्वेतियाज्या। होत्रकाणां माध्यंदिनेपि शस्त्राणि भवंतीत्युक्तं। नान्ये।
तानीत्याह॥ २५॥ होत्रकाणां कयानश्चित्र आभुवत्कयात्वनऊत्याकस्तमिंद्रत्वावसुंसद्योहजा
तएवात्वामिंद्रोशग्लुषुणः सुमनाउपाकइतियाज्या तंवोदस्ममृतीषहंतत्वायामिसुवीर्यमितिप्र
गाथौस्तोत्रियानुरूपाउदुत्येमधुमत्तमाइंद्रः पूर्भिदुत्येमधुमत्तमाइंद्रः पूर्भिदुद्रुब्रह्मा एवृजीषीवज्री
वृषभस्तुराषाळितियाज्या तरोभिर्वोविदद्वसुतरणिरित्सिषासतीतिप्रगाथौस्तोत्रियानुरूपाउ
दित्वस्यरिच्यते भूयइदिमामूबित्युपोत्तमा सुद्वरेत्सर्वेत्र पिबावर्धस्वतवघासुतासइतियाज्या अ
त्रोपोत्तमासुद्वरेत्सर्वत्रेत्युक्तं। तस्यसर्वत्रग्रहणस्य प्रयोजनमस्य चाप्येतयोस्तनेनान्यत्रग्रहणे
नतुल्यमस्तित्वसरेसवनंसस्थानिमित्तं कर्मकर्तव्यं॥२६॥ अथतृतीयसवनसुतमरवरेण। स्वरग्र
हणंपूर्ववद्वाधकबाधनार्थं। तेनपाशुकेहविः संप्रचारेपुनमः स्वरः सिद्धोभवति आदित्यग्रहेणच
रति आदित्योदेवतायस्यग्रहस्य स आदित्योग्रहस्तेनचरंति आदित्यानामवसानूत्तनेनहोताय

105

ना०स्त० १६८

ऽसदादित्यास्त्रियथाम्नाआदित्यासोअदितिमींदयंतामितिनैतंग्रहमीक्षेतहूयमानं।अत्रप्रतिषे
धान्नियमेननेक्षेततेनान्यत्रानियमः।स्तुतआर्भवेपवमानेविहृत्यांगारान्मनोतादिपश्वि
ष्टांतंपशुकर्मकृत्वापुरोळाशाद्युक्तमानाराशंससादनांतंकर्तव्यमितिशेषः।विहरणोपदेशस्तूक्ता
द्युल्परिज्ञानातद्व्यवायपरिहारार्थः।अत्रापिद्विदेवत्यानसंति।पश्विष्टांतंकर्मैत्येतावतोवन
सिद्धेपशुग्रहणंपशुवंदासनप्राप्त्यर्थंतेनैतस्मिन्नवसरेआहवनीयस्यदक्षिणतआसनंभवति।
संनेषुमृदिष्टासुरोळाशस्यतिस्त्रस्तिस्त्रःपिंड्यौदक्षिणतःप्रतिसंचमसेभ्यःस्वेभ्यःपितृभ्यउपा
स्यपुरत्रपितरोमादयध्वंयथाभागमावृषायध्वमिति।नाराशंसेषुसादितेषुपुरोळाशस्यमृदु
नमात्मदेशाद्गृहीत्वासर्वेचमसिनःपुरोळाशंतिस्त्रस्तिस्त्रःपिंडीःकृत्वास्वात्स्वाद्यामसादक्षिणतः
स्वान्स्वान्पितृन्नुद्दिश्यचमसस्मीवेआस्येयुः।नाःपिंडीःप्रतिस्वमितिचमसेभ्यइत्यस्यविशेषणं
पिंडीःप्रतिस्वमितिचमसेभ्यइत्यस्यविशेषणंपितृशब्दस्यसंबंधिशब्दत्वेनैवस्वत्वेसिद्धेयत्स्वश

रा०म० १६८

दग्रहणंकरोतितज्ज्ञापयतिसंबंधिपदार्था अपियत्रादृतेयजमानस्यैवेति।तेनयस्यांद्दृष्योनत्तानि
स्तत्रयजमानदेव्यएवपरिगृह्यते।सव्यावृत्तआग्नीध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुः।प्राश्नंत
तियत्सूत्र्यं॥२७॥सावित्रेणग्रहेणैहैं चरंति।एतद्भुभयंगतार्थं।सवितृदेवसोग्रहः।सावित्रग्रहः।अ
भूद्देवःसविताविंद्योतनुनोहोतायक्षद्देवंसवितारंदमूनादेवःसवितावरेण्योदधद्रलादक्षपितृभ्य
आयुनि।पिबात्सोमंममदन्नेनमिष्टयःपरिज्माचिद्रमतेअस्यधर्मणि।इतिवषट्कृतेहोतावैश्वदेवं
शस्त्रंशंसेत।वषट्कृतवचनमात्रापिशस्त्रकालज्ञानार्थं।होतृग्रहणमृत्विक्क्रमेव्यतिक्रमवि
षयेपिहोतैववैश्वदेवंशंसेदितिसेवमर्थं।वैश्वदेवमितिशस्त्रनाम।सर्वादिशोध्यायेत्।सिद्धानुयस्यां
दृष्योनता।यस्यांद्दृष्योनतांदिशंध्यायेदितिवचनान्मुख्यंध्यानंस्मरणंसंभवतीतिमाध्यादिशो
दिरेवध्यानंकर्तव्यं।अध्वर्योशोंसावोमितित्त।तीयसवनेशस्त्रादिष्वाहावः।उक्तार्थमेतन्मा
ध्यंदिना।तत्सवितुर्वृणीमहेघानोदेवसवितरितिवैश्वदेवस्यप्रतिपदनुचरावभूद्देवएकपाचर

(168)

ना०१०
१५९

तुशाभिश्चस्वभूते द्वाभ्यामिष्टये विंशत्या चातिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ताविमुंच
प्रघा वेति दैर्घतमसं सुरूपकृत्नुमूतयेतत्सन्नथम यं वे नश्चो रयस्पृष्त्रिगर्भाय ये म्यो मा तामधुमत्ति
तते पय एवा पित्रे विश्वदेवाय वृष्ण आ नो भद्राः क्रतवो यंतु विश्वत इति नवैश्वदेवं पु
नर्वैश्वदेवग्रहणं शस्त्रादि षिति व्यवायात् । एकयाचेतिक ल्पजादेर्घतमसेति वासिष्ठनि हस्तर्य
। नवग्रहणं अस्य सूक्तस्योतमावृत्तस्यैव वैश्वदेवसूक्तत्वसिध्यर्थं । एतत्सार्वत्रिकउतमायाः
परिधानीयत्वेन सर्वत्र विनिवेशात् । वैश्वदेव्ग्निमारुतयोः सूक्तेषु सावित्र्यादि निविदो दध्यात् । स
सप्तसूक्तानि सप्तैव च निविदो व शिष्यंते । उतमायाः पोउशिनि विनियोगात् । अतो यथासंख्येन वि
निवेशः सिद्धो भवतीति देवस्यष्टयति । चतस्रो वैश्वदेवा शस्त्रइत्यर्थः । उत्तरा हि सित्सिस्त उत्तरो आ
ग्निमारुत इत्यर्थः । सूक्तानां न द्विदैवता सूक्तानां बहि । द्विदैवतं भवति । न दैवैनिविदो दैवतमि
त्यर्थः । हि शद्बो हेत्वर्थ सूक्तेकः । प्रसिद्धि द्वारेणा तेनायमर्थः यस्मात्तनयोरेक देवतत्वं प्रसिद्धं त ।

राम०
१६९

स्मादग्निष्टुदादौ सूक्तानां देवताभेदे सति निविदरूहे न तद्देवत्याः कर्तव्याः । तां सुदेवतापदानामू
हः कर्तव्यः । दैवतेन सूक्तांतः । यदेतयोः शस्त्रयोः सप्तैव सूक्तानि तद्वा निविद्भिर्यथासंख्यमुपप
द्यते । यदा पुनर्विकृतिषु सप्तभ्योधिकानि सूक्तानि तदा कथं यथासंख्यमिति तदुपपादनार्थं ।
मिदं सूत्रं । दैवतेन सूक्तां इति दैवतेन सूक्तानां नानात्वमवगंतव्यं । न समाम्नायप्रसिध्या । एतदुक्तं
भवति । एतयोः शस्त्रयोः सप्तैव कार्याणि प्रकृतौ परिच्छिन्नानि तत्र तत्रैकं कार्यमेकं वा सूक्तं कुर्या
त् । इह बहूनि वा । सर्वथा तावदेकसूक्तकार्यं तु प्रविष्टमेकमेव कृत्वा यावतां सूक्तानामेकं दैवतं तावदे
कमेवेति मन्यमानो दैवतेन सूक्तांत इत्युक्तवानाचार्यः । धाय्याश्चात्रैकपातिनीः । विधादिति शि
षः । अत्रेति वैश्वदेवाग्निमारुतयोरित्यर्थः । अस्य विधेरुभयार्थत्वायान्तरसूत्रे वैश्वदेव शद्बं
प्रयुक्तवानाचार्यः । अदितिर्द्यौरदितिरंतरिक्षमिति परिदध्यात् सर्वत्र वैश्वदेवे हि प
दोर्ध्वशंसः मरुद्भूमिमुपस्पृशन्नास्सर्वत्र प्रकृतौ विकृतौ च वैश्वदेवशस्त्रेऽनयैव परिदध्यात् ।

157

ना०श्रौ०
१७०

इत्यंहैवशस्त्रे अनयैव परिधि च परिदध्यादिदं च कुर्वन्परिदध्यादित्यर्थः ॥ उक्थं वा चीत्रायदेवेभ्य
आश्रुत्येतेति शस्त्वा जपेत् ॥ विश्वेदेवाः शृणुतेमं हवं म इति याज्या ॥ २० ॥ त्वं सोम पितृभिः संविदा
न इति सौम्यस्य याज्या ॥ सौम्यस्य याज्या ॥ सौम्या नाम कर्मविशेषश्चरुर्हविष्कः सोमदैवत्यः ॥ तं घृत
याज्याभ्यां ॥ उपांशु परियजेत् ॥ तन्त्रैव विशेषमाह ॥ घृताहवनो घृतपृष्ठो अग्निर्घृतैस्मिनो घृतमस्य
धाम ॥ घृतप्रुषस्त्वा हरितो वहन्तु घृतं पिबन्यजसि देव देवानिति पुरस्तात् ॥ उरु विष्णो विक्रमस्वो
रु क्षयाय नस्कृधि ॥ घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिरेत्युपरिष्टात् ॥ अन्यतरश्चेदग्नाविष्णू म
हि धाम प्रियं वामिसुपांवामिसुपांश्चैव ॥ यद्यन्यन्तरतो यजति न दानयो यजेन्न दाप्युपांश्चैव ॥
एवकारः पौनर्वाचनिकः ॥ आहृतं सौम्यं पूर्वमुन्नातृभ्यो गृहीत्वावेक्षेत यन्नेव स्वुर्दिवियत्सुपर्णे
येनैकराज्यमजयो हिनाद्दीर्घेय चक्षुरदितिरनन्तं सोमो नृचक्षा मयितद्धालिति ॥ अध्वर्युणा
आहृतमुन्नातृभ्यः पूर्वं गृहीत्वा सौम्यमवेक्षेत नमंत्रेण ॥ अपश्यन्नहं दिस्पृक्कृतुस्पृक् वर्चोधा

रामं०
१७०

वर्चो अस्मासु धेहि ॥ यन्मे मनो यमं गतं यद्वामे अपरागतं ॥ राज्ञा सोमेन तद्वयमस्मासु धार
यामसि ॥ भद्रं कर्णेभिः शृणुयाम देवा इति चान्तस्मिंश्चरौ घृतन्नप्रुते ईक्षमाणः स्वच्छायां यदि
न पश्येत्तस्यापश्यतो नैमितिकमिदं ॥ तद्दिस्पृगित्यादियजुश्च भद्रं कर्णेभिरित्यृचं ब्रूयात् ॥
अंगुष्ठोपकनिष्ठिकाभ्यामाज्येनाक्षिणी ॥ अञ्ज्य छंदोगेभ्यः प्रयच्छेत् ॥ अंगुष्ठोपकनिष्ठिका
भ्यां चरुस्थेनाज्येनाक्षिणी अंक्त्वा छंदोगेभ्यः प्रदानार्थमध्वर्यवे प्रयच्छेदित्यर्थः ॥ अंजना
दि नित्यमेव ॥ विहृतेषु शालाके याग्नीध्रः पालीवतस्य यजत्येभिरग्नेसरथं यात्वर्वाङि-
त्युपांश्चैव ॥ शालाकाद्दर्भेषीकाः तेषु भवा अग्नयः शालाकाः ॥ तेषु विहृतेषु विनि विहरणकाले
पदेशात्तस्य व्यवायपरिहारार्थः ॥ शालाकाः धिष्ण्या अग्नयः उपांश्चैव स्वधारणं ॥ तेषामुच्चैः
संप्रैषेपूपांश्चैव प्रश्नमित्येवमर्थो ॥ नेष्टारं विसंस्थितसंचरेणानुप्रपद्य तस्योपस्थ उपवि
श्य भक्षयेत् ॥ नेष्टुर्विसंस्थितसंचरेण नेष्टारमनुप्रपद्य तस्योपस्थ उपविश्य भयेत् ॥ पाली

168

नाह०
१७१

वान्तं नेष्टयं पिहतेउपस्थ इति वचनात् तस्यैवेत्य वगतौ सत्यां तस्यैतिवचनं शास्त्रान्तरेणानोप
स्थाप्यासीनेति प्रतिषेधे सत्यपि उपस्थ एवोपविश्यो दिसेवमर्थे। अस्य सूत्रकारस्याप्याम्ना
तिमूलमस्तीत्यनुमिमीमहे ॥१९॥ अथ यथेतं। अथानंतरमेव यथेतं निष्क्रामेत्। सदस
आग्नीध्रं प्रतिगच्छेत्। तस्मिन्नाग्नीध्रीये यथेतं निष्क्रांत एवाग्निमारुतमारभेतेति वचन
प्रयोजनं यथेतमितिपदेनैव मार्गेण गतस्तेनैवेति। स्वध्यग्नमाग्निमारुतं। स्वध्यग्नं मा दु
तहस्येत्यर्थः। वाचस्त्रिस्स्रत्रयो विलंबिता मध्यमा द्रुता चेति तत्र विलंबितायां यएकमो
वः समध्यमायां हिमात्रः एवं द्रुतायां त्रिमात्रः इत्येवं मात्रासु विज्ञेयः। एवं श्रूयते तेनासंत्व
रमाणा स्थिरे युरित्याहर्ष त्रिषु सवनेषु संत्वरमाणा स्थिरे युरिति स्थिते असंत्वरमाणाइति
संत्वराप्रतिषेधात् तदनंतरा मध्यमावृत्तिः विहिता भवति। तत्राग्निमारुते मध्यमामपोह्य द्रु
ताविधीयते उच्चनीचमावेनैव शंस्तव्यं त्रिषु सवनेषु मन्द्रोरयोयमाः। आरोह क्रमेणैव प्रा

रा.म०
१७१

योक्तव्याः। आग्निमारुतमितिशस्त्रनाम। तस्याद्यां पच्छः ऋगावानं पच्छः शस्याचेत्। तस्याग्निमा
रुतस्याद्यामृचमृगावानं शंसेत्। यदिसा पच्छः शस्या भवेत्तदा पादे पादे वसायानुच्छसन्नेव शंसेत्।
अर्धर्चशइत्तरां। यदिसार्धर्चशः स्यात्तदार्धर्चेवसायानवानमित्यर्थः। संतानमुत्तमेन वचने
न द्वितीयायाः संतानं विधीयेवैश्वानराय पृथुपाजसेशंनेः क्रूरसर्वेते प्रत्नक्षसः प्रतवसो यज्ञाय
ज्ञाबो अम्नयेरेवोवा इद्रविणोदाइति प्रगाथो स्तोत्रियानुरूपो प्रतव्यसीन व्यमायोहिष्टे तितिस्तोवि
यत्तमपउपस्पृशन्नन्वारभ्धे यपाहृत्तशिरस्कइदमादि प्रतीकमाख्यानमुतनोहिर्बुध्न्यः शृणोतुदे
वानां पत्नीरुशतीरवंतुनइति द्वे राकामहमिति द्वे पावीरकन्याचित्रायुरिमंयमप्रस्तरमाहिसीद
मातलीकव्यैर्यमो अंगिरोभिरुदीरतामवर उत्परासआहं पितृभ्यो नमो अस्त्वद्यस्वादुः किलायं
मितिचतस्रो मध्ये वाख्यानं मदामोदैव मोदादैवो मोदेवो मित्यासां प्रतिगरो ययोराजसास्कभिता
रजांसिवीर्येभिर्वीरतमाशविष्ठा। यापत्येते अप्रतीतासहोभिर्विष्णू अगन्वरुणापूर्वहूतौ। विहेो

ना०वृ० २७२

तुकं वीर्याणि प्रवोचं तुं तुं न तन्न जसो भानुमन्वित्येवानुइन्द्रो मघवा विरप्शीति पदैरिरध्यात्। भूमि
मुपस्पृशन्।अत्र वियत्तमपस्पृ पोहिष्ठीये त्कं वियतमिति सुपरं तं स्थित्वा स्थित्वा शंसेदित्यर्थः।अ
पश्चोपस्पृशन्नुशंसेत्।अन्वारब्धेषु पाहृतशिरस्कः।उद्गात्रादियात्मानं अन्वारब्धेषु शिरसः प्रा
वरणमपोहेत्।अनेनैव ज्ञायते स्तोत्रोपाकरणकाल एव सर्वैः प्रावृतशिरस्कैर्भवेयुरिति। इदमादि प्र
तीकमाद्धानमित्यत्र इदमादीसां पोहिष्ठियादीसर्थः। अस्य विधेर्विषयधाय्यानां दनंतरत्वाद्विशेष
वनाच्च शाकाद्धच्च वर्जे अन्येषु सर्वेषां हावः प्रामराव किमर्थो यं महान्स्पा सइन विप्रः शाकाद्धचार्थमि
ति चेत् तदेवं वक्तव्यं आपो देवेते नृचे शाकाद्धचे चेति न त्रैववे तयो शहाव सिध्यर्थं इदमादीत्येत्तदुक्तं स्यात्
एवं लघुनोपायेनोभयोः शहाव विधानं शक्यंपि अहूवतस्य परस्तात् शहावं विदधाति तत्तु शापसमाचार्योस्य
विधेरनित्यत्वं तेन शाकाद्धचे आहाव विकल्पः सिद्धो भवति। मदामोदैवमोदामोदैवोमित्यासां प्रतिगराविसत्रे
दे प्रतिगरद्वयमोथामोदैवेत्यस्मात् लुनादिरूपद्वयविशिष्टस्यापवादः। प्रणवे प्रणव आहावो नरइत्ययं प्रणवः पुनादरूप

रा.म० २७२

वारः नमोदामोदैवोमित्यस्य। अत्र स्वादृष्टिलीयास्ता हावो नरेप्यिन प्रणवः। अनिगरो भवतीति सिद्धं। एवमादि प्रयोज
नार्थं प्रसंगादप्य वा शवलीयानित्युक्तं। भूमिमुपस्पृशन्नपरिरध्यात्। उत्तमेन वचनेन फवावनयनं कांक्षेत। प्रसि
धानीयाथा उत्तमेन वचनेन ध्रुवावनयनं प्रतीक्षेत। ध्रुवो नाम ग्रहः। तस्यावनयनमवसेचनं होतृचमसे। त
स्मिं छस्त्रे असमाप्त एव कर्तव्यं। तत्पूर्वमनीतं चेत्सरिधानीयायामध्यमेवचने उत्तमं परमवशिष्य स्थित्वा
तस्मिन्नवनीते शेषं समापयेत्। उक्थं वाचीन्द्राय देवेभ्य आश्रुतायत्वेति शस्त्वा जपेत्। अग्ने मरुद्भिः शु
भयद्भिर्ऋक्वभिरिति याज्या। इसंतोग्निष्टोमोग्निष्टोमः। इति शब्देन प्रकृतमाग्निमारुतमुच्यते। एतदंतः
सोमयागोग्निष्टोमसंज्ञो भवतीत्यर्थः। यदंतं यज्ञहोनो अतयदिदमाग्निमारुतं तत् तदग्ने स्तोत्रमित्येवोक्तं
स्यात् त्वनवक्तव्यं स्वरूपत एव तदग्नेरन्येषां च स्तोत्रमेव अन्यनिवृत्त्यर्थमिति चेत् तदपि वक्तुं वैनशक्य
ते। लिंगविरोधादेंद्री वहुवचनाभावाच्च तेनेत्यंतइत्युक्तमेतत् तदंतस्य नामधेयमेव शब्दइति साधयितुं।। २०।।
इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां पंचमोध्यायः समाप्तः।। ५।। ॐ उक्थ्यानु होत्रकाणां।

तृतीयसवनइत्यनुवर्तते उक्थ्येत्वयं विशेषः। तृतीयसवने होत्रकाणामग्निशस्त्राणि भवंतुः
तानीमानीत्याह। एतेषु ब्रवाणि। तं आग्निरगामिभारतेश्चर्षणी। धृतमस्तं भागधामसुरइतित्र्चावि
द्रावरुणा युवमावांराजानावित्रावरुणा मधुमत्तमस्येति याज्यावयमुत्वामपूर्व्यायो न इदमिदं पुरेति
प्रगाथौ सर्वाः ककुभः प्रमंहिष्ठायो रपुतोछामइंद्रबृहस्पतेयुवमिंद्राश्चवस्वइतियाज्या धांहोदगि
णेरयंत इंद्राग्निवर्णाक्रतुर्जेनित्रीनृमतीभवामित्रः संवांकर्मणेंद्रा विस्नमरपती मदानामितियाज्या
अत्र सर्वाः ककुभइत्युक्तं। किमनेनोक्तं। काकुभेषु तावत्प्रगाथेषु तृतीयपंचमयोरभ्यासेसति ककुभ
वंति। तथैव स्तुवंति च छंदोगाः। अतोन्यस्याप्याजनमन्वेषणीयं तरिरसुच्चभ्यांसेसते। होत्रकाश्चयेषां
प्रगाथास्तोत्रियानुरूपाइत्ती इतिह वब्राह्मणस्य सर्वछंदसनं विहिते तत्र वाईतानामेवायं विधिरित्यनुतत्वा
नकाकुभेषपिप्राप्नोतितन्निवृत्त्यर्थं ककुभइति वचनं। सर्वग्रहणं सर्वकाकुभप्रगाथसंग्रहार्थं। तेन
त्वाहंतेषवासौ विधिरिति मंतव्यं। इत्यंतउक्थ्याः। एवमंतउक्थ्यः क्रतुरित्यर्थः। इत्यंतोग्निष्टोमइत्यस्य

रा॰म॰
१७२

नेतरं होत्रकाणामेतानि शस्त्राण्युक्त्वा इत्यंतउक्थ्यइत्येतावत्युच्यमाने एतानि शस्त्राण्युक्थ्या एवेति गम्य
ते। तत्किमर्थं उक्थ्येतु होत्रकाणामित्यचोक्थ्यग्रहणमयमभिप्रायः। अथसोमेनेति आरभ्य त्रिष्वध्यायेषु
ज्योतिष्टोमाख्यः सोमयागोधिकृतः स च संस्थाभेदान्नामधेयाच्च चतुर्धा भिन्नो बहुत्वादिवोतो भवति। तत्र
सर्वत्र सोमेनयजेतेत्येन हि विधिविहित एवैको यागः केनचिदुपाधिवशेनाभ्यस्तो भिन्नो नाम प्रतीयते। अ
तः सर्वेषां प्रकरणित्वेप्याते अग्निष्टोम एव प्रकरणी अन्ये तस्यैव गुणविकाराइति ज्ञापयितुमुक्थ्यइत्यु
च्यते। उक्थ्य एतावदेवौपदेशिकमन्यत्सर्वमातिदेशिकमित्यर्थ इति॥ १॥ अथ षोडशी। अथ शब्द
आनंतर्यार्थः। षोडशीत्ययं शब्दः शस्त्रवाची। तद्वत्त्वात्तस्य क्रतोरपि वाचकः। तत्रैकेनोच्चारणेनोभय
मत्र विवक्षितमाचार्येण। तेनायमर्थो गम्यते। यदि षोडशी क्रतुः स्यात्तदा तृतीयसवने होत्रकशस्त्रानंत
रं षोडशी नाम शस्त्रं भवति। तस्य विधिरुच्यत इति संबंधः। असावि सोमइंद्रतइति स्तोत्रियानुरूपौ। आ
स्मिन्नेव प्रतीकेष वृचइत्यर्थः। आत्वा वहंतु हरय इति तिस्रो गायत्र्यः। अत्र छंदोनिर्देशः संव्यवहारार्थः

स्०वृ०६
१७३

उपोषुशृणुहीगिरः सुसंदृशंत्वावयंमघवन्नित्येकादेवपंक्तिः। पंक्त्यपरइत्यर्थः। यदिंद्रपृतनाज्येयंते अ-
स्तुहर्यतइत्यास्मिहबार्हतौनचौ। आधर्षस्माइतिद्विपदा। द्विपदावचनंपङ्क्तिःशंसनार्थं। ब्रह्मन्वीरब्रह्म-
कृतिंजुषाणाइतित्रिष्टुप्। एषब्रह्मायऋत्वियइंद्रोनामश्रुतोगृणे। विश्रुतयोयथापथइंद्रत्वद्यंतिरात-
यः। त्वामिच्छवसस्पतेयंतिगिरोनसंयतइतितिस्रोद्विपदाः। भतेमहेविदथेशंसिषंहरीइतितिस्रोजग-
त्यः। त्रिकद्रुकेषुमहिषोयवाशिरं। प्रोष्वस्मैपुरोरथमितिनचावातिछंदसे॥ अतिजगत्यादीनिछंदां-
स्यतिछंदःशब्देनोच्यंते। त्रिकद्रुकेष्वित्यत्रप्रथमाष्टिः उत्तरेअतिशाक्वर्यौ प्रोष्वितितृचःशाक्वरएव। तेन।
तिछंदसाविसृज्येते। पङ्क्तिःपूर्वंद्विधाकारं१ अनयोःपूर्वंतृचंद्विधाकृत्वाशंसेरन्। एकैकामृचंद्वेद्वेऋचौ
कुर्यादित्यर्थः। पङ्क्तिःशंसनेनतत्संपद्यतइतिपङ्क्तिरुक्तं। एवंचेत्पङ्क्तिःशंसनमत्रसिद्धमेवचतुःप-
दत्वात्। तथापिपङ्क्तिरुक्तंद्वेधाकारमित्यस्याधर्चशंसनविधिपरत्वाशंकानिवृत्त्यर्थं। तेनैतास्ति-
स्रःषड्भवंति। तिस्रोमातिशंसनकालेषड्गुण्याः। उत्तरमनुष्टुप्गायत्रीकारं। अस्यतृचस्यसप्तप-

रा०म०
१७३

दत्वादेवैकामृचमेकैकानुष्टुभमेकांगायत्रीचसपादयेत्। सैवमुक्तं। अथैष्वतुर्भिःपादैरनुष्टुभस्तिस्र-
स्त्रिगायत्र्यः अनेनैवप्रकारेणैता अपिचषड्भवति। प्रयोजनंपूर्ववत्। प्रचेतनप्रचेतयायाहिपिबम-
त्स्व। क्रतुश्छंदऋतंबृहत्सुम्नआधेहिनोवसविस्त्यनुष्टुप्। प्रप्रवस्त्रिष्टुभमिषंवमर्चतेति। योव्यतीरफाण-
यदितितृचा आनुष्टुभवचनस्यपूर्वोक्तप्रयोजनस्यासंभवादन्यदुच्यतेनिविदतिपत्तौसत्यामन्यस्मिन्न-
प्यानुष्टुभएवतृचेनिविद्धेयेतत्प्रयोजनंनजागतेसवनछंदस्केतृचइति। तेनैतत्साधितंभवति। यत्र
छंदोनिर्देशमंतरेणसवनविरुद्धछंदसिसूक्तेनिविद्विहितास्यात्तत्रतस्मिन्निविदतिपत्तौसत्यांसवनछं-
दस्कमेवनसूक्तमाहर्तव्यंनापिपन्निविद्धसूक्तंसमानछंदस्कमिति। उत्तमस्योत्तमाशिष्टोत्तमानि-
विदंदध्यात्। उत्तमाशिष्टेस्येतदेकांशिष्टस्येत्येवसिद्धेपुनर्वचनंनिविद्धानीयोतृचएवनसूक्तमितिज्ञा-
पनार्थं। तेनात्रनिविदतिपत्तौतृचएवान्यआहर्तव्योनसूक्तमितिसिद्धं। उत्तमांनिविदमितिप्रसिद्धानुवा-
दः। तत्प्रयोजनंस्वाध्यायकालेपि अस्याःशाखायाअंतेनिविदःपठितव्याइति। लिंगैःपदानुपूर्व्या

(172)

वृ॰ सू॰ ६
१७४

स्वास्या मोमन्त्सदहि वृत्रमपां जिन्व दुदार्य मुद्यां दिविमसुद्रं पर्वतां इह। अस्यानि विदुः पादविप्रतिपत्तौ स
स्यामविच्छिन्नसंप्रदायागतपाठप्रदर्शनार्थो यमुपदेशः। उपह्वस्य विहृतमिति परिधानीयैवा सैः।
वैवाहीदं। एवा हि शक्रो वशी हि शक्र इति जपित्वा पाः पूर्वेषां हरिवः सुतानामिति यजति। जपित्वा इतरत्र
याज्यासंसर्गेनायाज्यांगमयं जपो न शस्त्रांग इति गम्यते। तेनात्र उक्थं वाचीत्याद्य पदे वेष्य इत्ययं भवति।
तदनंतरमेवाहीति मंत्रमुक्त्वा यजति॥ २॥ विहृतस्येंद्र जुषस्व प्रवहायाहि शूर हरी इह। पिबा सुतस्य मतिर्न
मध्वश्चकानश्चारुर्मदाय। इंद्र जठरं नव्यं न पृणस्व मधोर्दिवो न अस्य सुतस्य स्वर्णोपत्वा मदाः सुवा
चो अस्थुः। इंद्र तुराषाण्मित्रो न जघान वृत्रं यतिर्न। बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य श्रुधी
हवं न इंद्रो न गिरो जुषस्व वज्रिन्। इंद्र सयुग्भिर्दिद्युं नमत्वा मदाय हेरण्याय। आत्वा विशंतु वक्विर्न सुतास
इंद्रत्वष्टान। पृणस्व कुक्षी सोमो ना विद्धि शूर धिया हियानः। साधुर्न गृध्नुरस्तेव शूर यच्छ मसीन।
यातेव भीमो विष्ठुर्न लेषः सममस्तु क्रतुर्न तिस्त्रो त्रियानुरूपौ। वितस्यवो वशि न इंद्र जुषस्वेत्यादिना अत्रै

राम॰
१७४

वाम्नाताः षट्तृचस्तोत्रियानुरूपौ भवतः। तेन पूर्वोक्त एव विहृतस्येति गम्यते। ऊर्ध्वं स्तोत्रियानुरूपाभ्यां तदेव श
स्यं विहरेत्। अत्र द्वावर्थौ विधीयेते शस्तव्यमेतावतावविहृतं स्यमिति। एतदुक्तं भवति। विहृतस्य स्तो
त्रियानुरूपावुक्तौ ताभ्यामूर्ध्वमविहृते यदुक्थ्य तदेव शंस्तव्यं। स्तोत्रियानुरूपौ तु प्रसाम्नानान्निवर्तेते इ
ति। एवं शस्त्र मात्रातिरेकोर्थः। अपरस्तु विहृतस्येत्यभिहितस्य वचनात्सर्वत्र विहरणे प्राप्ते ऊर्ध्वं स्तोत्रियानु
रूपाभ्यामिति विहरणस्य विषयो नियम्यत इति। अतः स्तोत्रियानुरूपौ नास्माभिर्विहर्तव्यौ विहृतवाने
व पठितवानाचार्य इति गम्यते। तदेतदुक्तं ब्राह्मणे। तद्यदितानदं क्षुर्गुरित्यादिना विहृतानां सु तु वन इत्ये
वमेतेन विहरणस्वरूपमाह। पादान्व्यवधायार्धर्चशः शंसेत्। द्वाभ्यां पादाभ्यामनर्धर्चं तेष्ववसानं भवे
त्। तत्र अनृगंतेपि पणवदस्त्वेवमर्थो। अर्धर्चश इति वचनं। पूर्वासां पूर्वाणि पदानि। पाठत एवास्मिन्न
र्थे सिद्धे पुनर्वचनं गायत्र्यः पंक्तिभिरिति अत्रं पंक्तिपदानां पूर्वापरयोर्द्वयोरेवाव्यवधानं भवति। गायत्री
पाठक्रमानुसारेण त्रयाणामप्यवधानं स्यात्। तदा पादान्व्यवधायेत्येन द्वारोन्मारितमिति पाठक्रमस्यागः

(123)

स्यातन्निवृत्स्यागः स्यातन्निवृत्स्यर्थमिदमुच्यते। गायत्र्यः पंक्तिभिः। विहर्तव्य इति शेषः। पंक्तीनां तुदे
देहेपरे शिष्येतेनाभ्यां प्रणुयात्। इंदनवस्तुभं। प्राप्त एवायमर्थ उच्यते। अभ्यासेन पंक्तिपादसाम्य।
गायत्रीपादानां न कर्तव्यमित्येवमर्थं। तेनान्यत्रन्यूनाधिकपादयोर्विहारे कर्तव्येऽभ्यासेन पादसाम्यमा
पाद्योर्विहरणं कर्तव्यं महाव्रतादौ विसेतत्साधितं भवति उष्णिहो बृहतीभिः रूष्णिहां न समान्यादानौ
कुर्यात्। अक्षरपादविभागे क्रियमाणे व्यंजनान्युत्तरांगमिति स्मर्तव्यं। चतुरक्षरमाद्यं। ततोऽष्टाक्षर।
मिति शेषः। एवं चतुरो भागान्कृत्वा बृहतीपादौ विहर्तव्यमित्यर्थः। द्विपदाश्चतुर्धा कृत्वा प्रथमां त्रि
ष्टुभोत्तरा जगतीभिः। अत्र द्विपदाश्च तस्रस्तासर्वाश्चतुर्धा कर्तव्यः। प्रथमाः पांसवैर्भागाव्यूहेनाव्य
हेन पंचाक्षराः। उत्तरास्तु चतुरक्षरा भागः १ तत्र च प्रथमां त्रिष्टुभा विहरेत् उत्तरास्तिस्रो जगतीभि
:। विभागे क्रियमाणे व्यंजनान्युत्तरागमिति स्मर्तव्यं। उत्तमायाश्चतुर्थमक्षरमंत्यं पूर्वस्यायमुत्तर
स्य। उत्तमाया द्विपदायाश्चतुर्थमक्षरं तत्प्रथमस्य भागस्यांत्यं भवति तदेव द्वितीयस्यायं भ।

ए॰म॰
१७५

वति। अनुष्टुभमतिछंदस्स्ववदध्यात्। प्रचेतन्नेत्येतामनुष्टुभमतिछंदस्सु स्ववधाय शंसेदित्यर्थः। इत्थमव
दध्यादित्याह। द्वितीयतृतीययोस्तृतीययोरवः पादयोरवसानत उपदध्यात्प्रचेतनेति पूर्वस्यां प्रचेतयेस्तु
तरस्यां। अनुष्टुभः प्रथमपदं द्विधा कृत्वा धिषिवीमांस्ता कंजा तरस्वनयोश्चैचोस्तृतीयपादावसानउ
पधाय उत्तत्रावस्येत्। प्रचेतननेति द्वितीयस्य। प्रचेतयेति तृतीयस्यामित्यर्थः। उत्तरास्वितरान्पादान्वष्ट
न्कृत्वानुष्टुप्कारं शंसेत्। उत्तरासु प्रोषस्मा इत्येतास्वित्यर्थः। इतराननुष्टुभो द्वितीयतृतीयचतुर्थामि
त्यर्थः। एतान्पादानुत्तरास्तृ ऋषुयथासंख्येन षष्ठान्कृत्वा एकैकां ऋचं द्वे द्वे अनुष्टुभौ कुर्यात्। ऊर्ध्वं स्तोत्रि
यानुरूपाभ्यामातो विहृतः। स्तोत्रियानुरूपाभ्यामूर्ध्वं प्रोषस्मा इत्येतदंतो यः शस्त्रावयवः स विहृतो
भवति। एतावत एव विहृतत्वे सिद्धे विहृतवचनं विहृतधर्मस्य प्रतिगरादेरेतावत्येवेति नियमार्थं। तेन स्तो
त्रियानुरूपयोरपि विहृतप्रतिगरो न भवति। अनुष्टुभानामुपितृचानां विहृतस्येत्यधिकारात्। कथं।
चिद्विहरणं प्राप्नुयात् निवृत्त्यर्थं चा। तत्र प्रतिगर ॐ थामोदैवमदेमदामोदैवोमथेति। द्वावेतौ प्रतिग

(1174)

वृ॰सू॰६
१७६

शेत तत्रैकवचनं जात्यभिप्रायं तत्र ग्रहणं यत्र यत्र विहृतो भवति तत्र तत्रैतौ प्रतिगरौ भवत इत्येवमर्थं
। ॐ थामोदैवमदेमदामोदैवेमथेत्येवमेतौ प्रतिगरौ । याज्यां जपेनोपसृजेत् । मिश्रयेदित्यर्थः । तमु-
पसर्जनप्रकारं स्वयमेव पठति । एवा त्वेवा पाः पूर्वं षांहरिवः सुतानामेवाहीं इ । अथो इदं सवनं केव
लंते । एवा हि शक्रो ममद्धि सोमं मधुमन्तमिन्द्र वज्री हि शक्रः सत्रा वृषं जठर आवृषस्वेति । लक्षत एव
सिद्धस्य पुनः पाठप्रयोजनं च पदसंधिषु संध्यं पदक्षरं तस्याप्यूहेनापरलोमस्यापि पूरणार्थं प्लुहारि
न कर्तव्यमित्येवमर्थं । समानमन्यत् । योयं विहृतस्य विशेष उक्तः ततोन्यत्सर्वमविहृतेनेत्यर्थः
। स्तोत्रियायनिविदे परिधानीयायाश्चाहावः । अयमपि विहृतस्यैव विशेषः । आहावनियमोनु
रूपतद्नंतरयोः प्रतिषेधफलः । तेनाविहृतस्य पंचाहावत्वं भवति । आहृतषोडशिपात्रं समुपहावं
भक्षयंति । इदं विहृताविहृतयोः साधारणं षोडशिपात्रमिति विशेषणात् आहृतमिति प्राप्तानुवादः
। समुपहाववचनं येऽग्नेभवैक्ष्यंति तेषां सर्वेषां परस्परमुपहवयाचनप्राप्त्यर्थं न वषट्कर्तृहोम

राम॰
१७६

कर्त्रोरेव परस्परमिति प्रदर्शनार्थं । अत्रैते भक्षयितार इति स्याह । घर्मे च भक्षिणः । प्रथमता वषट्
कर्तृहोमकर्त्रोरौ घर्मे यैर्भक्षिणस्ते चेत्यर्थः । मैत्रावरुणस्त्वय श्छंदोगाः । सुब्रह्मण्य एव वर्जिताः । इंद्र षोडशिन्नो
जस्विंस्त्वं देवेष्वस्योजस्वंतं मामायुष्मंतं वर्चस्वंतं मनुष्येषु कुरु । तस्य त इंद्र पीतस्यानुष्टुप्छंदस उप
हूतो भक्षयामीति भक्षजपः । एष भक्षमंत्रः । इत्यंतः षोडशी सध्याहारः कर्तव्यः ॥ ३ ॥ अतिरात्रे पर्या
याणामुक्तः शस्योपायो होतुरपि यथा होत्रकाणां । उक्तः षोडशी । इदानीमतिरात्र उच्यते १ तस्मिन्न
तिरात्रे वक्ष्यमाणो विधिर्भवति । तदधिकारार्थमतिरात्रस्य निवचनं वक्ष्यमाणानि ह्यादशशस्त्राणि
पर्यायाश्च युच्यंते । तेषामापातिचत्वारि प्रथमः पर्यायः मध्यमानि मध्यम उत्तमानि उत्तम इत्येवमा
मविशेषः पर्यायाणां एषां शस्योपाय उक्तः तत्र होतुर्होत्रकाणां च यः साधारणः न तत्र विधेयम
स्ति । यः पुनर्होत्रकानुद्दिश्य विहितः शस्योपायः स यथा होत्रकाणां भवति होतुरपि तथैव भवतीत
थैव भवतीत्यत्र विधीयते । उक्तग्रहणमुक्तस्यैवायमतिदेशो न वक्ष्यमाणस्येत्येवमर्थं । तेन निर्हासे

175

ना·वृ०
१७७

होत्रसंबंधो नास्तीति गम्यते वक्ष्यमाणत्वादिति। प्रथमे पर्याये होतुराद्यां वर्जयित्वा प्रस्तुतं स्तोत्रिया
नुरूपेषु प्रथमानि पदानि द्विरुक्त्वावस्यंति। प्रथमे पर्याये स्तोत्रियानुरूपास्तेषामाद्यस्याद्याम-
र्धं वर्जयित्वा अन्यासु सर्वास्वृक्षु प्रथमानि पदानि द्विरुक्त्वा तत्रैवावस्येयुरित्यर्थः। शिष्टे सम
स्तित्वा प्रणुवंति। शिष्टो यो पादो तो समस्य प्रणवं कुर्वंति। ऋगंते प्रणवविधानं समाहार्यत्वा
दर्धर्चानां संदेहनिवृत्त्यर्थं। सर्वे सर्वासां मध्यमे मध्यमानि प्रस्ताय ऋगंतैः प्रणुवंति। प्रस्तुतं
स्तोत्रियानुरूपेष्विस्स उवर्तते। सर्वत्र स्तुतरार्थमिति सर्वासामिति होतुराद्यां वर्जयित्वेत्येत-
न्निवृत्त्यर्थं। प्रास्तायेति कस्मात् मध्यमानि पदानि सकृदुक्त्वावसाय तान्येव प्रस्ताय तैः ऋ
गंतानि संधाय ऋगंतैः प्रणुवंतीत्यर्थः। उत्तमास्तूत्तमे। सर्वे इति संबध्यते। न त्वत्राच्छावाकसं
ग्राहार्थं भवति। उत्तमे पर्याये स्तोत्रियानुरूपेषु सर्वासामृचामुत्तमानि सैं पदानि सर्वे सा
च्छावाकाद्विरुक्त्वा तैरेव प्रणुयुरित्यर्थः। चतुरक्षराणि त्वच्छावाकः। उत्तमे पर्याये आच्छावाकः उत्त

राम
१७७

मे पादे अनंतरश्चतुरक्षराणि द्विरुक्त्वा प्रणुयात्। अच्छावाकस्य पदाभ्यासश्चतुरक्षराभ्यासश्चोभयं
विधीयते। नत्वार्थाद्विकल्पो भवति नत्वत्र तु राद्येन व्यवस्था विकल्प इत्ययं विशेष उच्यते। यत्र गायत्र्य
स्तत्रयोपादाभ्यासः। यत्रोष्णिहस्तत्र चतुरक्षराभ्यास इति। चतुःशस्त्राः पर्यायाः। उक्तार्थमेतत्।
होतुराद्यं। शस्त्रं भवतीति शेषः। त्रिषु पर्यायेष्वेयं भवति सुरत्वा दैव होतुराद्यमेव भवति। वच
नप्रयोजनमाद्यशास्त्रस्य होत्रासंबंधकरणं तथेन रैरितरेषामिति। तेन प्रथमादौ तेष्वेवमादौ स
स्वमेव शास्त्रं शंसेयुरित्येतत्साधितं भवति। अतिरिक्तेषु चानेन क्रमेण शास्त्रिणां शस्त्रसंबंधः सि
द्धो भवति। याज्याभ्यः पूर्वे पर्यासाः। याज्याभ्यः पूर्वाणि यानि प्रतीकानि तानि तानि पर्यासंज्ञानि
भवंति। पातमावो अंधसो पादुशिष्मं धसं स्मभुवः सत्रासाहमिति सक्तशेषोभिस्यं मेषमध्वर्यवो भ-
रतेंद्राय सोममिति याज्या भवइंद्राय मादनं प्रकृतान्यृजीषिणः प्रतिष्कृताय वो धृषदिति पंचदश
दिव ऋश्विरस्येति पर्यासः सनोनव्येभिरिति चास्य मदेषु रुवं पासि विद्वानिति याज्या वयमुत्वा नदिर

176

ना॰ दृ॰
१७८

थावयमिंद्र त्वायवोभिवार्त्रहत्यायेस्तुनमासुद्ररेरिंद्रो अंगमभिन्मघवाचमस्तुधन्तस्यहरिवः पिवेहे
तियाज्येंद्रायमद्वनेसुतमिंद्रमिन्द्राथिनोवृहदिंद्रसानसिमेतोन्विंद्रंस्तवामेश्णनं मानो अस्मिन्मघ।
वन्निंद्र पिबतु भ्यंसुतोमदायेतियाज्यायंनरंद्रसोमोयं तेमानुषेजनउग्रेरभीसुनमासुद्ररे
रहं स्तवमपाप्यस्याधसोमदायेतियाज्या तूनरइन्द्रस्तुमंतमा प्रद्वमापरावतोनस्तन्यंवा।
ळाकरमिस्तस्त्वावीखयंतीरहंरापातासुनमिंद्रो अस्तुसोमंहंता वृत्रमिति याज्याभिमिस्वावृ
षभासुनेमिमगोपतिंगिरानूनरइंद्रमध्यगितिसक्ते अश्वावतिप्रोग्रांपीतिकृत्स्नइयमिंससा
मितियाज्येदंनसोसुतमंधइंद्रेहिमत्स्यंधसः प्रसम्राजमुपकृमस्वाभरधृषता नरस्मैनत्म
मस्यपिवयस्यजत्तानरंद्रेतियाज्येदंत्सन्वोजसामहांइंद्रोय ओजसासमस्यमन्यवेविशाद्
तिद्विश्वजिनेतिष्टाहरीरथआयुज्यमानेतियाज्यात्वेनानिषीदंतातशात्रवागहिनकिरिं
द्रत्वदुतरइस्तुनमासुद्ररेळूनेदधामीदंसेत्वात्रमिंद्रपानमिनियाज्यायोगेयोगेनवस्तरइंज

राम॰
१७८

निवधमरुषंयरिंद्राहंमतेमरऊतीशचीवस्तववीर्येरतोनियाज्येंद्रः सुतेषुसोमेषुयरंद्रसोमपानमआधा
येअग्निमिंधतइतिसमद्राय इंद्रचमसेषासोमः प्रवः सतां प्रोज्ञेतोहरयः कर्मायमन्निति याज्या। अत्र
मध्येपर्यासवचनमत्तुनमस्यापिपर्यासत्वसिध्यर्थं। पानमावः १ प्रवइंद्राय २ वयमुत्वा ३ इंद्रायम
द्वने ४ अयंनरइंद्र ५ आतून: ६ अभित्वावृषभा ७ इदंवसो ८ इदंह्यन्वोजसा ९ आत्वेता १० योगेयोगे ११ इं
द्रःसुतेषु १२ एतेत्रयः पर्यायाः। नकिरिंद्रेत्येतत्सादव्यहरणेपिसत्कमेसत्कमेवउतमासुद्ररेदितिवाक
शेषात्। इतिपर्यायाः। इत्येतेपर्याससंज्ञाभवंतीत्यर्थः। पर्यासवर्जंगायत्राः। छंदोनिर्देशः स्तोमा
तिशंसनार्थमावापेकृतेऽप्येगायत्राणामेवावापसिध्यर्थं॥४॥ संस्थितेष्वाश्विनायस्तुवते। अतिरा
त्रस्यस्तुवतेने आश्विनइतिशास्त्रनाम। पर्यायेषुसमाप्तेषुछंदोगा आश्विनायशस्त्रायस्तुवते।
अनेनआश्विनारंभकालोविहितोभवति। शंसिष्यन्विसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेजान्वा॰
च्याहुतीर्जुहुयादग्निरज्वीगायत्रेणछंदसानमत्र्यांतमन्वारभेतस्मैमामवतुनस्मैस्वाहा। उषाअ॰

178

ना·वृ· ०
१७९

श्विनी त्रैष्टुभेन छंदसा तामश्यां तामन्वारभे तस्यै मावतु तस्यै स्वाहा। अश्विनावश्विनौ जागतेन छंदसा ताव
श्यां तावन्वारभे ताभ्यां मामवतु ताभ्यां स्वाहा। बल्महं असिसस्येति द्वाभ्यामिदं वो विश्वतस्परीति
च। शंसिष्यन्निति वचनप्रतिषिप्रवर्तनो यदि शंसेत् तदा जुहुयादित्येवमर्थं। विसंस्थितसंचरेण।
ग्रहणं संस्थिते स्थितिसंस्थितशब्ददर्शनात्संस्थाशंका प्राप्नोतीति तन्निवृत्त्यर्थं। एताः षडाहुतयः
।चशब्दो होमे मंत्रसमुच्चयार्थः। तेनाज्यप्राशनवत्त्वीमेव भवति। प्राश्याज्यशेषं नाचामेदित्याय।
तेदेवरथो वा एष यद्धोतानाक्षगर्भिः करवाणीति। होमार्थमेव धृतस्य परिशिष्टं यदाज्यं तस्या
श्रीयात् प्राश्य च अप उपस्पृशेत्। शुध्यर्थमाचमनं न कुर्यात्। अनाचमनेकारणत्वेन श्रुतिरे
व दर्शिता। सैषा श्रुतिर्देवरथ इत्यादि। होता देवानां रथस्तस्य वर्त्मचक्रे। जिह्वा अक्षः। मम देव
रथभूतस्य होतुरक्षभूता जिह्वामाज्येन स्वक्तां नो भिः प्रक्षालयामीति श्रुतेरर्थः। अनेन प्रका
ग्राश्रा· रेणाशुचित्वमेवास्तीति गम्यते। प्राश्य प्रति प्रसर्प्य पश्चात्स्वस्य धिष्ण्यस्योपविशेत्समस्तजंघोरुर श्रम·
१७९

त्निभ्यां जानुभ्यां चोपस्थं कृत्वा यथा शङ्कुनिरस्यति ष्यन्। प्राश्य प्रति प्रसर्प्येति वचनमस्य प्राशनाशुचित्व
कारणाभावादंतः सदस्य यद्वाशनमविरुद्धमिति प्रसक्त्या पिप्राश्नीयादिति तन्निवृत्त्यर्थमुच्यते। पश्चा
त्स्वस्य धिष्ण्यस्येति वचनं प्राग्नरत्नु वा कन्यायविधानाद्द्विधी न उपवेशनाशंकानिवृत्त्यर्थं। जंघा च ऊ
रू च एव्यंगत्वादेकवद्भावः। जंघोरु जंघोरु चेति जंघोरुणी ते समस्ते यस्य सः समस्तजंघोरुः। एवंभूतो रत्नि
भ्यां जानुभ्यां जानुभ्यां चोपस्थं कृत्वा भूमिमाश्रित्येत्यर्थः। पादांगुलीभिश्च। भूमिमाश्रित्यैव मुप
विशेत्। एवमुपविष्टः शङ्कुनिरिवास्यतिष्यन्भवति। एतदासनं शास्त्रादौ य आहावस्तदुच्चारणसमका
लएव नोपरिष्टात्। एतेनु शङ्कुतिरिवास्यतिष्यन्नाह्वयीतेति श्रुतिवचनाल्लभ्यते। उपस्थं कृत्वेत्त्वे।
वाश्विनं शंसेत्। उपस्थं कृत्वा इति यथा मक्तु उपविष्टः इत्यर्थः। आश्विनाधिकारे पुनराश्विनग्रह।
णं आहावाहर्ध्वमर्वमाश्विनं उपस्थं कृतएव शंसेत्तु इत्येवमर्थं। तेन शङ्कुनिरिवास्यनिष्यन्निति व
चनप्रथमाहावस्यैव न परिधानीयाहावगम्यते। अग्निर्होता गृहपतिः सराजेति प्रतिपदेकपातिनी पठ

ना॰ वृ॰ स॰
१८०

ःप्रतिपद्वचनं ब्राह्मणोक्तस्य प्रतिपदस्य निवृत्त्यर्थं। एषैव प्रतिपत्स्वतीति प्रतिपद्वचनान्नच त्वार्धर्चशं
सनप्राप्तौ तन्निवृत्त्यर्थमेकया तिनीपञ्चदर्श्युच्यते। एतयाग्नेयं गायत्रमुपसंतनुयात्। एतया प्रतिप
दा प्रातरनुवाकार्थस्य समाम्नायस्याग्नेयं गायत्रं यत्तदुपसंतनुयात् तेनापोरेवतीरिति द्यम
उ नभवति आग्नेयमित्येतावतैव सिद्धे गायत्रमिति वचनमाग्नेयस्य कृत्स्नस्य शंसनार्थं। प्रातर
नुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत्। प्रातरनुवाकन्यायेनेति सप्तछंदः
सूक्तग्रहणं। नान्यैगग्नेयं गायत्रं। यथास्थानं ध्रुवाणि मांगलानि। ईड्ये द्यावीयमावर्तयेदातममो
पयानादित्येवमादिः। शास्य विषयोन्यापारतिदिश्यते कृतनरेविषय उत्सर्पणादिः। स्वरस्तु तृतीय
सवनत्वादुत्तम एव। तस्यैव समाम्नायस्येति प्रातरनुवाकार्थस्येत्यर्थः। सहस्रावममितियस्य श
स्त्रस्यर्चां सहस्रमवममात्रानन्तसहस्रावममित्युच्यते। तदुदयात्प्रागेव शंसेत्। उदयो नाम उ
आदित्यमंडलदर्शनमात्रमदर्शने अनुदयः। तेनात्राभिविधेरसंभवान्मर्यादैव गृह्यते। तेनोदितेय

रा॰म॰
१८०

छस्यंतद्दृजेपि त्वैव सहस्रावममित्युक्तं भवति। बार्हतास्त्रयस्तृचास्तोत्रियाः प्रगाथा वा तान्पुरस्तादनु
दैवतस्वस्य छंदसो यथास्तुतं शंसेत्। बार्हता बृहती छंदस्का नाम नेत्रयस्तृचा अग्न्युषोश्विदैवत्याः
संधिसाम्नस्तोत्रियास्ते छंदोगैः क्रियंते बार्हता वा प्रगाथास्तास्तृचान्प्रगाथीन्वा यथादैवतं बृहतीछं
दसः पुरस्ताद्यथास्तुतं शंसेत्। सर्वमन्यद्यथास्तुतमित्यनेनैव सिद्धे पुनर्यथास्तुतवचनमत्राम्नाना
नां यथास्तुतत्वेन स्वस्यछंदसः पुरस्ताद्यथादैवतं शस्तानां उनः स्वस्वस्थाने शंसननिवृत्त्यर्थं। येषु वा
न्येषु। अन्येष्वप्यपि च केषुचिच्छंदः सुपरिस्तुतः तथापि यथादैवतं स्वस्य छंदस एव पुरस्ताच्छंसेदित्
यर्थः। पञ्चो द्विपदाः द्विपदाः पञ्च शंसेत्। अत्र द्विपदानां बहुत्वासंभवात्सर्वोर्थोयं विधिरित्यवगम्यते।
उपसंतनुयादेकपदाः। एकपदाः पूर्वेण प्रणवेनोपसंतनुयात्। ताभ्यश्चोत्तराः। ताभ्य एकपदाभ्योपा
उत्तराः ऋचः ताश्च एकपदांतगैः प्रणवैरुपसंतनुयात्। एकपदा नाम त्र पञ्चत्वासंभवादयमपि विधिः
सर्वार्थ एव। एकपदाद्विपदानां प्रातरनुवाकेऽदृष्टस्योपसमासस्यापवादार्थोयं यत्नः। विछंदस उद्दरे

179

न। विछंदसो विरूढशस्यछंदसः। नाश्चैवंप्रकारा वेदितव्याः। अर्धर्चशस्येषु पच्छः शस्याः। पच्छः श-
स्येषु चार्धर्चशस्या इति। ताउद्देरेन। अपि वा तन्यायेन शंसनं। अपि वा नैवोद्धारः कर्तव्यः। तन्यायेन सू-
क्तन्यायेन शंसनमुद्धारो वेति विकल्पइत्यर्थः एवं विकल्पे प्राप्ते अर्धर्चशस्यगतानां पच्छः शस्यानां सू-
क्तन्यायेनार्धर्चशंसनमविरुद्धं बहुचिद्दृष्टपूर्वत्वादिति। तत्रोद्धारन्यायशंसनयोर्विकल्पउपपद्यते।
एवं पच्छः शस्यगतानामपि अर्धर्चशस्यानामुद्धारपच्छः शंसनयोर्विकल्पे प्राप्ते तन्निवृत्त्यर्थमाह।
न तु पच्छोन्याः त्रिष्टुब्जगतीभ्यः। अत्रायं विशेषः। पच्छः शस्यगतानामर्धर्चशस्यानां पच्छः शंसने
कर्तव्ये त्रिष्टुब्जगतीभ्योन्यायाऋचस्त्रिष्टुब्जगतीसूक्तमध्यगतास्ताः पच्छो न शस्तव्या इत्यर्थः। कथं
तर्हि तासां कर्तव्यमिति। उद्धारस्तछंदो न्यायेन वा शंसनं। एतदुद्धारवचनं सूक्तत्वीन्यायशंसनवचनं।
चाश्विन एव शस्त्रे अन्यत्र सर्वत्र तछंदोन्यायशंसनमेवेति सिद्धं। विछंदस उद्देरेन। अपि वा तन्यायेन शं-
सनं। एवं वानयोः सूत्रयोरर्थः। प्रातरनुवाकार्थे समाम्नाये गायत्र्यादिवचने षु सत्स्वपि नासां स्वरूपत-

एव गायत्र्यादित्वे सिद्धे पुनर्गायत्र्या यं तन्वेता नामन्यछंदसामुद्धारार्थमिति मन्यमानो विछंदस इत्युक्तवाना-
चार्यः स्वयमेव। एवं प्राप्ते आह। अपि वा तन्यायेन छंदसं। अपि वेति पक्षव्यावृत्त्यर्थः। नैव गायत्र्यादिव-
चनादेवोद्धारः कर्तुं शक्यते। तत्र प्रकरणे उद्धारवचनाभावात्। गायत्र्यादिवचनस्य प्रसवत्वादस्त्वेन
प्रापिकत्वसंभवाच्च। अतस्तासां तन्यायशंसनं कर्तव्यं। तत्र यासां सूक्तन्यायशंसनमुपपद्यते तासां त-
था भवति। यासामेवं न संभवति तासं छंदोन्यायशंसनमिति सिद्धं भवति। पांक्ते नोदिते सौर्याणि प्रतिप-
द्यते। उदिते आदित्ये प्रतिपत्तमभिस्त्यस्योनमेन प्रणोवेन सूर्यो नोदियादस्येतत्संधाय वैतदाग्नि सौ-
र्याणि सूक्तानि शंसेदित्यर्थः। उदिते सौर्याणीत्युनेनैवास्मास्वान्कनमुदयास्त्वागेवेति सिद्धे यदोदेतोः शं-
सेदिति वचनं तस्यैतन्नस्ययोजनमोदेतोः शंसेदेवमोयरमेदिति। तैनेन्द्वेयावीयावर्तनेनान्येन वा ओर-
यादनुपरमं शंसेत्। अयमेवार्थो भगवता पस्तंबेनोक्तः। यस्याश्विने शस्यमाने सूर्यो नाविर्भवति स-
र्वा अपि दाशतयी रनुब्रूयादिति। सौर्याणीति वचनमेषां चतुर्णां सूक्तानां सौर्याणीति संज्ञाकरणा

184

र्थं। तैनैनानिरिवैवाध्येतव्यानि सोघोली सुक्ते एतान्येव प्रस्येतव्यानि चेति। सूर्यो नो दिव उडुसंज्ञातवे
दसमिति नवर्चं चित्रं देवानां नमो मित्रस्य। इंद्र क्रतुं न आ भरा नित्या श्परनो तुमो बहवः सरचक्षसर
ति प्रगाथाः। मही द्यौः पृथिवी च न स्तेहिद्या वा पृथिवी विश्व शंभुवा। विश्वस्य देवी म्रचयस्य जन्म
नो न या रोषामिति निग्रभ दिति द्विपदा वचनं पंक्तिः शंसनार्थं बृहस्पते अति यदर्यो अर्हादिति परिधा
नीया। परिधानीया वचनं विस्पष्टार्थं। प्रतिपदे परिधानीया इत्याहावः। प्रतिपद्यत्राम आहावो वि
धीयते। अनुचराभावात् वत्साभावाच्च नेयं लाक्षणिका प्रतिपत्। परिधानीयाया विधानं प्रगाथ
स्तोत्रियेष्वाहावनिवृत्त्यर्थं। बृहत्साम चेत्तस्य योनिं प्रगाथे पुरस्ताद्वियांवा। संधिस्तोत्रे रथंतरं सामे
षु त्सर्गः। तत्र यदि बृहत्साम कुर्युस्तदा तस्य बृहतो योनिं त्वामिद्धि हवामह इति द्वृचमेतेषु प्रगाथेषु द्वि
तीयामिंद्र क्रतुमित्यस्याः परिष्टात्तृतीयामभिलेखस्योपरिष्टादित्यर्थः। एतयोरन्यतरस्मिन् क्रमे
शंसेत्। नवा। कृतेपि बृहत्सामनि बृहतो योनिं न शंसेदित्यर्थः। आश्विनेन ग्रहेण सपुरोडाशे

न चरंति। आश्विनेनेत्याश्विदैवत्येनेत्यर्थः। ग्रहेणेति प्रदर्शनार्थं नार्थं। ग्रहेण वा चमसेन वा सपुरोडाशेन व
रंतीत्यर्थः। इमसोमासस्तिरो अह्न्यासस्तीत्रा स्तिष्ठंति पीतये यव भ्यां हविष्मता नासत्या रथेना यातमुप भ
तंपिबध्या इत्यनुवाक्या होताय क्षदश्विना सोमानां तिरो अह्न्यानामिति प्रैषः प्रवामंधासि मद्यान्यस्थु
रुभा पिबतमश्विनेति याज्ये अध्यधीमन्वानं। अत्रार्द्धचोरेवद्विलं नयाज्या कार्यस्य। अत्राश्विनेने
ति देवताविधानं नेयं शस्त्र याज्येति ज्ञापनार्थं। यदेतस्य पुरोडाशस्य स्विष्टकृता चरेयुः पुरोडाशः अग्ने
पचतोग्नेर्धाने आकृतिमिति संयाज्ये। इत्यंतो निराचरतिशे॥५॥ यदि पर्यायानभिस्तुछेत्सर्वेभ्य एकं
संभरेयुः। एवं तावच्चतुर्विधः सोमयागो ज्योतिष्टोमाख्य उक्तः। तस्यैव विशेषपरिष्टाद्वक्ष्यति। अत्रा
तरालेपर्यायाश्विनप्रसंगेनतेषां नैमित्तिकमपि वक्तुं प्रारभते। यदि पर्यायानभिस्तुछेदिति। अस्याय
मर्थः। यदा सर्वे पर्यायाः प्रयुक्ता न भवंति यद्येव माशंका स्यादतिक्रांतप्रायारात्रिः सा पर्यायाणा
माश्विनस्य चापर्याप्तेति तदा सर्वेभ्यः एकं पर्यायं संभरेयुरित्यर्थः। एतमेवार्थं विवृणोति। अथ

सू.स.
१८२

माध्यंदिनाद्द्वितीयान्मैत्रावरुणो ब्राह्मणाच्छंसी चोन्नमारच्छावाकः। प्रथमास्त्वर्यायाद्धोतास्तु शस्त्रमाददीत।
मैत्रावरुणब्राह्मणाच्छंसिनौ द्वितीयात्वे शस्त्रे। उन्नमादितरः स्वमेव शस्त्रमिति। द्वौ चेद्द्वौ प्रथमाद्द्वाउन्न-
मात्। प्रथमः पर्यायः प्रयुक्तः मध्यमोन्नमाव प्रयुक्तौ तयोराश्विनस्य चापर्यामाशात्रिरित्याशंक्यास्मा-
त्तदैवं कुर्युः। द्वौ होतृमैत्रावरुणौ प्रथमाद्ब्राह्मणाच्छंस्यच्छावाकावुन्नमादिति। अत्र प्रथमादिति वि-
चनमप्रयुक्तयोरेव प्रथमान्मध्यमादित्यर्थः। अत्र द्वयोरधिकृतत्वादंत्यस्य द्वितीयत्वेऽप्युन्नमश-
ब्दप्रयोगादन्यत्रापि द्वयोरसंस्योन्नमत्वं साधितं भवति। तेनान्यत्राद्यउन्नमादित्ययं विधिर्द्विरात्रेऽप्य-
ते भवति। अपि वा सर्वे स्युस्तोमनिर्ह्रासाः। अपि वा सर्वे स्तोमनिर्ह्रासा भवेयुः। न संभरणमिति। स-
र्वेव चनं पूर्वो द्वयोरभिप्लुष्ट्योः संभरणनिवृत्त्यर्थं। अयं स्तोमनिर्ह्रासो होत्रकाणामेव भवति। न
होतुरित्युक्तं। उक्तः शस्त्रोपायः तत्र उक्तग्रहणेन स्तोमनिर्ह्रासार्थस्यनेनैन द्विधीयते। पूर्वे पंचद-
शस्तोमाः संतः पंचदशस्तोमा भवेयुरिति। होतुस्तु पंचदशस्तोमा एव सर्वत्र स्तोमनिर्ह्रासेसेवंशा

एम०
१८२

स्यनिर्ह्रासमरस्याह। ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोन्नमांस्तृचांछंसेयुः। स्तोत्रियानुरूपास्तावद्यथापूर्वं भ-
वंति। तेभ्य ऊर्ध्वं यच्छस्यं अस्ति तस्यादितस्तृचानुग्रहीयुरंततश्च। एवंच त्वारस्तृचा भवेयुः। एतस्य माणा-
नि होत्रकशस्त्राणि भवेयुः। होतुस्तु पूर्ववदेव। निर्ह्रास एवैकस्मिन्। पूर्वयोरभिप्लुष्ट्योः संभरणनिर्ह्रास-
योर्विकल्प उक्तः। अत्र संभरणस्यासंभवे निर्ह्रास एवैको विधीयते। तेनोत्तरस्त्र्यहे विहितं होतृवर्जनं सर्वा-
स्वभिप्लुष्टिषु साधारणं भवति नानंतरायामेवाभिप्लुष्टौ। होतृवर्जमित्येके। एके शाखिनो होतृवर्जमे-
व निर्ह्रासं कुर्वंति। आश्विनाय्यैकस्तोत्रियोऽग्ने विवस्वदुषस इति। इदं चाभिप्लुष्टिनिमित्तमेव। तत्पुरस्ता-
दनुदैवतं स्वस्यच्छंदसो यथास्तुतं शंसेत्। तं स्तोत्रियमाग्नेयक्रतो बृहती छंदसः पुरस्तात्सकृच्छंसेत्।
अनुदैवतमिति नात्र वीप्सा विवक्षिता। यथास्तुतमिति पूर्ववदेव। त्रीणि षष्टिशतान्याश्विनं। आश्विने
देशेनाम्याः संख्यायाः विधानात्स्यात् यन्मांगलयासौ योरीनि च तस्यामेव संख्यायामंतर्भवती सवगत-
यं। प्रायश्चित्तप्रसंगादन्यान्यपि सोमप्रायश्चित्तान्यत्रैवोच्यंते। विमतानां प्रसवसंनिपाते संसवोऽन

(182)

तर्हि नेषु न द्यावापर्वतेन वा। विमना विरुद्धमतयः। विद्विषाणा इत्यर्थः। असपत्नवशाद्धेन सुत्यालक्ष्यते। न द्यावापर्वते नवा अव्यवहितदेशे विमनानामेकस्मिन् हरिसुत्यासंसवो नाम वो नाम दोषो भवती। त्यर्थः। न द्यावापर्वतेन वेत्युभयत्र वाशब्दप्रयोगादन्यदपि व्यवधायकं शास्त्रान्तरोक्तमस्तीति गम्यते। तच्च शास्त्रान्तरादवगन्तव्यं। अप्येके नाहि नेषपि। विमनानां नपारिभिरनंतर्हिते ष्विति च विशेषणा तच्च शास्त्रान्तरादवगन्तव्यं। अप्येके नाहिनेष्वपि। विमनानां नपि संसवदोषो स्तीसेको र्थः। अंतर्हि दूयमुक्तं। तदुभयव्यभिचारायाः अपि शब्दद्वयेन संमतानामपि संसवदोषो स्ती सेको र्थः। अंतर्हि तेष्वपि पिदेशेषु संसवो स्तीत्यपरो र्थः। एवमेके शाखिन आमनन्तीत्यर्थः। तथासति संस्तरादेवता वाहनात्। एवं सति आसवनदेवतानामावाहनात्संस्तरणं कर्तव्या। एतदंतं कर्मकायिकं वाचिकं च दुत साहस्रा कर्तव्यमित्यर्थः। लघवश्चोपायाः शतप्रभृत्यादयः प्रयोक्तव्याः। किंच। कयाशुभेति च मरुत्व तीये पुरस्तात्सूक्तस्य शंसेत्। इदं च तस्मिन्निमित्ते कर्तव्यं। मरुत्वतीयशस्त्रे यस्मिंस्तत्के निविद्धीयते त- स्य पुरस्तादिदं सूक्तं शंसेत्। चशब्दो निविद्धानीयत्वसमुच्चयार्थः। तेन तस्य मरुत्वतीयस्य पूर्वावस्था

पामेकसूक्ते। नेकंचेत्प्रथमेष्वाहावस्तस्य माहावः कयाशुभीयाद्यो भवति। द्वित्रादिसूक्ते कयाशुभी यस्यानाद्यत्वादस्यादौ न भवति तत्र सर्वेषामाद्ये भवति आहावः। योजानएवेति निष्केवल्ये। चशब्दः पुरस्तात्सूक्तस्येति चानुवर्तते। तेनात्रापि पूर्ववदेवार्थो योजनीयः। ममाग्ने वर्च इति वैश्वदेवसूक्तस्य। अत्रापि परत्रयमनुवर्तते। वैश्वदेवशस्त्रे वैश्वदेवसूक्तस्य पुरस्तादित्यर्थः। अपि वैतेष्वेव निविदोद ध्यादुद्धरेदितराणि। अपि वाएतेष्वागंतुषु निविदोदध्यात्। येभ्यः पुरस्तादिमानि सूक्तानि सूक्तानि निवि हितानि तान्युद्धरेत्। एवैषां निविद्धानसूक्तानामुद्धारसयोगे नैतेषु निविदौ दध्यादित्ययद्धि दध्याति त त्स्थापय तियस्मिन्निविद्धीयते तस्याव्यवधानेन पुरस्तादेवा तानि भवंति न निविद्धानीयानां पुरस्ता दिति। स्थानं चेन्निविदो तिहरेन्माप्रगामेति पुरस्तात्सूक्तं शस्त्रान्यस्मिंस्तद्देवते दध्यात्। निविदस्थानं यद्यतिहरेन्नदायस्मिंस्तत्के निविदतिपन्ना तत्तैस्सर्वोपरभूतं समाद्यागंतुकान्तदेवतासु रस्तान्माप्रगा- मेतीदं सूक्तं अखंडितं शस्त्रान्यस्मिन्नागंतुके तद्देवसैं तेनां निविदं दध्यात्। निविदस्थानस्थानाति हा-

(183)

वृ॰ सू॰
१८५

रोनामैवंरूपः। सूक्तस्य यस्मिन्नंतरा छेनिविद्धीयते। तस्माद्यापर्वीकृतरंतगतेन प्रणवेनाहावमब्र
वैवानंतरामेव ऋचं संधायतस्यामृचि चोदितेवसानेवसानपर्यंतमुक्त्वा यदावस्येत्। एवंप्रकार ए
व निविदंति हारोनान्यप्रकार इति। अतोन्यथाद्यः प्रमादः स ऋग्दोष एवन निविदंति हारः पुरस्तादु
चनं माप्रगामीयस्य पुरस्तादिति पंन निविल्लंसमाथमाप्रगामीयं शास्त्वान्यन दैवतमानीयत स्मिंनि
विद्धेयस्येवमर्थः। सूक्तग्रहणं बृहस्पतिसवादिष्वपि हीनस्तोमेषु माप्रगामीयस्याखंडनार्थं। अ
त्र किंचिदुच्यते। यदि पर्यायानि सत्र पर्यायानितिकर्मप्रवचनीययुक्ते द्वितीया। अभीतिकर्मप्र
वचनीयो लक्ष्यलक्षणसंबंधद्योतकः। उक्तिविवासे पूर्वः। संभावनायां लिङ्। अत्र पर्यायोपलक्षणं। स्तु
तिर्लक्ष्या। एतदुक्तं भवति। यदि पर्यायोपक्रमेतेषु वा शस्यमानेषु उषः काल आगच्छेत् तदा वक्ष्यमाणं
नैमित्तिकं कर्तव्यमिति॥ ६॥ सोमातिरेके तु न शस्त्रोपजानः। सोमातिरेको नाम सवनार्थो यः सोमः
स सवने परिसमाप्तेप्यतिरिच्येत। तदा सोमादिंतिरेक इत्युच्यते। यदा तु न शस्त्रयोरुपजनो भ

राम॰
१८५

वति छंदोगैः स्तोतव्यमस्माभिः शंसितव्यमित्यर्थः। प्रातःसवने स्तिसोमो अयं सुतनौ गौर्धयति स्तोत्रियानुरू
पोमहां इंद्रो य ओजसा नो देवा अवंतु नर इसैंद्रीभिश्चेति वैश्वदेवीभिश्चेति स्तोममभिशस्यं याजयेत्। पार
ग्रहणे ऐंद्रीभिर्वैश्वदेवीभिश्चेति बहुवचननिर्देशाद्यावदर्थमुभयोग्रहीतव्याः। ऐंद्रीभिर्वैश्वदेवीभिश्चे
ति चशब्दसामर्थ्यात्समुच्चिताभिरेवानयीभिः सोमातिरेकनिमित्तं स्तोममभिशस्य एवकयाद्वाभ्यां वा
प्रातःसवने परिमिताभिरुत्तरयोः सवनयोरित्यनेनान्यनेनन्यायेन। यथा का या चिदैंद्र्यां गायत्र्या याजे-
त। प्रातःसवनत्वाद्गायत्र्येति विशिष्यते। वैश्वदेव्या वा। गायत्र्येति शेषः। ऐंद्रा वैश्वदेव्येति गाणगारिर्दैवतप्रधान
त्वात्। यदैंद्र्या वैश्वदेव्या वा यजेत तदा इयं था वा व शस्त्रमेवं याज्येत द्विरुध्येत। अथ यद्यैंद्रा वैश्वदेव्या यजेत तत
दा तदेवस्या गायत्र्याः अभावान्नगायत्रं प्रातःसवनं इत्येतद्विरुध्येत। तत्रैव कस्य त्यागे सति छंद एव त्यक्तव्यं।
बहिरंगत्वादप्राधान्यात्तस्येति देवतायास्त्वभिधेयत्वादंतरंगत्वेति मन्यमानो गाणगारिर्दैवतप्रधानत्वादि
त्युक्तवान्। सर्वां कर्मणाः समिधा हि नो मीति। सेषा ऐंद्रा वैश्वदेवी त्रिष्टुप्। अनयैव यष्टव्यमिति सिद्धांतितं।

(185)

ना॰ वृ॰ ६
१८६

माध्यंदिनेष्वेवमहं अभि सूर्योदुस्तरस्य दर्शनं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ। महारंद्रोन्नव इन्द्रस्तोत्रे उक्थ्याविश्वासां जनितारमतीनामिति याज्या। ऐन्द्रीभिर्वैश्वदेवीभिश्चैव सा याज्याप्यनुवर्तते। अतो हीनपादग्रहणमत्राक्षरलाघवार्थमेव न कृत्स्नसूक्तग्रहणार्थं। तृतीयसवन उत्तरोत्तरां संस्थामुपेयुरातिरात्रात्। तृतीयसवने यदि सोमोतिरिच्येत तदा उत्तरां संस्थां कुर्युरातिरात्रात्। एतदुक्तं भवति। यद्यग्निष्टोमे तृतीयसवने तिरेकः स्यात्तदोक्थ्यं कुर्युः। यद्युक्थ्ये षोडशिनं। यदि षोडशिन्यतिरेचनं। यदि षोडशिन्यतिरात्रमिति। यद्यतिरात्रे तत्र वक्ष्यतीति। एवं चेदातिरात्रादिति वचनमुत्तरोत्तरां संस्थामित्यत्र संनिहिता एव चतस्रः संस्था गृह्यन्त इत्येवमर्थं। इतरथाग्निष्टोमे तिरेके सत्यग्निष्टोमः प्रसज्येत। षोडशिनि वाजपेयः। अतिरात्रे प्तोर्यामस्तेन तन्निवृत्त्यर्थं आतिरात्रादित्युक्तं। अतिरात्राच्चेत्सततेऽ अप्युशिपि विश्वनाम प्रतद्विभुस्तवने वीर्येणेति स्तोत्रियानुरूपौ। माध्यंदिने तच्छेषः। महारंद्रोन्नवदिति याज्यान्तः शेषमस्तुष्यते। तेषामित्था समरणं शिमीवतोरिति याज्या। इयं याज्या माध्यंदिनोक्ता भवति। अत्याग्निष्टोमवाजपे

राम॰
१८६

यामो र्यामेषु तृतीयसवनेषु सोमातिरेके दरमेव शास्त्रं भवति। सोमातिरेकादन्येन वा निमित्तेन शस्त्राणां तरोक्तेन परिप्लुत शस्त्रोपजनः स्यात्तदाप्यनेनैव सोमातिरेकोक्तेनानुसवनं शस्त्राणि संपादनीयानि। स्तोत्रियस्तुष्टुत एव दनुसारेणानुरूपः कल्पनीयः। एतच्च सोमातिरेके प्रातःसवनेपि सोमरक्षैनावनैवास्यायस्य सिद्धौ सत्यां शस्त्रोपजनस्तस्माद्वचनाल्लभ्यते। एतदुक्तं भवति। यत्र यत्र नैमित्तिकः शस्त्रोपजनस्तत्र तत्रानुसवनमेतेन विधानेन शस्त्राणि कल्पनीयानि। स्तोत्रियानुरूपा च्छंदोगप्रत्ययतदनुसारकल्पनाभ्यामिति॥ ७॥ श्रीतेराजनिनषेदग्धे वा। प्रायश्चित्तं वक्ष्यत इति शेषः। नष्टमस्तु तेनाशप्रकारविशेषाग्रहणात्सर्वप्रकारेणाशोग्रहीतो भवति किमर्थं दग्धवचनमिति। तस्य प्रयोजनमुच्यते नेष्टतावत्स्तोमे द्वादशाभ्यो वसाभुक्ता रिभ्यो मलेभ्योन्येन केशकीटादिना दुष्टे तस्य त्यागो न कर्तव्य इत्येवमर्थं। अस्मदपि दग्धवचनप्रयोजनमस्ति केचिदेवं वदन्ति दग्धे सोमे तदेव भस्माभिषुत्य तेनयष्टव्यमिति तन्निवृत्त्यर्थं चेति। सोमनाशे प्रायश्चित्ते वक्तुं प्राप्ते सदआदीनां शालानां दाहे प्रायश्चि

(187)

ना० सू० ६
१८७

तस्यात्मत्वात्तदेवप्रसंगात् दाह। अपिदग्धानि सदोहविर्धानान्यनाहृतान्क्रियेरन्। अनाहृता अमंत्रका
नित्यर्थः। आहृतावा। समंत्रकं वेत्यर्थः। न्यायविकल्पोयं शालात्वात् तद्वदिष्टार्थाः। तेनासुमंत्रत्वापाः
केवलमदृष्टार्थस्याश्रयभूतात् शाला प्रधानसंबंधे द्वारभूतेत्यर्थः। सचद्वारभावो दाहात्प्रागेव निवृ
त इति न पुनः क्रियामंत्राणामिति पूर्वः पक्षः। उत्तरस्तु पक्षोयत्कार्यार्थं यद् दृष्टमुपादीयते। तस्य तत्कार्य
जनने सामर्थ्यजननाय मंत्रादयः संस्काराः प्रयुज्यंते। तयदि स्वकार्यमकृत्वैव नश्येत् तदा तत्स्थैः क
थं प्रधानेन संबध्यादिति पुनरपि मंत्राः प्रयोक्तव्या इति सिद्धं। इदानीं सोमनाशे प्रायश्चित्तमाह।
अन्यंराजानमभिषुणुयुः। अन्यं राजानमानीय तमभिषुत्य तेन यजेतेत्यर्थः। अनधिगमे पूतीका
न्फाल्गुनानि। सोमानधिगमे पूतीकान्फाल्गुनानि च संसृष्टान्यभिषुणुयुः। पूतीकानाम लतारूपाः
सोमसदृशाः फाल्गुनानिनाम स्तंबरूपा ओषधिविशेषाः अप्रसिद्धाः पदार्थाः अभियुक्तेभ्यः शि
क्षितव्याः। अन्यावा ओषधयः पूतीकैः सह। फाल्गुनानामभावे अन्यावा ओषध्यः कुशदूर्वाद्याः

राम०
१८७

पूतीकैर्मिश्रयित्वाभिषोतव्याः। अन्या ओषधयः पूतीकैः सहेति पूतीकानां स्थापितत्वदर्शनात्पूर्वसूत्रो
क्तानामेभिः सहितानामेव प्रतिनिधित्वमवगम्यते। अत एवाचार्याः सोमप्रतिनिधौ न केवलमेक
द्रव्यमिच्छंति। अन्यावा ओषधयः पूतीकैरिति सहभावे सिद्धे यत्सहेति वचनं तज्ज्ञापयति। पूतीकानाय
मप्यभावे द्रव्यांतराणि सह मिश्रयित्वाभिषुत्यैतैर्यष्टव्यमिति। प्रायश्चित्तं वा कृत्वोत्तरमारभेत। उत्तर
सूत्रस्य सुत्याविषयत्वादिदं दीक्षोपसद्विषयं भवति। दीक्षासु क्रीतोनश्येत् तदा सोमलाभाद्दीक्षा वर्धये
त। उपसत्सूपसदो वर्धयेत। सर्वत्र प्रधानकालाविरोधेनाहर्वर्धनं कर्तव्यं। अहर्वर्धने क्रियमाणे
पि प्रधानकालाविरोधेनालभ्यमाने प्रतिनिधिमुपादाय संकल्पितकाले प्रधानयागं संपादयेत्।
इत्थं वा कुर्यात्। प्रायश्चित्तं कृत्वारब्धं प्रयोगं विसृज्य सोमं संपाद्य तस्मादेव कर्मणः प्रयोगांतरमा
रभेत। भ्रेषत्वाहेतीदं प्रायश्चित्तमित्युच्यते। अथवास्यामवस्थायां शास्त्रांतरे प्रायश्चित्तविशेषो
स्ति चेत्कर्तव्यं। सुत्यासु क्रममेव मन्येत। सुत्यासु नष्टे राजनि तल्लाभे उक्तमेव। प्रतिनिधिप्रयोगमे

186

ना० वृ० ६
१८८

वेत्यर्थः। तत्कर्तव्यत्वेन मन्येते इत्यर्थः। नात्राहर्वृद्धिप्रयोगस्यागो वा कर्तव्य इत्यर्थः। प्रतिधुक्। प्रातः
सवने। प्रतिधुगिति सद्योदुग्धं पय उच्यते। तस्मात्प्रातःसवने प्रतिनिधिद्रव्यमभिषुतं तद्रसेन मिश्रये
दित्यर्थः। शृतं माध्यंदिने। क्वथितं पयः शृतमित्युच्यते। तेन मध्यंदिने प्रतिनिधिद्रव्यरसं श्रीणीयात्।
दधि तृतीयसवने। पूर्ववन्मिश्रयेदित्यर्थः। आयंतीयं ब्रह्मसाम यदि फाल्गुनानि वारवंतीयं यज्ञाय
ज्ञीयस्य स्थाने। यदि फाल्गुनानि धिलेन प्रविष्टानि तदैते सामनी आयंतीयवारवंतीये ब्रह्मसामा
ग्निष्टोमग्निष्टोमसामकार्ययोर्भवतो यथासंख्येन। आयंतीयमेके। एके शाखिनः आयंतीयं यज्ञा
यज्ञीयस्य कार्ये भवतीत्याहुः। ब्रह्मसाम प्रकृत्यैवेति। एकदक्षिणं यज्ञं संस्थाप्योदवसाय पुनर्यजेत।
एवं प्रतिनिधिना क्रियमाणं यज्ञप्रयोगमुदवसानीयापर्यंतं समाप्य तस्माद्देशादुदवसाय सोमम
पाद्य तमेव यज्ञं पुनः प्रयुंजीत। तस्मिन्पूर्वस्य दक्षिणां दद्यात्। तस्मिन्पुनः प्रयोगे नादक्षिणा
दद्यात्। यत्संख्याकाः पूर्वस्मिन्प्रयोगे संकल्पितास्तत्संख्याका एव दद्यात्। न त्वैकल्पिकसंख्यान

राम०
१८८

दक्षिणा इत्यर्थः। पूर्वस्मिन्प्रयोगे एकैव गौर्दक्षिणा। सोमाधिगमे प्रकृत्या। यद्युपानेऽपि प्रतिनिधौ यागात्प्रा
ग्यदि सोमो लभ्येत तदा प्रतिनिधिद्रव्यं सन्त्यक्त्वा सोमेनैव यष्टव्यं। प्रतिनिधिनिमित्तानि सोमस्ययणानि
च न भवंति। एतच्चैकाहेषु। अहर्गणेषु तंत्रमध्ये उदवसाय पुनर्योगो न शक्यते कर्तुमिति। सर्वाह्नां सा
धारणत्वात्प्रयोगस्य। यदा पुनरहर्गणेषु मुख्यासंभवात्प्रतिनिधिनैवैकमहः क्रियते तदा सत्रं प्र
गं समाप्य उदवसाय तद्देवाहः पुनः प्रयुंजीरन्। सत्रिणः संहिता एव तदर्थमेव यज्ञं संस्थाप्येति यज्ञग्र
हणं कृतं। तस्यायमभिप्रायः। आरब्धो यो यज्ञः फलसाधनं तस्य प्रयोगं समाप्यैव तत्कर्तव्यं। नावांतरमे
कस्याह्नः प्रयोगमिति। एकाहेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेष्ट्वा पुनर्यष्टव्यमेव॥ ८॥ दीक्षि
तानामुपतापे परिहिते प्रातरनुवाके वा उपतपते पृष्ठि चक्षुषे चक्षुः प्राणाय प्राणं त्मने त्मानं वाचे
वाचमस्मै पुनर्धेहि स्वाहेति ब्राह्मणाहुतिं हुत्वा शीतोष्णा अपः समानीय एकविंशतिमासु यवान्कुशापिं
जूलं श्चावधाय ताभिरस्त्रिरवर्थं कृत्वा ताभिरेनमाप्लावयेज्जीवानाम स्थ तार इदं मम मुंजीवय ततजी

(187)

विकानामस्थता २ इममसृं संजीवयत संजीवानामस्थता २ इममसुं संजीवयत संजीविकानामस्थता २ इममसुं संजीवयतेत्यौषधिसूक्तेन च। दीक्षिता नाम ध्येयः कश्चिद्दीक्षित उपतप उपतपेद्व्याधिपीडेत्यर्थः। तत्र नैमित्तिकमुच्यते। यदि हि ते प्रातरनुवाके प्रागेवा यो न द्वीयारंभादेतस्मिन्काले अनुपाकृते वा प्रातरनुवाकेऽनयोरन्यतरस्मिन्काले प्रदीप्यतरस्यनेन ब्रह्मा हुतिं हुत्वा शीतोष्णा आपो मिश्रयित्वा तास्वेकविंशतिंयवान्प्रक्षिप्य एकविंशतिं कुशपिंजलांश्चाधाय ताभि रुपतप्तं दीक्षितमाप्लावयेत्प्लापयेत्। तत्। जीवा नामस्थ ते सेव मादिभिश्चतुर्भिर्मंत्रैर्या ओषधीः पूर्वा जाता इत्यनेन सूक्तेन च। सर्वेषां मंत्राणामंते सकृदेव माप्लावनं कर्तव्यं न प्रतिमंत्रं। एतत्सर्वं ब्रह्मणा कर्तव्यं। अस्य सूत्रस्य मध्ये नाभिरशिरस्त्वर्थे कुर्वीत इत्युक्तं न दोषधिसूक्तेन चेत्यस्मादुपरिष्टाद्द्रष्टव्यं। तत्र ब्रह्मणः कर्तृत्वाभावात्। अस्यायमर्थः। नाभिर्वा शिरूपतप्तस्याचमनं जैव सुदककार्यं शौचादि वैकर्तव्यमिति। तस्य कर्ता अर्थात्स्वयमेवाशक्तश्चेदन्यो यः कश्चन परिचारकः। अतो नात्र ब्रह्मा नियम्यतरस्तु त्वर्थो युक्तः एव। आप्लाव्यानुमज्जेत् आप्लावने प्र

कृतेऽश्याप्लाव्येति वचनमाप्लावनानुमानुमार्जनयोः समानकर्तृत्वमित्यर्थः। तेनैतरपि ब्रह्मैव करोति। उपांशुं तर्पा मैते प्राणपा मे अपानपा नाम सा उपांशुसवनस्ते व्यानपा त्वसावैद्रवायवस्ते वाचं पात्वसौ मैत्रावरुणस्ते वा चक्षुषी पात्वसावाश्विनस्ते श्रोत्रं पात्वसावाग्रयणस्ते दक्षक्रतू पात्वसा उक्थ्यस्तेंगानि पात्वसौ ध्रुवस्त आयुः पात्वसाविति। उपांशुं तस्ते यो मा विस्तादिभिरष्टभिर्मंत्रैरनुमज्जेत्। असाविसस्य स्थाने उपतप्तस्य नाम संबुध्या गृह्णीयात्। प्रथमेन नासिकामनुमज्जेत्। द्वितीयेन सर्वं शरीरं। सर्वशरीरव्यापित्वाद्ध्यानस्य। यस्य मंत्रस्य स्थाने विशेषो लिनावगतः तेन न देवानुमज्जेत्। अन्येन सर्वशरीरं। यथासनमनुपरिक्रमणं। उपतप्तस्यैतस्मिन्कर्मणि कृते तेन तः सर्वे दीक्षिता यथास्वमासनमनुपरिक्रमेयुरित्यर्थः। अतो वगम्यते एतस्मिन्कर्मणि क्रियमाणे सर्वे दीक्षिता ब्रह्मणा सह नतैष्वासते। त्रातारमिंद्रमवितारमिंद्रमिति नार्त्यादिः। इयमकृतार्त्यस्याद्या भवति। अनया सह तत्स्कमस्मिन्निमित्ते तार्क्ष्यकार्यं करोति। यद्यप्यरैकाहिकाद्दैष्वदेवं स्वस्मात्रेये निविरंद्ध्यात्। यद्यप्यानो नद्यादैकाहिकादन्यतस्मिन्नहारं निवेश्यदेव

वृ·सू·६
१९०

स्तंभवतिनिविद्धानीयं। तदानुद्दस्य स्त्यात्रेयेत त्वं निविदं दध्यात। स्वस्त्रात्रेयशब्देन तत्त्व एवात्र गत्स्वनेन। त
चस्यैवान्यत्र मंत्रप्रदर्शनात्। स्वस्त्रात्रेयस्य निविद्धानत्वेन विधानात् तस्मिंनहनि विद्धानस्योद्धारो भवति।
प्रकृसागरे। अगदेख्याध्यपगमइत्यर्थः। तदानेमेविकाराः कर्तव्याइत्यर्थः॥९॥ संस्थिते तीर्थेन निर्हृत्या
वभृथे प्रेतालंकारान्कुर्वंति। संस्थिते समाप्तेइत्यर्थः। तस्मिंनुपतसेमते तमतीर्थेन निर्गमय्यावभृथा
र्थं संकल्पितदेशे निधाय प्रेतालंकारान्कुर्वंति। येलोके प्रेतस्यैते लंकाराइति प्रसिद्धास्ते प्रेतालंका
रास्तैरलंकुर्युरित्यर्थः। अत्र किंचित्संस्थिते अतीर्थेनेति पदच्छेदः। निर्हृत्यावभृथे। अवभृथार्थो यो
देशः आवभृथस्तस्येदमित्यण्। अथवा अवभृथइत्येव पदच्छेदे सति अवभृथशब्दस्तदर्थे देशे ल
क्षणया वर्तते। केशश्मश्रुलोमनखानि वापयंति। प्रेतस्य केशादीनां वापनं कर्तव्यं। नलदेनानु
लिंपंति। नलदो नाम द्रव्यविशेषः। सचानिपुणकेभ्यः शिक्षितेभ्यः। तल्लूतेनानुलिंपनेनानुलिं
पंति। नलदमालां प्रतिमुंचंति। माला च तल्लूनास्य प्रतिमोक्तव्याः। तिः पुरीषमेके कृत्वा पृषदा

एम०
१९०

ज्यं पूरयंति। प्रेतस्य शरीरे यान्यांत्राणि तानि निष्पुरीषाणि कृत्वा पृषदाज्येन पूरयित्वा पुनः शरीरे बंधयि
तव्यानीति मन्यंते केचिच्छाखिनः। अहतस्य वाससः पाशतः पादमात्रमवच्छिद्य प्रोर्णुवंति प्रसंगदशे
नाविःपादं। अहतमनिवसितं। वाससो वयनारंभप्रदेशः। पाशइत्युच्यते समाप्तिप्रदेशो दशाः। पा
शप्रदेशे पादमात्रमवच्छिद्य तत्पादमात्रमवच्छेदं निधाय तेन वाससा प्रसंगदशेन प्राक्शिरसं प्रेतमा
विष्पादं प्रच्छादयंतीत्यर्थः। अवच्छेदमस्य पुत्रा अमाकुर्वीरन्। तदवच्छेदं प्रेतस्य पुत्रा अमाकुर्वीरन्।
स्वीकुर्वीरन्नित्यर्थः। अग्नीनस्य समारोप्य दक्षिणतो बहिर्वेदि दहेयुः। अस्य प्रेतस्य अग्नीन्हृदयोरर
ण्योः समारोप्य देवयजनस्य दक्षिणतो बहिर्वेदि बेदिदहेयुः। अस्य प्रेतस्य अग्नीन्हृदयोररण्योः समारो
प्य देवयजनस्य दक्षिणतो बहिर्वेदि प्रेतमानीय अग्निमथित्वा विहृत्य तत्रैव दहेयुः। दहनविधिनैव।
आहार्येणानाहिताग्निं। यो नाहिताग्निः सत्री भवति तस्मिन्मृते अयं विशेषः। आहार्येणाग्निनानं दहेयुः
। आहार्यशब्देनौपासनमुच्यते। पत्नी च। दीक्षितस्य पत्नी यदि म्रियेत तां चाहार्येणैव दहेयुः। आह

(189)

र्यशब्देनात्र लौकिकोप्युच्यते। अत्रायं विशेषः। येनाहिताग्निना सर्वाधानं कृतं तस्य पत्नी लौकिकेन। यस्यो
पासनमस्ति तस्य पत्नी सौपासनेन। अतोवगम्यते। आहार्यशब्देनाश्रौताग्निरुच्यत इति। प्रसेसा
हः समापयेयुः। प्रसेसदहनदेशाद्यत्सर्वोपरीभूतमहस्तत्समापयेयुरित्यर्थः। प्रातरनभ्यासमन
भिहिंकृतानि शस्त्राण्यनुवचनाभिष्टवनस्तवनानि। यस्मिन्नहनि दीक्षितदहनं कृतं। तस्मात्परमनंत
रमहः प्रातरित्युच्यते। तस्मिन्नहनि शस्त्रादीन्यभ्यासाभिहिंकारवर्जितानि भवेयुः। तत्राभिष्टवे प्रा
प्तापूर्वमेवाभिहिंकारो नास्ति। आद्ये च शस्त्रे। तत्राभ्यासमात्रस्यैव निषेधः। एवमन्यत्र यथासंभ
वं निषेधः कल्पनीयः। पुराग्रहग्रहणात्तीर्थेन निष्क्रम्यर्त्विजः प्रसव्यमायतनं परीत्य पर्युपविशंति। त
स्मिन्नेव प्रातरनभ्यासमित्युक्तलक्षणेहनि ग्रहस्य ग्रहणात्प्रागेव तीर्थेन निष्क्रम्यर्त्विजः प्रसव्यमप्रदक्षिणं
श्मशानायतनं परितो गत्वा नदायतनं परितउपविशंति। पश्चाद्धोता। श्मशानायतनं तत्रारिति शे
षः। उत्तरोध्वर्युः। तस्य पश्चाच्छंदोगाः। तस्य पश्चाच्छंदोगाः। तस्याग्रहणमध्वर्योरेव पश्चाच्छंदोगा उप

विशंति नायतनस्येत्येवमर्थं। ब्रह्मणो दक्षिणत इति सिद्धत्वान्नोक्तं। आयं गौः पृश्निरक्रमीदित्युपांशु स्तु
वते। आस्तुत्युच्छंदोगा उपांशु स्तुवते। स्तुते होता प्रसव्यमायतनं परिव्रजन्स्तोत्रियमनुव्रजेदप्रणु
वन्। होता अप्रणुवन्स्तुते च्छंदोगैस्त्रिः प्रसव्यं श्मशानायतनं परितो व्रजन्स्तोत्रियमनुद्रवेत्। वक्ष्य
माणा आयं गौ ऋचः। उपांशु स्तुवनन्दति स्तुतं। उपांशुत्वविधानं होतुरनुद्रवणेप्युपांशुत्वप्रापणार्थं।
स्तोत्रियवचनमप्युपलक्षणार्थं। यास्तु स्तुवते अनुब्रूयादिति। शंसस्यादिचोदनाभावादेव सामिधे
नीधर्माभावे सिद्धे पुनः स्तोत्रियशब्दसंबंधात्स्वधर्मप्राप्त्याशंका स्यात्तन्निवृत्त्यर्थं प्रणव प्रतिषेध
ः। अथैतदनुद्रवणं किंरूपमिति। अनुमंत्रणमिति ब्रूयात्। प्रेतस्याभिधानमत्र विकीर्ष्यते। त
च्च मंत्रलिंगादवगतं। यामीषु स्यषमेवैनत्। सार्वराज्ञीषु चानये वदिग्ण प्रेताभिधानीयं कल्प
नीयं। अत्र च ब्रूयादिति वक्तव्ये अनुद्रवेदित्यनुशाब्दसंबंधात्त्रायते अनुमंत्रणप्रकारोयमिति।
तथा च वक्ष्यति। नंदस्यमानमनुमंत्रयत इति। तेनानुमंत्रणधर्मा एवास्तु कर्तव्याः। यामीष्वा या

(190)

ना॰ वृ॰ ६
१९२

तास्वरमाश्वतथामतेनवक्तव्याः। यमेनयामायनेश्चैताऋचोदृष्टाः सूक्तं तु यमदृष्टं तेनैता याम्य
इत्युच्यन्ते। नयमदेवसाइति। प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति नियं चानेतनीयमुद्दरेत्। मैनमग्ने विद
होमाभिशोचइति षड्भिः पृषालेन श्वावयतु प्रविशातु उपसर्व पमातरं भूमिमेता मितिच नस्तः सोम
एकेभ्यः इदं सन्तं। उरूणसा वृसुतृपा उदुंबला विनिच समाप्य संचित्या तीर्थेन प्रपाद्य यथास
नमासादयेयुः। एतदनुद्रवणं समाप्यानन्तरमस्थिसंचयनं कृत्वा नमस्थिकुंभं तीर्थेन प्रवेश्य य
दस्यार्थं म तस्य पूर्वमासनस्थानं तत्रास्थिकुंभमासादयेदित्यर्थः। भक्षेषु प्राणभक्षा भक्षयित्वा द
क्षिणेमार्जालीये निनयेयुः। दक्षिणस्यां वा वेदिश्रोण्यां। अत्र वा निनयेयुर्मार्जालीये वा निनये
युरिति प्रेदशीनार्थोयं इवं निनयेयुरितरत्स भक्षयेयुरित्यर्थः। सप्तदशमहर्भवति त्रिवृतः पवमानात्
रथंतरपृष्ठोग्निष्टोमः। यस्मिन्नहनि दीक्षितः प्रमीयते तदहस्तेनप्रकारेण समाप्यानन्तरं त स
प्तदशस्तोमं त्रिवृत्पवमानं रथंतरपृष्ठमग्निष्टोमसंस्थमहरन्तरं दीक्षितमरणनिमित्तं सत्रम

राम॰
१९२

ध्येसत्रिभिः कर्तव्यं। संस्थिते वभृथमेके गमयं स्येनस्येतदहरभिशब्दयन्तः। एतस्मिन्नहनि समाप्ते एतान्य
स्थीन्यवभृथार्थे सकलिनास्व [illegible]कुंभेनैन सह भक्षिपेयुः। एतस्य प्रेतस्यैतदहरिति वदन्तः सर्वे सत्रिणः इ
ति सत्रार्थः। एके संस्थितेऽहन्यस्य दंभयोजनं संस्थितेनतीर्थेनेत्यारभ्य उक्तेन प्रकारेण एतदन्तं कर्म दीक्षि
तमरणनिमित्तं सत्रिभिः कर्तव्यं। अतः परं प्रेतस्य संबंधो नास्तीत्येके शाखिन आमनन्ति। तेनातः
परं सत्रिणः सत्रमेव समाप्य यथेष्टं गच्छेयुः। निर्मथ्येन वारभ्यानिखाय संवत्सरादेनमग्निष्टोमेनया
जयेयुः। इदानीं दहनादारभ्य पक्षान्तरमुच्यते। मतेप्यप यः पूर्ववदेव स्युमा एव तिष्ठन्ति। स्वयोररण्यो
स्तुमंथनेनाग्निसद्य उत्साद्यतेन पूर्वोक्तदेशे पात्रचयनवर्जं दग्ध्वा स्थीनि संचित्वा निनिखाय विकृ
तं सत्रं समाप्य सत्रसमापनकालादारभ्य संवत्सरे पूर्णे तान्यस्थीन्यादाय तानि यजमानं कृत्वाग्निष्टो
मेन प्रातरन्यासमित्येवमानैर्दिविशेषणविशिष्टेन याजयेयुः। तएव सत्रिण इत्सम परः पक्षः। अ
स्मिन्पक्षे पूर्वस्मिंश्च पक्षे सत्रसमापने मनुपुरुषत्वेना एव समापयेयुः। तेदिष्टितं वादीक्षयेयुरो

191

ना· सू·६
१९३

षसमापनेमृतस्यसंस्थापरणार्थंमृतस्यसंनिहृतंशरीरंक्षयित्वासत्रसमापनंकुर्युः।निर्मथ्यदहनप
क्षेनेदिष्टप्रवेशोसत्यप्यस्थिपक्षेनित्यएव।अपिवोत्थानंगृहपतौ।गृहपतिनेमृतेतदहःप्रवृत्तंसमा
प्यावभृथंकृत्वासदसोदहनंकृत्वासत्रादुत्थानंभवति।नपुनःशेषंसमापयेयुरित्यर्थः।उक्तस्तुनश
स्त्रविकारः।यःसंवत्सरेस्थिपक्षःयस्मिन्श्वाहनिगृहपतिर्म्रियेततयोःशस्त्रविकारउक्तः।अनन्या
समित्यादयोयेविकाराउक्तास्तेनयोरपिभवतीत्यर्थः।एकाहेषुयजमानासनशायीना।एकाहेषु
यजमानःपूर्वेयस्मिन्नासनआस्तेमृतोपितत्रैवशायीतयावत्सएकाहःपरिसमाप्यते।मृतेपितः
स्मिन्नासनस्थेतदुहःपरिसमापनंकुर्युरित्यर्थः।संस्थितेपायतीष्ववभृथंगमयेयुरित्यालेखनः।त
स्मिन्नहनिसंस्थितेअवभृथकालेअपायतीष्ववगछंतीषुवहंतीष्वित्यर्थः।नास्वश्ववभृथंकर्मेष्ठ
त्वात्तंप्रेतंतत्रप्रक्षिपेयुरित्यर्थः।एवमालेखनआचार्यआह।पूर्वेणसदोदहेयुरित्याश्मरथ्यः।त
स्मिन्नहनिसमाप्ते।वभृथकालेपूर्वेणसदोयोदेशस्तस्मिन्देशेतंप्रेतंसर्वैर्यज्ञपात्रैःसहतेरेवाग्निभिर्द

गम०
१९३

हेयुरित्याश्मरथ्यः।अस्मिन्पक्षेअन्योवभृथोनकर्तव्यः।एषएवावभृथोभवेत्प्रदेनमेभिरग्निभिर्यज्ञसाध
नैश्वास्मिन्देशेदहनेनसमापनमिति॥१०॥अग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोळशीवाजपेयोतिरात्रो।
प्तोर्यामइतिसंस्थाः।अत्यग्निष्टोमोनामसंस्थाविशेषः।अत्यग्निष्टोमेराजन्यस्यषोळशिनंगृह्णीयादि
तिवचनादग्निमारुतादूर्ध्वंषोळशिग्रहस्यस्तुतशस्त्रेयदाभवतस्तदासोत्यग्निष्टोमइत्युच्यते।वाजपे
याप्तोर्यामौवक्ष्येते।इतरेअत्रैवोक्ताः।सोमयागोत्रप्रकृतस्तेनतस्यैतेसंस्थाविशेषाः।सर्वेसोमयागाः
।संस्थयासप्तविधाएवेत्यर्थः।तासांयामुपयंतितस्याअंतेयज्ञपुछं।तासांसंस्थानांमध्येयांसंस्थां
मुपयंतिकुर्वंति।तस्याअंतेयज्ञपुछंनामवक्ष्यमाणंकर्मकर्तव्यं।एवंस्थितेयांकांचित्संस्थांप्रकृत्यप्र
वृत्तानांसंस्थांत्यत्तेनक्रमात्तस्मादधिकंनिमित्तवशेनशास्त्रान्तरमापद्यतेयदातन्निमित्तवंलात्तत्
स्थांनैवसामंस्थाविपरिणमतइति।तस्मादेवशास्त्रादूर्ध्वंयज्ञपुछंनामकर्मकर्तव्यमित्येवमर्थंतासांयामुप
यंतिवास्याअंतइत्युक्तं।अनुयाजाद्युक्तंपशुनाशंयुवाकारंतं।तदिदंयज्ञपुछमुच्यते।अनुयाजादि

(192)

ना.बृ.६
१९४

शसूवाकपर्यंतं पशौ यदुक्तं तदिह कर्तव्यं। उत नमस्तीह सूक्तवाकप्रैष इति प्रैषविशेषविधानादेव पात्रक
मेवात्र तंत्रं भवति। नैष्टिकं। अतः पशुनैत्यस्येदं प्रयोजनं पशोय द्वुह्यासनं दक्षिणेन आहवनीयस्य तद
त्र कर्तव्यमिति। तेनानुयाजादेर्मनोतादेश्चैवं भवति। पशुपुरोडाशे सदस्येवासीतेति सिद्धं। आशंयु
वाकादिनि। आशंयुवाकात्याशुवंककर्मकर्तव्यं नोर्ध्वमित्येवमर्थं। उत नमस्तीह सूक्तवाकप्रैषः। प्रै
षसमाम्नाये ह्रौ सूक्तवाकप्रैषः। प्रैषसमाम्नाये द्वौ सूक्तवाकप्रैषावाम्नातौ तयोरितरेतरदृस्यर्थः। अवी
वृधतेति पुरोळाशदेवतां पशुदेवतां। अवीवृधतेति पुरोळाशदेवतां पशुदेवतां चेत्यध्याहर्तव्यं।
अस्मिंत्सूक्तवाकप्रैषे अवीवृधत पुरोळाशैरित्याम्नातं। तत्र पशुदेवता अग्निः पुरोळाशानां देव
तार्द्रश्च दे देवते संनिहिते तत्रावीवृधतेत्येकवचनांतं पदं कां देवतामभिधत्ते। पुरोळाशैरिति ब
हुवचनं केवलपशुदेवताभिधानेन घटते। केवलेंद्राभिधाने च प्रकृतिभागं पशुदेवताभिधानं नष्ट
तंस्मात्। अतः संनिधानाविशेषादुभे अपि देवते अभिधत्ते। तं चैवेति मन्यमानः पुरोळाशदेवतां

राम०
१९४

पशुदेवतामित्युक्तवानाचार्यः। एवं सति पुरोळाशैरिति बहुवचनपुरोळाशाधानादिपंचकं चाभिप्रेत्यो
पपन्नं भवति। एवं सति अक्रियामेकेऽन्यत्र तदर्थवादवचनादिति पशुपुरोडाशकरणीयस्य पशुदेवतानभि
धानयस्मिन्मंत्रे हेतुत्वेनोपवर्णितं तदपि परिहृतं भवति। तेन पशुपुरोळाशश्च कर्तव्यो भवति। अ
वीवृधत पुरोळाशैरित्येवास्मिन्मंत्रे वक्तव्यं च भवतीति सिद्धं। एके यदि सवनीयस्य पशोः पशुपुरोळाशं
कुर्युरवीवृधेतां पुरोळाशैरित्येव ब्रूयात्। मंत्र आहुरिति वाक्यशेषः। अक्रियामेके आचार्याः पुरोळाशा
क्रियासत्त्वं तस्त एवात्रैक इति प्रत्यवतिष्ठंते। त एवमाहुः। यदि सवनीयस्य पशोः पशुपुरोळाशः क्रिये
त तदा द्वयोर्देवतयोः पुरोळाशेन वर्धनवर्धने कर्तव्ये अवीवृधेतां पुरोळाशैरिति द्वयोरभिधायमं
त्रो ब्रूयान्न तथा ब्रवीति। अतः पशुपुरोडाशदेवतैवात्राभिधीयते न पशुदेवता अतस्तस्या अनभि
धानात्पशुपुरोळाशस्याक्रियैवेत्येक आहुरित्यर्थः। एवमेकीयपन्यस्य आत्मीयपक्षेऽभिधाननिवा
हमुपपादयति। सवनीये रेवेंद्रो वर्धते पशुपुरोळाशेन पशुदेवपैपैता। अवीवृधतेति देवतायाग

(१९३)

ना॰ वृ॰ ६
१९५

संबंध उच्यते। सचोभयोरविशिष्टः संनिधानं चाविशिष्टमस्मिन्मंत्रे तथा दर्शनात्। एवं सत्येकवच॰
नस्याविवक्षया पुनरुभयोरभिधानमेव युक्तं नैकस्या एवेति। अस्मिन्नुपपन्ने पुरोडाशैरिति। इमम थन यै
वदि शाघरनरस्तु क्तं। सवनीयै रेवेंद्रो वर्धते पर्धते पश्युपुरोडाशेन पशुदेवतेति। ऊर्ध्वं शंयुवाकाद्धा
रियोजनः। शंयुवाकावाकांतस्यैवातिदेशमुक्त्वा हारियोजन उत्पमानस्तस्मादूर्ध्वमेव भवति। नन्वि
मूर्ध्ववचने भतस्येदं प्रयोजनं। तृतीयसवनं तावच्छंस्यांतमेव। यस्तु नः शंस्याहूर्ध्वमनुयाजादिशं
युवाशैं कानंतदेष्टिकत्वात्तदुत्तमस्वरं भवति। तस्मादूर्ध्वं यत्सौमिकं तत्र स्वरविधानाभावादनिय
तस्वरं भवतीति तस्य स्वरविधानार्थमूर्ध्ववचनं। शंयुवाकशब्देनात्र शंयुवाकस्वर उच्यते। स्वस
चोनमसेनायमर्थः। उत्तमाद्यस्तु नमस्वरेण हारियोजनः प्रयोक्तव्य इति। अपाः सोममस्तमिंद्र
प्रमायाहि धानासोमानामिंद्रा द्धिच पिवच सुतनज्मि तेब्रह्मणाकेशिनाहरी इति। हारियोजन
स्यानुवाक्या प्रैषयाज्याः। इज्यानुवाक्यो अस्येषहः सु। एतेयाज्यानुवाक्ये अहर्गणेषु यान्य

राम॰
१९५

साम्यहानि तेषु भवतः। अंस्यवदेकाह इति न्यायादेकाहेष्वपि भवतः। तिष्ठा सुकं मघवन्मा पराणा अयं॰
मियेधइती नरेषु। अहर्गणेष्वेणेष्ववांसेभ्यो यानी तराणि तेष्वेते भवतः। अनंसेष्विस्यर्थः। पराणाहि
मघवन्ना चयाहीति वानुवाक्यो नरवत्स्वहःसु। हारियोजनविषयत्वादस्य विधेरहः शब्देनात्र सुत्या
हान्येवोच्यंते। तेन सारस्वतसत्रादिषु यानि सुत्याहान्यसौत्याहोभिरूनरवंति तेष्वनंसेष्विय मनुवा
क्या भवति। तिष्ठा सुकमिति वा। ध्यय पत्त इस्येषैव याज्या। अनुवषट्कृतेति प्रैषं मैत्रावरुण आ
हेहमद एवमपवन्निंद्र तेष्य इति। हारियोजनाधिकारात्तस्यैवानुवषट्कारत्यागे वाति प्रैषना
मकमिहमद इत्यादिकं प्रैषं मैत्रावरुण आह। मैत्रावरुणग्रहणमननुवषट्कृत इति वचनाद्धोतुः
प्राप्तिशंकानिवृत्यर्थं। आहेति वचनं जपादिषट्कमारस्यर्थं। अस्यतु विषयं वक्ष्यति। नायमा॰
नरूपाणां प्रथमाद्रूः प्रवर्तेतेऽभ्यासातिप्रैषापिति। अद्येस्यतिरात्रे। अतिरात्रे वक्तीवक्ष्यमाणे
भ्यः शब्दस्य स्थाने अद्य शब्दः कर्मर्तव्यः। समर्थनिगमत्वादेवोहे प्राप्ते पुनर्वचनमस्य प्रैषस्या

193

ना·सू०६
१९६

हर्गणोऽथनं स्याहरर्थं तयोरत्यन्तेरहर्गणानां चद्वादशाहप्रकृतित्वाद्वादशाहस्य चातिरात्रादित्वान्तस्य भ-
नित्वादस्य प्रवृत्तेः सैवास्य प्रकृत्वान्नूहं मन्यमानस्यान्तरमध्येऽत्यतिरात्र इति। अयमभिप्रायः। मस्सं। द्वा-
दशाहेः नं सान्यहान्यस्य प्रकृतिरिति। किंतु नेषेव यस्मिन्नहनि प्रकृतित्वेन गृहीतमंत्रस्य यथार्थम-
भिधानं संभवति तदेवास्य प्रकृतिरिति रितिकृत्वा अतिरात्र ऊह एव युक्त इति। अयसुत्यामिति च। इदम-
पूर्वं द्रष्टव्यं। तस्यां तं श्रुत्वाग्नीध्रः श्वः सुत्यां प्राह श्वः सुत्या वा एषां ब्राह्मणानां नामिन्द्राग्निभ्यां
प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोम्येभ्यः सोम-
पेभ्यो ब्रह्मन्वाचं यच्छेति। अतिप्रैषस्यां तमाग्नीध्रं श्रुत्वा श्वः सुत्या संज्ञकं श्वः सुत्या वा एषामिति। ए-
तं मंत्रं प्राह। आहेत्येतावतैव जपादिषद्कस्याप्रवृत्तौ प्राप्तुत्वेनिवृत्ते प्रकर्षवचनादुत्तम एवात्र स्वरो
भवति। तस्यां तं श्रुत्वेति वचनमतिप्रैषश्वः सुत्ययोः संबंधकरणार्थं। तेन तस्मिन्नति प्रैषे प्रैषेस्सह
विधिः श्वः सुत्यामंत्रेपि भवतिः श्वः सुत्यामंत्रेपि प्राहेति वचनाद्युउत्तमस्वर एव विहितः सोतिप्रैष

एम०
१९६

पि भवति। अनुवषट्कारस्याग्निस्यपमपि श्वः सुत्यामंत्रेपि भवति उपांशुत्वव्यावृत्तौ स सां हारियोज-
नां नेभीवोमंद्रारीनामपि अनियमं व्यावृत्तस उत्तमस्वरं नियमतीति। अयमसुच्चयहेतुः॥११॥ आ-
हृतमुन्नेत्राद्द्रोणकलशमिव प्रतिगृह्योपहवमिष्ट्वावेक्षेत। उन्नेत्राहृतमुन्नेतरूपद्रूयस्वेसु ख्यावे-
क्षेत तत्त्वं द्रोणकलशस्थं सोमं। हरिवतस्ते हारियोजनस्य सुतस्तोमस्य शस्थेक्तस्ये एयजुषो यो भ-
क्षो गोसनिर श्वसनिरश्व तस्य त उपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयित्वाप्रदाय द्रोण-
कलशमात्मानमाप्यप्यय यथाप्रसमं विनिःसृप्याग्नीये विनिःसृप्याहुतीर्जुहुयस्य पीतरं मंदुरिंद्रं म-
दे धारयं विप्रो वा चैनियच्छन्। श्वयं कस्यचिद्दुहितारमीके सोराजान सखायं रिषे धात्स्वाहा। इदं राधो
अग्निनादत्तमागाद्यशो भर्गः सह ओजो बलं च। दीर्घायुत्वाय शतशारदाय प्रतिगृभ्णामि महतेवीर्या-
यस्वाहेति। हरिवतऽनिप्राणभक्षमंत्रः। आत्माप्यायनं मुखहृदयाभिमर्शनं मत्राभ्यां। यथाप्रसमप्रस-
प्रमिति योयेनपथा सदो हविर्धानं वा प्रवृत्तः समः सतेन विनिःसृप्येऽर्थः। विनिःसृप्याहुतिरिति हो-

ना॰ वृ॰ ६
१९७

म। अयं पीत इदं राध इति होममंत्रौ। आहवनीये षट्षट्शकलान्यभ्यादधति देवकृतस्यैनसोवय-
जनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोवयजनमसि स्वाहा। आ-
त्मकृतस्यैनसोवयजनमसि स्वाहा। एनस एनसोवयजनमसि स्वाहा। यद्वोदेवाश्चकृम जिह्वया गुर्वि-
ति च। आहवनीयवचनं आग्नीध्रीयाधिकारात्। शकलाभ्याधानं पंचभिर्यजुर्भिरेकयर्चा। द्रोण-
कलशाद्धाना गृहीत्वावेक्षेरन्नापूर्या स्थामा पूरयत प्रजया च धनेन च। इंद्रस्य कामदुघा स्थ कामा-
न्मे धुङ्ध्वं प्रजां च पशूंश्चेति। आपूर्या इत्यवेक्षणमंत्रः। अथवा पूर्वभागोवेक्षणार्थः। उत्तरो-
वघ्राणार्थ इति। अवघ्रायांतः परिधिदेशे निवपेयुः। तूष्णीमवघ्राय। तोधानाः अंतः परिधि-
देशे निवपेयुः। अत्र देशग्रहणात्परिध्यभावेपि समींदेशो गृह्यते। प्रसेत्य तीर्थदेशे यां पूर्णा-
श्चमसास्तान्सव्यावृतो व्रजंति। आहवनीयदेशात्सर्वदक्षिणावृतः प्रसेत्याग्नीध्रीयं गच्छेयुः।
विनिःसृपाहुतिप्रभृत्येतावत्सर्वैः कर्तव्यं। सर्वैश्चाग्नीध्रीयदेशं गच्छत्सु तेषु ये चमसिन-

राम॰
१९७

स्ते सव्यावृतो भूत्वा तीर्थदेशे चमसानद्भिः पूर्णानध्वर्युभिः स्थापितान्व्रजेयुः। हरिततृणानि विमृज्य
प्रति स्वं चमसेभ्यस्त्रिः प्रसव्यमुदकैरात्मनः पर्युक्षंते दक्षिणैः पाणिभिः। तांश्चमसान्व्रजित्वा हरि-
ततृणान्यार्द्रतृणानीत्यर्थः। तानि च दूर्वाजातीयानि शास्त्रांतरे विशेषदर्शनात्। तानि तृणानि नि-
ष्पीड्य स्वे स्वे चमसे तत्र प्रक्षिप्य सर्वे चमसिनः स्वान्स्वांश्चमसान्दूर्वारससुक्ता आपो गृहीत्वा तानिर-
रिः स्वं स्वमात्मानं दक्षिणैः पाणिभिरप्रदक्षिणं पर्युक्षंते दक्षिणग्रहणं पाणौ चमसेष्विव यत्र सव्या-
धिकारनिवृत्त्यर्थ। इतरैर्वा प्रदक्षिणं। सव्यैर्वा पाणिभिः प्रदक्षिणं पर्युक्षंते। स्वधा पित्रे स्वधा पिताम-
हाय स्वधा प्रपितामहायेति। एते त्रयः पर्युक्षणमंत्राः। उक्तं जीवन्तेभ्यः। पिंडदानेषु यदुक्तं विधा-
नं तदत्रापि प्रसेतव्यं तत्र जुहुयाज्जीवेभ्य इत्युपायांतरमस्ति। अत्रोपायांतरस्यासंभवाद्यस्य प्रे-
तास्त्रयो भवेयुः। स एव पर्युक्षणं कुर्यान्नान्यः। तद्वर्जमन्यस्तु सर्वे कुर्युः। पाणौ चमसे चमसे च व-
धायास्तु धत्तस्य सोमदेवं ते मतिविदो नृभिः सुतस्य स्तुतस्तोमस्य शस्तोक्थस्येष्टयजुषो योभक्षो-

ना० वृ० ६
१९८

गोसनिरश्वसनिरस्यतउपहूतस्योपहूतो भक्षयामीति प्राणभक्षयित्वा माहंप्रजांपरासिचमि
त्येतेनाभ्यात्मं निनीयाच्छायं वो मरुतः श्लोक एत्विति सेतयाभिमृशंति। चमसिनः स्वेस्वे चमसे स्वं।
स्वं दक्षिणं पाणिमवधाय ततः। स्वस्वचमसादूर्वीरसपुनाअप आदायावजिघ्रंसमुद्र्तस्येति
मंत्रेण। ततो माहंप्रजामिसनेनाभ्यात्मं स्वचमसस्था आपो भूमौ निषिंचेयुः। एतेनेति वचन
मनुष्टुभोऽस्पृष्टारेपि अनुष्टुभोनुद्देशार्थं। ततोच्छायं वदुत्येनयर्चा चमसस्था अपो भूमौ नि।
षिक्ता अभिमृशंति। दधिक्राव्णो अकारिषमिति साग्नीध्रीयस्य धिष्ण्यस्यान्वाहार्यसख्यानि विस
र्जंत उभा कवी युवानानामसदारा धर्मणस्पती। परिसमस्य धर्मस्यैणा विसख्यानि सजाम
हइति। दधिक्राव्णइत्येतया आग्नीध्रीये धिष्ण्यस्यान्वाग्नीध्रः। सयजमानाः सर्वर्त्विजः। ततः स
ख्यविसर्जनमपि कुर्युः। उभाकवी इतिमंत्रेण सख्यविसर्जनं नाम मनानमन्त्राभिमर्शेनाद्ये
नावंतकालं सखित्वेन वर्तितव्यं। तस्य सखित्वमस्मिन्काले विसर्जनीयमित्यर्थः। तच्चपर

एम०
१९८

स्परं हस्तसंस्पर्शेनेन विसर्जनीयं॥ २७॥ पत्नीसंयाजेष्वरित्वावभृथं व्रजंति। यथाप्रसन्नमिस
त्रोदाप्युपेक्ष्यते न होतृहोमार्थेनिः सर्पंति सदर्शनीवेदंगच्छंति ततः पत्नीसंयाजेष्वरित्वाप
त्स्यैवेदप्रदानादि पूर्णपात्रनिनयनांतं कर्म अकृत्वैव वेदस्तरणं कृत्वावाप्ययश्चितानि जुहुया
त्। इतरैरन्यारब्धः। ततो हृदयशूलोद्वासनमंत्रैव कर्तव्यं। यद्यनवंध्या पशुना करिष्यते तदा तदुद्वा
सनं पशुकर्तृभिरेव कर्तव्यं। तत्रसंस्थाजपमेवावस्थाप्यावभृथदेशं परिव्रजंति। व्रजंतः साम्नो नि
धनमुपयंति। सामपंचभक्तिकं तस्यां साभक्तिर्निधनमित्युच्यते। तदवभृथं गच्छंतो ब्रूयुरित्यर्थ
ः। तत्सर्वर्त्विजामेनत्कार्यं। अवभृथेष्टानिष्ठनश्चरंति। अवभृथेष्टिर्नामजलेक्रियते तयानिष्टं त
श्चरेयुः। प्रयाजाद्यनुयाजांतानास्यामिष्टानबर्हिष्मंतोप्रयाजानुयाजौ। अप्सु मंहौ। आज्यभागौ
भवतइत्यर्थः। गायत्र्यौ। गायत्र्यौचेतौ भवतः। स्रुत्रभेदकरणं यच्चयत्रावप्सुमतौ तत्रतत्र गायत्र्यौ भ
वतइत्येवमर्थं। वारुणं हविः। हविर्ग्रहणं हविर्विशेषसतियागावसरे पुनर्हविरेवोसाद्यं यष्टव्यं। न

(197)

ना॰ वृ॰ ६
१९९

पुनराज्येनेष्ट्वा उत्तरं यजेयमित्यर्थः। अव ते हेळो वरुण नमोभिरिति द्वे। अग्नीवरुणौ स्विष्टकृदर्थे। स्वि
ष्टकृतदर्थ इति स्विष्टकृद्यागे अग्नीवरुणौ देवता भवतीत्यर्थः। तेन स्विष्टकृल्लब्धोऽत्र प्रयोक्तव्यः। अत्रा
निगदे एवाग्नीवरुणावित्यादिरूपसत्वेन द्रष्टव्याय यष्टव्या। त्वं नो अग्ने वरुणस्य विद्वानिति द्वे। सं
स्थितायां पादानुदक्रांते वदश्च नमो वरुणायाभिष्ठितो वरुणस्य पाश इति। संस्थितायामवभृथेष्टौ
सर्वैः स्नदीया नमो वरुणायेत्यनेन मंत्रेण दक्षिणान्पादानुदक्रांते वदध्युः। दक्रांते तीरसमीपवर्ति।
न्युदक इत्यर्थः। संस्थितवचनमवधारणार्थं नामिष्टिसंबंधिलक्षापनार्थं। तेनेष्टेरक्रियापक्षे अव
धानादयो पिन भवंति। तत आचामंति भक्षं स्यावभृथोसि भक्षितस्यावभृथोसि भक्षं कृतस्याव
भृथोसीति। तत इति पूर्वैर्ण संबद्धमिति। आचामंति। आचामंति अपः पिबंतीत्यर्थः। त्रिभिर्मं
त्रैः पिबंति। सर्वत्र शौचार्थमाचमनं कर्तव्यं। प्रोथ्य प्रथमेन प्रष्ठीवंति प्रगिरंस्तु नराभ्यां तेषु पा
नेषु विशेष उच्यते। प्रथमेन पीता अपः प्रोथ्य प्रष्ठीवंति। प्रोथनमिसं नरास्य शोधनार्थः। क्रि

राम॰
१९९

याविशेषयत्तुं उच्यते। तं कृत्वा निष्ठीवेयुरित्यर्थः। उत्तराभ्यां पीताः प्रोथ्य प्रगिरंति। आचमनविधा
नादेव प्रनिर्गिरंतीति सिद्धे पुनः प्रगिरंतीति वचनमत्रापि प्रोथनप्राप्त्यर्थं। तत आचम्यात्मवंत आपो
अस्मान्मातः शुंधयंत्विरमापः प्रवहत नमु मित्र्यान आप ओषधयः संत्विति। तत इति पूर्ववत्संबंधार्थं
संबंधार्थं संबंधार्थं। आचम्येति वचनं शौचार्थमाचमने कृते पुनरात्मावनांगमाचमनं कृत्वात्मवेर।
न्नित्येवमर्थं। स्नानमाप्लवनमित्युच्यते। तदेभिर्मंत्रैः कुर्युरित्यर्थः। एनया दृताम्युक्षेरन्नेवाप्यदी।
क्षिताः। अनयावृता ~~एनयावृताभ्यु~~ भिर्मंत्रैरित्यर्थः। एतयावृता अदीक्षिता अभ्युक्षेरन्नेव नाप्लुवे
रन्। अपिशब्दादाप्लवनमप्यनुकृष्यते। अस्य चावधारणेऽसंबंधो भवति। तेनायमर्थः। अदीक्षि
ता अभ्युक्षेरन्नेव वा आप्लुवेरन्नेव वेत्येवं विकल्पो भवति। उन्नेतैनानुंनयति। उन्नेता स्वशाखो
क्तविधिना मर्वानुदकादुत्तारयति। उन्नेतरं त्वोन्नयोन्नेतर्वस्वो अस्तुं नयानदसुं नीयमानाञ्जपंति
। उन्नेत्रा उन्नीयमाना उन्नेतरित्येतं मंत्रं जपंति। उदयं तमसस्परीत्युदुत्यमिति शेषः। उद्रेसोदका

द्वितीयेऽस्यर्थः। इयमपि ऋकूमं च संस्थाभवति। तेनो पांशु प्रयोक्तव्या। लिंगादेवऋत्वपकारः कर्त्याः। समान
मतऊर्ध्वेऽहरयणक्षेनासंस्थाजपात्। अस्या ऋचऊर्ध्वे यत्कर्तव्यं तद्द्वयणस्तोद्वासनेनसमानंभवति।
अवत्वयणस्तोद्वासमाभावादनुमन्त्रणमपानुपस्य शीनं संस्पर्शनपरिहारार्थमर्थनुमत्वादकेर्नं।
यं। अनवेक्षमाणारस्तादयः सर्वैः कर्तव्याः समिदाधानांताः पदार्थाः। आ संस्थाजपादिति वचन
त्वद्यणस्तोद्वासनेनसंस्थाजपस्य संबधाभावात्तस्यापिप्रापणार्थो संस्थाजपेनोपरिष्टेति इत्येते ये
येपवृत्तकर्मीणः। अवधानादयएनेपदार्थाः सर्वैरस्मदीयैकर्तव्याः। संस्थाजपस्तु पवृत्तकर्म।
भिरेवकर्तव्य इत्येवमर्थं वचनं इदं चान्यस्य योजनमपवृत्तकर्मीणः संस्थाजपं कुर्युरिति संस्थाजप।
स्यकर्तृसंबंधश्रुवन्कर्तृद्वारेणप्रयोगांगत्वमस्यदर्शया। तेनसोमप्रयोगेयत्कर्तृसंबंधि सोमप्रयो
गावयवः संतिष्टते तस्यैव संस्थाजपो भवति। तेनदीक्षणीयादिषु संस्थाजपस्य प्रसंगएवनास्ती
तिसिद्धं॥ २३॥ गार्हपत्यउदयनीयमाचरंति। गार्हपत्ये शालामुखीयइत्यर्थः। सद्युत्तरवेदिप्रण

यनादूर्ध्वं सोमस्य गार्हपत्यो भवति वचनात् यतः प्रणयंति स गार्हपत्य इति। उदयनीयानामेष्टिः। तस्याः शा
लामुखीय एवाहवनीयो भवति। सा प्रायणीययोक्ता। सा प्रयणीययोक्ता। साग्रहणं प्रायणीयया अस्या
वैलक्षण्यप्रदर्शनार्थं। न च वैलक्षण्यं शंयुवंनानुक्रमसंस्थावेसेवमादि। तस्या अध्वर्युप्रसपत्वान्ना।
स्याभिर्निश्रीयते। शानैलरामिस्येवस्वरोत्रनातिदिश्यते अवधित्वरत्वात्तस्यापदार्थस्यधर्मोऽस्तीति दे
शेनप्राप्यतेनावधिधर्मइति। पथ्यास्वस्तिरिहोनमाज्यहविषां। सर्वेसामप्येविशेषउच्यते। तेनच
तस्य आज्यहविषोदेवताः। अदितिः पंचमी चरुर्हविः। पथ्यास्वस्तिस्तत्र प्रथमा इह चतुर्थी भवती
त्यर्थः। विपरीताश्चयाज्यानुवाक्याः। तत्र या याज्यास्ते हानुवाक्याः। तत्र या यानुवाक्यास्ते हयाज्या भ
वतीत्यर्थः। तेचैवकुर्युर्ये प्रायणीयां। तत्रयेकर्तारस्तएवात्रनियम्यते। तत्र यदि प्रदिप्रति निधिभूतः
कुर्यात्सएवात्रकुर्यादित्यर्थः। प्रकृत्या संयाज्ये। विपरीताश्चयाज्यानुवाक्या इत्यस्य प्रतिप्रसवो यं।
संस्थितायांमैत्रावरुण्यनूबन्ध्या। उदयनीयायां समाप्तायां मित्रावरुणदेवत्योऽनुबन्ध्या नाम मैत्रपशुः

कर्तव्यः। सदस्येके। स पशुः सदस्यासीनैर्होत्रादिभिः कर्तव्य इत्येक आहुः। अस्मिन्नपि पक्षे दंडप्रदानां
तमुत्तरवेद्यामित्युक्तं। उत्तरवेद्यामेके। एकेशाखिन उत्तरवेदिसमीप आसीनैरित्याहुः। हुतायां वपा
यायं येका दक्षिन्यग्नतः कृताग्नीषोमीयेण संचरेण व्रजित्वा गार्हपत्ये त्वाष्ट्रेण पशुना चरंति। अनूबंध्या
यावपायां हुतायां इदं नैमित्तिकं कर्मोच्यते। यदि यस्मिन्कृतावग्नीषोमीयस्यनेसवनीयस्थाने वा पश्वे।
कादशिनी प्रयुक्ता स्यात्तदा तस्मिन्क्रतावस्मिं स्थाने ऽग्नीषोमीयेण संचरेण अग्नीषोमीयप्रणयने यः
संचरस्तेनेत्यर्थः। तेन संचरेण शालामुखीयं गत्वा तत्र त्वाष्ट्रेण त्वष्टृदेवत्येन पशुना यजेयुरित्यर्थः।
अंजनादि पर्यग्निकृत्वोत्सृजं त्यसमुत्तरायणनाय। तं त्वाष्ट्रं पशुं यूपांजनादि पर्यग्निकरणांतं कृत्वोत्सृज।
ति। असुत्तरायणनाय। असुत्तरायणगमनायेत्यर्थः। नावानेवायं पशुयागो भवति। नात ऊर्ध्वं कर्तव्यो
भवतीत्यर्थः। यदि त्वध्वर्युरेव आज्येन समापयेत्तथैव होता कुर्यात्। अतः पक्ष उत्सर्गो नामायमपरः
पक्ष उच्यते। यद्यध्वर्युरेव आज्येन तं पशुयागं समापयेत्तदा होतापि तथा कुर्यात्। होतृग्रहणं।

मैत्रावरुणस्यापि प्रदर्शनार्थं। तथैवेत्यस्य विवरणार्थमाह। संप्रैषवदादेशात्। आज्येन समापने अने।
के पक्षाः संभवंति। आज्यशब्देन संव्यवहारमात्रं व्यं कृत्वा पशुवदेव क्रियते इत्येकः पक्षः। संव्यवहारो।
पि पशुशब्देनेत्यपरः। इष्टिवदाज्येन तत्र यागं इत्ययमप्यपरः पक्षः। इष्टिपक्षेपि वपापुरोडाशस्थान।
हविः स्थानेषु त्रिष्कृत्वः क्रियत इत्यपरः पक्षः। यद्यन्यथापि कुर्युस्तस्य तस्यानुगुणमादेशं कुर्यात्
। एतदुक्तं भवति। यथा यथाध्वर्यूणां संप्रैषेषु देवतादेशाद्यादेशाश्च कृताः। तद्वदेव द्रव्यदेवता
नामादेशान्स्मदीयाः कुर्युरित्यर्थः। पशुवन्निपातान्। निपातानामेवं प्रकाराः। मेदउद्धृतं पार्श्व
तः श्रोणित इति ये पशुसमवेताभिधायिनो द्रव्यांतरसमवेताभिधायिनो वा मंत्रमध्ये निपाति।
तास्ते निपाता उच्यंते। ते नाज्ये क्रियमाणे पशुवत्क्रियायां पशुवदेव ब्रूयादित्यर्थः। यद्यनूबंध्ये प
शुपुरोडाशमनु देविकाहवींषि निर्वपेयुर्धातानुमती राकासिनीवाली कुहूः। यद्यत्र देविकाहवीं।
ष्यनु निर्वपेयुरन्वायातयेयुरित्यर्थः। तदा धात्रादयः पंच देवता यष्टव्याः। ते यागा देविका इत्युच्यं

200

ना॰ वृ॰ ६
२०२

नेऽस्थानोपदेशश्चान्वायात्यत्वं स्पष्टयति। धाता ददातु दाशुषे प्राचीं जीवातुमक्षिताम्। वयं देवस्य धीमहि सु
मतिं वाजिनीवतः। धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान। धाता कृष्टीरनिमिषाभि च
ष्टे धात्र इद्धव्यं घृतवज्जुहोतेति। धातुरिहे वाम्नातेऽरन्तरेषामदृष्टादेशान्यायेनान्वेषणीयाः। देवीनां चे
त्सूर्यो द्यौः पृथिवी। एषां च पंचानां देव्य इति समाख्या। यद्येनान्वायानये युरुत्तदैनादेवतानवं
तीति। समसुरं धिर्न आगहीति द्वे आद्यं तरेनोषिरश्मिभिरवहंती पोष्यावायोणिनना अर्वा रेणुक
कांटो अश्नुते ननान शं तिनरभातितनस्करोबलिशापर्वतानां दृष्व्हाचिद्यावनस्पतीन। सूर्यं
स्य चातुर्मास्येभ्यो गृहीतम्येयाज्यानुवाक्ये। पश्वलाभे पयस्यां। मैत्रावरुण्यनूबंध्यास्थाने। अ
नूबंध्यायाः पशुद्रव्यालाभे मैत्रावरुणी पयस्या कर्तव्या। देवताभिनिर्देशः प्रकृताया एवानू
बंध्यायाः पश्वलाभे पयस्या कर्तव्या नान्यास्यामनूबंध्यानां अन्यासामनूबंध्यानामयं पक्षो
नास्तीत्यर्थः। स्थानग्रहणं तत्कार्यकरीयं पयस्या न पश्वलाभेनैमित्तिकं कर्मान्तरमिति प्रदर्श

राम॰
२०२

नार्थं। आज्यभागप्रभृति वाजिनांता। एषा पयस्येतरादितरेतरदंता भवति। अध्वर्युप्रस्थयार
न्यथा वा भवति। कर्मिणो वाजिनं भक्षयेयुः। उत्तरविवक्षार्थमेतत्। सर्वे तु दीक्षिताः। सत्र
विषये यजमानत्वात्सर्वे भक्षयेयुः। सर्वे तु दीक्षितोत्थिताः पृथगग्नीत्स प्रारोप्योदग्देवय
जनान्मथित्वोदवसानीयया यजंते। तुशब्दो विशेषविध्यर्थः। तेनास्मिन्सूत्रेऽर्थद्वयम
स्ति सामान्यतो विशेषतश्च। सामान्यतस्तावदयमर्थः। प्रकृतेन ज्योतिष्टोमाख्येन सोमे
न यजमानो दीक्षणीयया दीक्षां प्रविष्टः सन्सोमेनेष्ट्वा अवभृथेष्टौ दीक्षान्मोचनं कृत्वा

आ.श्र.नारा.६
१०३

तस्मादुस्थित एवानूबंध्यांतं प्रयोगं समाप्य तदंते ग्नीनरण्योः समारोप्य उदग्देवयजनाचोदेशस्त॰
स्मिन्नग्नीन्मथित्वोदवसानीयया जनइत्येकोर्थः। अपरस्तु यदि सर्वे दीक्षितास्युः सत्रं चेदित्य
र्थः। दीक्षिता उत्थिता इति पाठः कर्तव्यः। समासपाठेर्थस्य दुर्गमत्वात्। यदि सर्वे दीक्षितास्यु
ः पूर्ववदेवानूबध्यांतं कर्म कृत्वा सर्वे स्वान् स्वान् अग्नीन् स्वेष्वेवारणीषु पृथक् पृथक् समारो
प्य पूर्ववन्मथित्वा पृथगेवोदवसानीयया यजेरन्निति विशेषनोर्थः। मंथनस्यार्थसिद्ध॰
त्वे सत्यपि मंथनवचनं तदानीमेव मथित्वा सद्य उदवसानीयया कर्तव्येत्येवमर्थं। तेनोद

ए.म.
१०३

वसानीयासोमांगं भवति तेनाग्निहोत्रकाले प्राप्तेपि अस्याभिष्टौ अपरिसमाप्तायां तन्न होत॰
व्यमिति सिद्धं भवति। अनूबंध्यांते प्रायश्चित्तानि हुत्वा संस्थाजपं चकुर्युः। पूर्वमकृतत्वं नः सं॰
स्थाजपं। पौनराधेयिका विकृता विकृता॥ सेयमुदवसानीया एवंरूपा भवति। पौनराधेयि
की पुनराधेये याम्नाते ष्टिस्तद्रूपेत्यर्थः। किंचा विकृता विभक्त्याज्यभागविकारोऽपांशुत्वर॰
हितां केवलमग्निर्देवता प्रधाना त्विष्टज्यानुवाक्याश्चाति दिश्यंते नान्यदित्यर्थः॥ १४॥
॥ ॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां षष्ठोध्यायः समाप्तः॥ ॥ शुभं भवतु॥

[OrderDescription]
,CREATED=01.09.20 10:47
,TRANSFERRED=2020/09/01 at 11:21:54
,PAGES=202
,TYPE=STD
,NAME=S0003570
,Book Name=M-1164-AASHAVLAYANSUTRA VITTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,